1817 Tm.

120/4

१२०/४

(५१)

अथ

"।भावप्रकाशः।"

Bhavaprakash

मिश्रभावविरचितः।

(वैद्यशास्त्रम्)

। प्रथमः खण्डः।

निदानेमाधवस्तत्र सूत्रस्थानेतुवाग्भटः शारीरंसुश्रुतःस्यात्रचिकित्साचरको दिता ॥१॥

120/4

अथ

"भावप्रकाशः।"

मिश्रभावप्रणीतः।

(प्रथमखण्डः)

भावप्रकाश:
१

॥ श्रीगणेशाय नमः ॥ गजमुखममरप्रवरं सिद्धिकरं विघ्नहर्तारं ॥ गुरुमवगगमनयनप्रदमि (द्युमनं)
॥ष्ट करोमि ष्टदेवतां वंदे ॥१॥ आयुर्वेदागमनं क्रमेण येनाभवद्भूमौ ॥ प्रथमं लिखामि
तमहं नानातंत्राणि संदृश्य ॥२॥ आयुर्वेदस्य लक्षणमाह ॥ आयुर्हिताहितं व्याधिर्निदा
नं शमनं तथा ॥ विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते ॥३॥ आयुर्वेदस्य निरुक्तिं
माह ॥ अनेन पुरुषो यस्मात् आयुर्विंदति वेत्ति च तस्मान्मुनिवरैरेष आयुर्वेद इ
ति स्मृतः ४ शरीरजीवयोर्योगो जीवनं तेनावच्छिन्नः (विशिष्टः) कालः आयुः ॥ आयुर्वेदद्वारा पदार्थस्मरणे द्वारं४
(आयुष्काहितानि) युष्याणि अनायुष्याणि च द्रव्यगुणकर्माणि ज्ञात्वा तेषां सेवनत्यागाभ्यामारोग्येणा
युर्विंदति तेनैव हेतुना परस्यायुर्वेत्ति ॥ क्रममाह ॥ तत्रादौ ब्रह्मप्रादुर्भावः ॥ विधा
ताथर्वसर्वस्वमायुर्वेदं प्रकाशयन् ॥ स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम् ५ शिव
१

द्रव्यं गुरूष्णादि गुणकट्वादि कर्माणि दिनचर्यादि २

ङ्गानीति ॥ कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषाः   तदा स्ववैद्यौ ज्ञास्ता २
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिताः १४

ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु विधिज्ञो निखिलं साङ्गमायुर्वेदमुपादिशत् ६ अथदक्ष
प्रादुर्भावः अथ दक्षः क्रियादक्षः स्वर्वैद्यौ वेदमायुषः ॥ वेदयामास विद्वांसौ सूर्यांशौ सुरस
त्तमौ ७ अथाश्विनीसुतप्रादुर्भावः ॥ दक्षादधीत्य दस्रौ वितेनतुः संहितां स्वीयां ॥ सकल-
चिकित्सकलोकप्रतिपत्तिविवृद्धये धन्यां ८ स्वयंभुवः शिरश्छिन्नं भैरवेन रुषा यतः
अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ ९ देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः
अक्षतास्ते कृतास्सद्यो दस्राभ्यामद्भुतं महत् १० वज्रिणोऽभूद्भुजस्तंभः स दस्राभ्यां चि
कित्सितः सोमान्निपतितश्चंद्रः दस्राभ्यामेव सुखीकृतः ११ विशीर्णा दशनाः पूष्णो ने
त्रे नष्टे भगस्य च शशिनो राजयक्ष्माभूदश्विभ्यां ते चिकित्सिताः १२ भार्गवश्च्यवनः का
मी वृद्धः सन् विकृतिं गतः वीर्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा १३ एतैश्चान्यैश्च

वहुभिःकर्मभिःभिषजांवरौ वभूवतुर्भृशंपूज्याविंद्रादीनांदिवौकसां १४ अथेंद्रप्रादुर्भावः
संदृश्यदस्रयोरिंद्रःकर्माण्येतानियत्नवान् आयुर्वेदंनिरुद्वेगंतौययाचेशचीपतिः १५ नासत्यौसत्यसं
न्धेनशक्रेणकिलयाचितौ आयुर्वेदंयथाधीतंददतुःशतमन्यवे १६ नासत्याभ्यामधीत्यैवमा
युर्वेदंशतक्रतुः अध्यापयामासवहूनात्रेयप्रमुखान्मुनीन् १७ अथात्रेयप्रादुर्भावः एकदा
जगदालोक्यगदाकुलमितस्ततः चिंतयामासभगवानात्रेयोमुनिपुंगवः १८ किंकरोमिक्व
गच्छामिकथंलोकानिरामयाः भवंतिसामयान्नैतान्नाऽशक्नोमिनिरीक्षितुं १९ दयालु
रहमयैषस्वभावोदुरतिक्रमः एतेषांदुःखतोदुःखंममापिहृदयेऽधिकं २० आयुर्वेदं
पठिष्यामिनैरुज्यायशरीरिणाम् इतिनिश्चित्यगतवानात्रेयस्त्रिदशालयं २१ तत्र
मंदिरमिंद्रस्यगत्वाशक्रंददर्शसः सिंहासनसमासीनंस्तूयमानंसुरर्षिभिः २२ भा
सयंतंदिशोभासाभास्करप्रतिमंत्विषा आयुर्वेदमहाचार्यंशिरोधार्यंदिवौकसां २३

हे इंद्र त्वं दिवः एव राजा न असि किंतु विधात्रा त्वं त्रिलोकी लोकपालकः कृतः २

शक्रस्तु तं निरीक्ष्यैव स्वयमुत्थ सिंहासनेऽययौ तदग्रे पूजयामास मर्शं भूरितपस्कृशं २४ कुशलं
परिपप्रच्छ तस्यागमनकारणं स मुनिर्वक्तुमारेभे निजागमनकारणं २५ देवराजं न राजासि
दिवं एव यंतौ भवान्न विधात्रा विहितो यत्नौ त्रिलोकी लोकपालकः २६ व्याधिभिर्व्यथि
ता लोकाः शोकाकुलितचेतसः भूतले संति संतापं तेषां हर्तुं कृपां कुरु २७ आयुर्वेदो
पदेशं मे कुरु कारुण्यतोऽन्वहं तथेत्युक्त्वा स हर्षोत्कर्षोऽध्यापयामास तं मुनिं २८ मु
नीन्द्र इन्द्रतः सांगमायुर्वेदमधीत्य सः ऋषिभिर्नंद्यतमाशीर्भिराजगाम पुनर्महीम् २९ ×
अथात्रेयो मुनिश्रेष्ठो भगवान् करुणापरः स्वनाम्ना संहितां चक्रे नरचक्रानुकंपया
३० ततोऽग्निवेशं भेडं च जातूकर्णं पराशरम् क्षीरपाणिं च हारीतमायुर्वेदमपाठयत् ३१
तंत्रस्य कर्ता प्रथममग्निवेशोऽभवत्पुरा ततो भेडादयश्चक्रुः स्वं स्वं तंत्राणि यत्नतः ३२ ×

श्रावयामासुरात्रेयं मुनिवृंदेन वंदितम् श्रुत्वा चैतानि तंत्राणि हृष्टोऽभूद् अत्रिनंदनः ३३
यथावत्सूत्रितं तस्मात्संहृष्टा मुनयोऽभवन् दिवि देवर्षयो देवाः श्रुत्वा साध्विति ते ब्रुव-
न् ३४ अथ भरद्वाजप्रादुर्भावः एकदा हिमवत्पार्श्वे दैवाद् आगत्य संगताः मुनयो बहवः
स्तांश्च नामभिः कथयाम्यहं ३५ भरद्वाजो मुनिवरः प्रथमं समुपागतः ततोऽङ्गिरास्ततो
गर्गो मरीचिर्भृगुभार्गवौ ३६ पुलस्त्योऽगस्तिरसितो वशिष्ठः सपराशरः हारीतो गौ-
तमः सांख्यो मैत्रेयश्च्यवनोऽपि च ३७ यमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च नार
दो वामदेवश्च मार्कंडेयः कपिंजलः ३८ शांडिल्यः सह कौंडिल्यः शाकुनेयश्च शौनकः ॥
अश्वलायनसांकृत्यौ विश्वामित्रपरीक्षितः ३९ देवलो गालवो धौम्यः काश्यकात्याय-
नावुभौ कंकायनो वैजवापः कुशिको वादरायणिः ४० हिरण्याक्षश्च लौगाक्षिः शरलो-
माच्च गोभिलः वैखानसा वालखिल्यास्तथैवान्ये महर्षयः ४१ ब्रह्मज्ञानस्य निध-

संयमः नियमो संध्यावंदनादिः १

यायँमँस्य नियमस्यच तपसस्तेजसा दीप्ताः हूयमाना इवाग्नयः ४२ सुखोपविष्टास्ते त
त्र सर्वे चक्रुः कथामिमां धर्मार्थकाममोक्षाणां मूलमुक्तं कलेवरं ४३ तच्च सर्वार्थसंसि
द्ध्यै भवेद्यदि निरामयं तपस्वाध्यायधर्माणां ब्रह्मचर्यव्रतायुषाम् ४४ हर्तारः प्रस्तारो
गा यत्र तत्र च स सर्वतः रोगाः कार्श्यकरा बलक्षयकरा देहस्य चेष्टाहराः दृष्टपादींद्रियशर
क्तिसंक्षयकराः सर्वांगपीडाकराः धर्मार्थाखिलकाममुक्तिषु महाविघ्नस्वरूपा बलात्प्रा
णानाशु हरंति संति यदि ते क्षेमः कुतः प्राणिनां ४५ तत्तेषां प्रशमाय यत्नविधि ×
श्रेयो भवद्भिर्बुधैः योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं ते ब्रुवन् हे योग्या भगवन्
सहस्रनयनं याचस्व लब्धं क्रमादायुर्वेदमधीत्य यद्भयान्मुक्ता भवामो वयं ४६ इ
त्युक्तः स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयं ४७ ८
तत्रेंद्रभवने गत्वा सुरर्षिगणमध्यगं दृष्टवान् वृत्रहंतारं दीप्यमानमिवानलं ४८ दृष्ट्वे

कृ श्रावयामास सत्तमः ह्रि: २

वसमुनिं प्राप्तं भगवान्मघवा मुदा धर्मज्ञः स्वागतं तेभ्यो मुनिं तं समपूजयत् ४९ सोऽभिर
गमयज्जयाशीर्भिरभिनंद्य सुरेश्वरं ऋषीणां वचनं सम्यगा श्रावयत सत्तमः ५० व्याधयोऽतिस
मुत्पन्नाः सर्वप्राणिभयंकराः तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ५१ तमुवाच मुनिं सांगमा
युर्वेदं शतक्रतुः जीवेद्वर्षसहस्राणि देही निरुग्निशम्य यं ५२ सोऽनंतपारं त्रिस्कंधमायुर्वेदं म- हेतुलिंगौषधात्मकं ४
हामतिः यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः ५३ तेनायुः सुचिरं लेभे भरद्वाजो निरामयः अन्या
नपि मुनींश्चक्रे नीरुजः सुचिरायुषः ५४ ततस्तु ततेते जनित ज्ञानचक्षुषा ऋषयोऽखिलाः गुणान्द्रव्या-
णि कर्माणि दृष्ट्वा तद्विधिमाश्रिताः ५५ आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतं आयुर्वेदोक्तवि
धिनाऽन्येपि सुमुनयो यथा ५६ अथ चरकप्रादुर्भावः यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ॥ तदा
शेषश्च तत्रैव वेदं सांगमवाप्तवान् ५७ अथर्वांतर्गतं सम्यगायुर्वेदं च लब्धवान् एकदा शेषः स महीं
वृत्तं द्रष्टुं चर इवागतः ५८ तत्र लोकान्गदैर्ग्रस्तान्व्यथया परिपीडितान् स्थलेषु बहुषु व्यग्रान्
म्रियमाणांश्च दृष्टवान् ५९ तान्दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः अनंतश्चिंतयामास रो

णोपशमकारणं संचिंतसस्मयंतत्र मुनेःपुत्रोबभूवह ६० यतश्चरइवायातोनज्ञातःकेनचिद्यतः
तस्माच्चरकनाम्नासौविख्यातःक्षितिमंडले ६१ सभातिचरकाचार्योदेवाचार्योयथादिवि ६२
सहस्रवदनस्यांशोयेनध्वंसोरुजांकृतः आत्रेयस्यमुनेःशिष्याअग्निवेशादयोभवन् ६३ मुन
योबहवस्तैश्चकृतंतंत्रंस्वकंस्वकं तेषांतंत्राणिसंस्कृत्यसमाहृत्यविपश्चिता चरकेणात्मनोना
म्नाग्रंथोयंचरकःकृतः ६४ अथधन्वंतरिप्रादुर्भावः एकदादेवराजस्यदृष्टिर्निपतिताभुवि तत्र
तेननरादृष्टाव्याधिभिर्भृशपीडिताः ६५ तांदृष्ट्वाहृदयंतस्यदययापरिपीडितं दयार्द्रहृदयःश
क्रोधन्वंतरिमुवाचह ६६ धन्वंतरेसुरश्रेष्ठभगवन्किंचिदुच्यते योग्योभवसिभूतानामुपकारप
रोभव ६७ उपकारायलोकानांकेनकिंनकृतंपुरा त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरू
पवान् ६८ तस्मात्त्वंपृथिवींयाहिकाशीमध्येनृपोभव प्रतीकारायरोगाणामायुर्वेदंप्रकाशय ६९
इत्युक्त्वासुरशार्दूलःसर्वभूतहितेप्सया समस्तमायुषोवेदंधन्वंतरिमुपादिशत् ७० अधीत्य
चायुषोवेदमिंद्राद्धन्वंतरिःपुरा आगत्यपृथ्वींकाश्यांयातोबाहुजवेश्मनि ७१ नाम्नातुसो

भवत्ख्यातोदिवोदासइतिक्षितौ वालएव विरक्तोभूत् चचारच महत्तपः ७२ यत्नेन महताब्र
ह्मातंकाश्यामकरोन्नृपं ततोधन्वंतरिर्लोकैः काशिराजोभिधीयते ७३ द्वितीयदेहिनांस्वी
यासंहिताविहितामुना अयंविद्यार्थिनोलोकान्संहितांतामपाठयत् ७४ अथसुश्रुतः
प्रादुर्भावः अथज्ञानदृशाविश्वामित्रप्रभृतयोविदन् अयंधन्वंतरिःकाश्यांकाशिराजोयमु
च्यते ७५ विश्वामित्रोमुनिःस्वेषुपुत्रंसुश्रुतमुक्तवान् वत्सवाराणसींगच्छ विश्वेश्वरव
ल्लभां ७६ तत्रनाम्नादिवोदासः काशिराजोस्तिवाहुजः सहिधन्वंतरिःसाक्षादायुर्वेद
विदांवरः ७७ आयुर्वेदंततोधीष्वलोकोपकृतिहेतवे सर्वप्राणिदयातीर्थमुपकारोमतो
मखः ७८ पितुर्वचनमाकर्ण्यसुश्रुतःकाशिकांगतः तेनसार्द्धंसमध्येतुंमुनिसूनुशतंययौ
७९ अथधन्वंतरिंसर्वेवाणप्रस्थाश्रमेस्थितं भगवंतंसुरश्रेष्ठंमुनिभिर्वहुभिस्तुतं ८०
काशिराजंदिवोदासंतेपश्यन्विनयान्विताः स्वागतंवइतिस्माहदिवोदासोयशोधनः ८१

कुशलं परिपृच्छ्य तथागमनकारणं ततस्तं सुश्रुतद्वारा कथयामासुरुत्तरं ८२ भगवन्मान
वान्दृष्ट्वा व्याधिभिः बहुपीडितान् क्रंदतो म्रीयमाणांश्च जातास्माकं हृदि व्यथा ८३ आमया
नां शमोपायं विज्ञातुं वयमागताः आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ८४ अंगीकृत्य
वचस्तेषां नृपतिस्तानुपादिशत् व्याख्यातं तेन तेयत्नात् जगृहुर्मुनयो मुदा ८५ काशिर
राजं जयाशीर्भिरभिनंद्य मुदान्विताः सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकं ८६ अथ
महर्षिः सुश्रुतस्तेषु स्वतंत्रं कृतवान्स्फुटं सुश्रुतस्य सखायोऽपि पृथक् तंत्राणि तेनिरे ८७ सुश्र
ुतेन कृतं तंत्रं गुरुश्रुतं बहुभियेततः तस्माच्च सुश्रुतं नाम्ना विख्यातं क्षितिमंडले ८८ इत्यायुर्वेद
प्रणेतृणां प्रादुर्भावः आयुर्वेदाब्धिमध्यादतिमतिमुनयो योगरत्नानि यत्नाल्लब्ध्वा स्वे स्वे नि
बंधे दधुर दधुरखिलजनव्याधिविध्वंसनाय तत्तद्ग्रंथावृत्तैस्तैः सुवचनमणिभिः भावमिश्र
श्चिकित्साशास्त्रेऽज्ञानांधकारं प्रशमयतुमिमं संविधत्ते प्रकाशं ८९ श्रीपतिपदप्रसादाद्दाशी

संयोगो द्विविधः॥ संयोगो समवायश्च नित्यसंबंधः समवायः तस्या पुस्तकसंबंधः
संयोगसंबंधः २

प्त्यै भूमिदेवानां भावप्रकाशनामा ग्रंथोयं पठ्यतां सर्वैः ८० एतस्य निबंधस्य फलं चिकित्सा चि
कित्सा च पुरुषस्य पुरुषस्तु चतुर्विंशतितत्वजीवात्मसमवायः तस्मात् चतुर्विंशतितत्वानां जी
वात्मनश्च स्वरूपनिरूपणाय सृष्टिक्रममाह आत्मज्योतिश्चिदानंदरूपो निर्गुणश्च निर
स्पृहः निर्गुणः प्रकृतेर्योगात् सगुणः कुरुते जगत् ८२ सगुणः इत्यादि पुक्तः सत्वं रज
स्तमश्चेति गुणास्तत्प्रकृतिः समाः सा जडापि जगत्कर्त्री परमात्मचिदन्वयात् ८३ सतः साधो
भावः सत्वं प्रकाशकं ज्ञानं सुखहेतुः रजो रागात्मकं दुःखहेतुः ताम्यति ग्लानिं प्राप्नोति इत्यनेने
ति तमः आवरकं मोहहेतुः ते गुणाः समाः प्रकृतिरित्यर्थः तथा सति न्यूनाधिका गुणा विकृतिः अथ
सत्वतमसुद्दिशन् धन्वंतरिप्रकृतेः स्वरूपविशेषमाह सर्वभूतानां कारणमकारणं सत्वरजस्त
मो लक्षणमष्टरूपमखिलस्य जगतः संभवहेतुरव्यक्तं नामेति अस्यायमर्थः अव्यक्तेनेत्युच्यते

यत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं यथा तंतवः पटस्य समवायिकारणं मृत्पिंडो घटस्य समवायिकारणं ॥

सोव्यक्तं मूलप्रकृतेः पर्यायं तत्सर्वभूतानां कारणं समवायिकारणं अकारणं ॥
नविद्यतेकारणंयस्य तत्सम सत्वरजस्तमोलक्षणं समसत्वरजस्तमश्चास्यरूपं अरूपं अव्यक्ते
महानहंकारः पंचतन्मात्राणिषष्ठोरूपाणियस्यतत् अपरेतुधर्मज्ञानवैराग्यैश्वर्याधर्माज्ञाना
वैराग्यानैश्वर्याण्यष्टौरूपाण्याहुः अन्येतु मनोबुद्धिरहंकारमहाभूतान्याहुः यतःइंद्रिया
णांमहाभूतानांचकारणंतथामहदादयोपिसप्तप्रकृतयः एवमखिलस्यजगतःसंभवेतुरव्यक्त
मित्युपसंहारः प्रकृतिपुरुषयोःसाधर्म्यमाह उभावप्यनादी उभावप्यनंतावुभावप्यलिंगा
वुभावपिनित्यावुभावप्यपरावुभावपिगंतावितिउभावपिनिरोत्लयंक्वचिदपिनया
तः उभावप्यपरौनविद्यतेपरोयाभ्यांतावपरौ तयोर्वैधर्म्यमाह एकातुप्रकृतिरचेत
नात्रिगुणाबीजधर्मिणी प्रसवधर्मिण्यमध्यस्थधर्मिणीचेति अन्येतुनाजड त्रि

उत्तरकाव्यंस मा पृ ६

सांख्य ३

गुणतुल्यगुणत्रयात्मिका बीजधर्मिणी सर्वेषां महदादीनां विकाराणां बीजत्वेनाव
स्थिता प्रसवधर्मिणी पुरुषेणाक्रान्ता क्षोभं प्राप्य साम्यमतिक्रम्य महदहंकारादिक्रमे
णजगतः प्रसवित्री अमध्यस्थधर्मिणी सुखदुःखभोगभागिनी न तु सुखदुःखभोगादु
दासिना पुरुषस्तु चेतनावान्निर्गुणोऽबीजधर्मा प्रसवधर्मा मध्यस्थधर्मा चेति निर्गुणः १४
ध्ये५ अविमानसत्त्वादिगुणः अबीजधर्मा महाप्रलये महदादीनां विकाराणां प्रकृतौ विर
तास्मिन्लीनत्वस्यात् मध्यस्थधर्मा सुखदुःखेच्छाद्वेषादिभ्य उदासीनः प्रकृतेर्नामान्या
तु प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा एतानि तस्या नामानि पुरुषं याः समा
श्रिता ॥१३॥ तस्या गुणानाह सत्त्वं रजस्तमश्चेति विज्ञेयाः प्रकृतेर्गुणाः तैश्च युक्तस्य
चितस्य क्रियया प्यखिलान् गुणान् ॥१२ सत्त्वं सतः साधोर्भावः प्रकाशकं ज्ञानं सुखहेतुः ॥४

रजो रागात्मकं दुःखहेतुः तमः ताम्यति ग्लानिं प्राप्नोत्यनेनेति तमः आवरकं मोहहेतुः स
त्त्वादियुक्तस्य मनसो गुणानाह अस्तिक्यं प्रविभज्य भोजनमनुतापश्च पथ्यं वचो मेधा बु
द्धिधृतिक्षमा च करुणा ज्ञानं च निर्दंभता कर्म्मानिंदितमस्पृहं च विनयो धर्मः सदैवादरादे
ते सत्वगुणान्वितस्य मनसो गीता गुणा ज्ञानिभिः ११५ अस्ति धर्ममोक्षपरलोकादिकमि
ति बुद्ध्याचरतीत्यास्तिकस्तस्य भाव आस्तिक्यं अनुतापः अक्रोधः धृतिः भूतप्रेतस्मरक्रोधलो
भाद्यावेशराहित्यं ज्ञानं आत्मज्ञानं निर्दंभता कपटाभावः कर्मअनिंदितं अस्पृहं निःकामकर्म
अथ रजोयुक्तमनसो गुणानाह क्रोधस्ताडनशीलता च बहुलं दुःखं सुखेऽप्याधिक्याद् दंभः कामु
कताप्यलीकवचनं चाधीरताहंकृतिः ऐश्वर्याद्यभिमानितातिशयिता नंदोधिकं चाटनं प्रत्या ×
तातिरजोगुणेन सहितस्यैते गुणाः स्मृताः ११५ अलीकवचनं मिथ्याकथनं अटनं परिभ्रमणं

अथ तमोयुक्तमनसो लक्षणमाह नास्तिक्यं सुविषण्णतातिशयितालस्यं च दुष्टा मतिः प्रीतिर्नि
दितकर्मशर्मणि सदा निद्रालुताहर्निशं अज्ञानं किल सर्वतोपि सततं क्रोधांधता मूढता प्रख्या
ता स्तु तमोगुणेन सहितस्यैते गुणाश्चेतसः २० तत्र प्रभूतसत्त्वस्तु सात्त्विकः पुरुषः स्मृतः राजसः
तामसश्चैव त्रिविधस्तेन मानवः २१ ततोऽभवन्महत्तत्त्वं बुद्धितत्त्वापराभिधं त्रिगुणं सत्त्वबहुलं निर्मलं
स्फटिकोपमं २२ त्रिगुणायाः प्राकृतेस्तत्त्वं तदिहाद्यमयमीरितं ततः प्रकृतेः त्रिगुणं त्रयो गुणा यत्र ।
तत् तच्च सत्त्वबहुलं अत्रायमभिप्रायः यथा निर्मले हृदादौ बहु द्रव्यपातात्तदीयं जलं वर्द्धते ॥
तथाचिद्रूपपुरुषेण क्रमेण तुल्यगुणत्रयात्मिकायाः प्रकृतेः ज्ञानहेतुः प्रकाशकः सत्त्वगुणो वृद्धः प्रवृद्ध
सत्त्वतः प्रकृतेः सत्त्वबहुलं बुद्धितत्त्वमभवत् महत्तत्त्वात्त्रिगुणाज्जातोऽहंकारः त्रिगुणान्वितः सात्त्वि
को राजसश्चापि तामसश्चेति स त्रिधा महत्तः बुद्धितत्त्वात् त्रिगुणात् त्रयो गुणा यत्र ततः ननु महत्त
त्त्वं त्रिगुणमुक्तमेव किमर्थं महत्तत्त्वात्त्रिगुणादिति विशेषणं सत्यं त्रिगुणादिति पुनर्विशेषणं दुक्तं

दानंशीलंक्षमावीर्यंध्यानंप्रज्ञाबलानि च। उपायंप्रणिधीर्ज्ञानं दशबुद्धिबलानि च॥ ५

सत्ववहुलमिति विशेषणमत्रेनानुवर्त्तते तेनाहंकारोस्यादकं महत्तत्वं त्रिगुणमपि रजो वहुलं वो
ध्यं अहंकारस्य रजोगुणान्वितमनोधर्मत्वात् अहंकारोऽभिमानव्यापरलक्षणः अहंकारस्त्रिवि
धस्तानात् सात्विकरजसादि तस्य त्रिविधस्य कार्य्यमाह जातानि सात्विकात्तस्मात् इंद्रियाणि सरा
जसात् तानि श्रोत्रं त्वचा नेत्रं रसना नाशिका तथा वाग्घस्तचरणोपस्थगुदान्येकादशं मनः पंच
वुद्धींद्रियाण्याहुः पूर्वोक्तानीतराणि तु कर्मेंद्रियाणि पंचैव कथयंति विपश्चितः २४ वुद्धींद्रि
२४ याणि वुद्धेश्चाश्रयत्वात् कर्मेंद्रियाणि कर्माश्रयत्वात् सात्विकाहंकारजातत्वादिंद्रियाणि प्रकाशल
क्षणानि सत्वस्य प्रकाशकत्वात् मनो वुद्धींद्रियं विज्ञैः कर्मेंद्रियमपि स्मृतं मनोधिष्ठितमेवदमिं
द्रियं यत् प्रवर्त्तते तत्रेंद्रियाणां विषयमाह शब्दः स्पर्शश्च रूपं च रसो गंधो ह्यनुक्रमात् वुद्धींद्रियाण
णां विषयाः समाख्याता महर्षिभिः २८ वाच्यं ग्राह्यं च गंतव्यं मानंद्यं साज्यमेव च कर्मेंद्रियाणां वि

स्यां तत्तन्मात्रं समतः १

यदि रिंद्रियजन्यप्रत्यक्षविषयत्वं अनुद्भूतत्वं २

तत् २

यथा ज्ञातव्यो विषयो हृद्दः ३९ हृदः मनसः तामसादप्यहंकारात् तन्मात्राणि सराजसात् पं
चाल्पसत्वसंबंधात्तल्लिंगानि भवंति हि ४० शब्दतन्मात्रकं स्पर्शतन्मात्रकं रूपमात्रकं रसतन्मा
त्रकं गंधतन्मात्रमिति तानि तु ४१ तल्लिंगानि मोहादिलिंगानि तान्यनुद्भूतस्वभावानि वा
ह्येंद्रियाग्राह्याणि शब्दादीन्येव तन्मात्राणि तानि च योगिभिरेव ग्राह्याणि सासामात्रा यस्मिन्
तत्तन्मात्रं तन्मात्रेभ्यो वियद्वायुवह्निवारिवसुंधराः एतानि पंच जायंते महाभूतानि तत्क्रमात्
दा५ तत्क्रमादेकोत्तरपरिवृद्ध्या वियदादयो जायंते इत्यर्थः तद्यथा शब्दतन्मात्रात् शब्दगुणं वियज्जायते
शब्दतन्मात्रसहितात्स्पर्शतन्मात्रात् शब्दस्पर्शगुणो वायुर्जायते शब्दतन्मात्रसहितात्स्पर्शतन्मात्र
सहितात् रूपतन्मात्रात् शब्दस्पर्शरूपगुणो वह्निर्जायते शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्र
सहितात् रसतन्मात्रात् शब्दस्पर्शरूपरसगुणं वारि जायते शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रर हि
सतन्मात्रसहितात् गंधतन्मात्रात् शब्दस्पर्शरूपरसगंधगुणा वसुंधरा जायते अथ महाभूतानां गुणाः शिव

सत्वासत्वौ तु यौ भागौ प्रतिभावं व्यवस्थितौ विविक्तं पूतविजेषु
सर्वं यत्तत्र सा जातिः रससुता ब्यक्तयो मताः २

मं सत्यथिः २

शब्दः श्रोत्रेंद्रियं चापि छिद्राणि च विविक्तता: वियतः कथिता एते गुणा गुणविचारिभिः ५१ विविक्तता
सावयवानां छि २ शारीराणां भावानां शिरास्नाय्वस्थिपेशीप्रभृतीनां जातिव्यक्तिभ्यां मिथः पृथक्त्वं स्पर्शस्त्वगिंद्रियं
चापि लघुता स्पंदनं तनोः चेष्टा सर्वशरीरस्य वायोरेते गुणाः स्मृताः ५३ रूपं नेत्रेंद्रियं पाकः संतापस्ती
क्ष्णता तथा वर्णभ्राजिष्णुतामर्षः शौर्यं वह्नेर्गुणा इमी ५४ रूपं लावण्यं पाकः उदराग्निनाहारपा
कः संतापः शोषं तीक्ष्णता आशुकारिता वर्णो गौरादिः भ्राजिष्णुता दीप्तिः रसो रसेंद्रियं शैत्यं स्ने
हश्च गुरुता तथा सर्वो द्रवसमूहश्च शुक्रं वारिगुणाः स्मृताः ५५ गंधो घ्राणेंद्रियं चापि काठिन्यं गौरवं
तथा वसुंधरागुणा एते गदिता गुणवेदिभिः ५६ शब्दः स्पर्शश्च रूपं च रसो गंधश्च तत्क्रमात् तन्मा
त्राणां विशेषाः स्युः स्थूलभावमुपागताः ५७ तत्क्रमात् शब्दतन्मात्रादिक्रमात् विशेषा अनुभवयोग्याः
सुखदुःखमोहरूपधर्मैर्विशिष्यंत इति विशेषाः अत्र कर्मणि घञ् प्रत्ययः तन्मात्राणि त्वविशेषा
णि यतस्तान्यनुभवयोग्यैः सुखादिभिर्विशेषैर्न शक्यंते सूक्ष्मत्वात् प्रकृतिं कारणयोगान्मता ४

प्रकृतिरेवस्मा महत्तत्वादयः सप्तशक्तेविकृतयः स्मृताः प्रकृतिरेवकारणमेवनतुकस्यचित्का
र्यमित्यर्थः महत्तत्वादयः सप्त महानहंकृतिः पंचतन्मात्राणीतिशक्तेः प्रकृतेर्विकृतयः कार्या
णि इंद्रियाणां सभूतानां कारणत्वान्महर्षिभिः महत्तत्वादयः सप्तप्रोक्ताः प्रकृतयोपिच तथासा
तिप्रकृतिर्महानहंकारः पंचतन्मात्राणि चेत्यष्टौ प्रकृतयः दशेंद्रियाणि चित्तंच महाभूतानि
पंचच एतानि सृष्टिं ज्ञानेप्सि विकाराः षोडशस्मृताः विकाराः कार्याणि एवं चतुर्विंशतिभि
स्तत्वैः सिद्धेवपुर्गेहे जीवात्मानियतेनिघ्नोवसहि स्यांतदूतवान् अत्रशब्दादीनां वियदा
दिमहाभूतगुणानां धर्मिभ्योऽभिन्नतया पृथक्त्वं निरस्यन् उक्तानांतत्वानामुपसंहारमाह
चतुर्विंशतिभिरितितानि च प्रकृतयोऽष्टौ विकाराः षोडशेतिमहत्तत्वादिप्रकृत्यादीनांभावाः
॰नियतेः शुभाशुभकर्मणः निघ्नःस्थायतेः स्यांतदूतवान् मनोदूतयुक्तः सदेहीकथ्यते

अधीनोनिघ्नआयत्तोस्वच्छंदोगृह्यकोप्यसावित्यमरः १

सप्तासप्तौ तु यौ भागौ प्रतिभावं व्यवस्थितौ   विविक्तं पूतविज्ञेयं
संपृथन्तत्र सा जाति रससूक्ष्मा व्यक्तयो मताः २

सां सप्तति: २

शब्दः श्रोत्रेन्द्रियं चापि छिद्राणि च विविक्तताः वियतः कथिता एते गुणा गुणविचारिभिः ५१ विविक्तता
सावयवानां छि: २ शारीराणां भावानां शिरास्नाय्वस्थिपेशीप्रभृतीनां जातिव्यक्तिभ्यां मिथः पृथक्त्वं स्पर्शस्त्वगिन्द्रियं
चापि लघुता स्पंदनं तनोः चेष्टा सर्वशरीरस्य वायोरेते गुणाः स्मृताः ५२ रूपं नेत्रेन्द्रियं पाकः संतापस्ती
क्ष्णता तथा वर्णभ्राजिष्णुतामर्षः शौर्य्यं वह्नेर्गुणा अमी ५४ रूपं लावण्यं पाकः उदराग्निना हारपा
कः संतापः औष्ण्यं तीक्ष्णता आशुकारिता वर्णो गौरादिः भ्राजिष्णुता दीप्तिः रसो रसेन्द्रियं शैत्यं स्ने
हश्च गुरुता तथा सर्वो द्रवसमूहश्च शुक्लं वारिगुणाः स्मृताः ५६ गंधो घ्राणेन्द्रियं चापि काठिन्यं गौरवं
तथा वसुंधरागुणा एते गदिता गुणवेदिभिः ५७ शब्दः स्पर्शश्च रूपं च रसो गंधश्च तत्क्रमात् तन्मा
त्राणां विशेषाः स्युः स्थूलभावमुपागताः ५८ तत्क्रमात् शब्दतन्मात्रादिक्रमात् विशेषाः अनुभवयोग्याः
सुखदुःखमोहरूपधर्मैर्विशिष्यंते इति विशेषाः अत्र कर्मणि घञ्प्रत्ययः तन्मात्राणि तु विशेषा
णि यतस्तान्यनुभवयोग्यैः सुखादिभिर्विशेषैर्न शक्यंते सूक्ष्मत्वात् प्रकृतिं कारणं योगान्मताः ४

पापपुण्यसुखदुःखादिभिः व्याप्तोवद्धश्च मनसा कृत्रिमैः कर्म्मबंधनैः सः जीवात्मा तस्य देहिनः शरीरजीवा-
त्मनोः संयोगकारणेन मनसा संयोगे येये गुणाः उत्पद्यंते तानाह इच्छाद्वेषसुखासुखानि विषय-
ज्ञानं प्रयत्नो मनः संकल्पश्च विचारणा स्मृतिरथो बुद्धिः कलाविज्ञता प्राणस्योपरियापनं गुदवसा-
द्वायोरधःप्रेरणं नेत्रोन्मेषनिमेषकृत्सुकरणोत्साहश्च जीवे गुणाः ६० इच्छासुखहेतुरभिलाषः द्वे-
षो दुःखहेतुर्मनःप्रवृत्तिः सुखं प्रीतिः असुखमप्रीतिः विषयज्ञानं शब्दादिज्ञानं प्रयत्नः कार्य्योन्तौ (तमता) तत्पर-
मनःसंशयात्मकं तस्य कर्म्म संकल्पः विचारणा ऊहापोहाभ्यां वस्तुविमर्शः स्मृतिः पूर्वानुभूतस्यार्थस्य-
स्मरणं बुद्धिर्निश्चयात्मिका कलाविज्ञता शिल्पशास्त्रादिबोधः प्राणस्य हृदयस्थस्य वायोः उपरियाप-
नं मुखादिप्रतिनयनं गुदवसाद्वायोः अधःप्रेरणं अपानस्याधःप्रेरणं नेत्रोन्मेषनिमेषौ नेत्रयोः उन्मी-
लननिमीलने कृत्सुकरणोत्साहः कार्य्यारंभे सामर्थ्योत्साहः जीवे मनोयुक्तस्य जीवात्मनो रमी इच्छा-

शास्त्र २

भावप्र० ११ दयोगुणा भवंती यथा: ६६ इति श्रीलटकनतनय श्रीमन्मिश्रभावविरचिते भावप्रकाशे सृष्टिप्रकरणं प्र
थमम् ॥ १ ॥ चिकित्सायां शरीरी ह्यधिकृतः स शरीरी यथोत्पद्यते तद्बोधयितुं गर्भोत्पत्तिक्रममाह
गर्भोत्पत्तिभूमिस्तु रजस्वला स्त्री ततो रजस्वलाभावमाह द्वादशाद्वत्सरादूर्ध्वमापंचाशत्समाः स्त्रियः
मासि मासि भगद्वारात् प्रकृत्यैवार्तवं स्रवेत् आर्तवस्रावदिवसादृतुः षोडशरात्रयः गर्भग्रहणयो
ग्यस्तु स एव समयः स्मृतः सर्वासामेव चतुर्वर्णस्त्रीणां सर्ववादिसंमतः पूर्वोक्तः समयः ग्रंथांतरे
तु विशेषः तद्यथा स्नानदिवसादूर्ध्वं द्वादशरात्रावधि ब्राह्मण्याः दशरात्रावधिः क्षत्रियायाः
अष्टरात्र्यावधि वैश्यायाः षड्रात्र्यावधिः शूद्र्याः गर्भधारणशक्तिः अथ रजस्वलाया नियमान्याह ॥
आर्तवस्रावदिवसात् अहिंसा ब्रह्मचारिणी शयीत दर्भशय्यायां पश्येदपि पतिं न च करे शरावे र
मुजते दुलयवा • जो पाकेर पर्णे वा हविष्यमद्यमाचरेत् अश्रुपातनखच्छेदमभ्यंगमनुलेपनं नेत्रयोरंजनं स्नानं दिवार
स्वापं प्रधावनं अत्युच्चशब्दश्रवणं हसनं बहुभाषणं आयासं भूमिखननं प्रवातं च विवर्जयेत् ॥ शिव ११

प्रकृष्टवाग्यं १

लोमनाशको रोगः खलतिः
श्मश्रुरहित इत्यमरः ५ भाग्यवसात्

एतस्या नियमातिक्रमे दोषानाह अज्ञानाद्वा प्रमादाद्वा लौल्याद्वा दैवतस्तथा सा चेत्कुर्यान्नि
षिद्धानि गर्भे दोषांस्तदाप्नुयात् एतस्या रोदनाद्गर्भे भवेद्विकृतलोचनः नखच्छेदेन कुनखी
ग३ कुष्ठी त्वभ्यंगतो भवेत् अनुलेपात्तथा स्नानाद्दुःखशीलोंऽजनादन्धः स्वापशीलो दिवास्वापाच्चं
चलः स्यात्प्रधावनात् अत्युच्चशब्दश्रवणाद्बधिरः खलु जायते तालुदंतौष्ठजिह्वासु श्यावो हस
[श्यावः above the line]
नतो भवेत् प्रलापी भूरिकथनात् उन्मत्तस्तु परिश्रमात् खलतिः भूमिखननात् उन्मत्तो वातसेव
नात् अथ रजस्वलाकृत्यं ततः चतुर्थे दिवसे स्नाता सद्वसनादिभिः भूषिता सुमनाः पश्येद्भर्तारं
समलंकृतं पूर्वं पश्येदृतुस्नाता यादृशं नरमंगना तादृशं जनयेत्पुत्रं ततः पश्येत्पतिं प्रियम् ॥
प्रियमिति भर्तुरभावे पुत्रादिकमपि पश्येत् चतुर्थदिवसे रजोनिवृत्तौ स्त्री पूता संगच्छेत्
न तु रजोऽनिवृत्तौ यतोऽत्र प्रवर्तते सलिले क्षिप्तं द्रव्यं गच्छत्यधो यथा तथा वहति रक्तेन तु क्षिप्तं

तादृशां गर्भो न भवति २

वीर्यमधोव्रजेत् ॥ अथर्तुकृत्यं ॥ तत्र गर्भाधाने निषिद्धं विहितं च कालं तयोः फलं चाह ॥ आयुः
क्षयभयात् भर्त्ता प्रथमे दिवसे तथा द्वितीयेपि दिने रक्षेत् सृजेदृतुमतीं स्त्रियं ॥ तत्र यः स्यात्तृतीयो गर्भो
जायमानो न जीवति ॥ आहितो यस्तृतीयेऽह्नि स्यादल्पायुर्विकलांगकः ॥ अतश्चतुर्थी षष्ठी स्यादष्ट॰
मी दशमी तथा द्वादशी चापि या रात्रिः तस्यां तां विधिनाभजेत् ॥ विधिना गर्भाधानोक्तविधिना ॥ अ॰
नंतरोत्तरं विद्यादायुरारोग्यमेव च प्रजाः सौभाग्यमैश्वर्यं बलं चाभिगमात् फलं ॥ युग्मायुग्मरात्रौ
गमने फलमाह ॥ युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु ॥ तत्र दंपत्योः संभोगे यादृक् पुमान्युक्तस्ता॰
दृगुच्यते ॥ स्नातश्चंदनलिप्तांगः सुगंधसुमनोन्वितः भुक्तो वृष्यः सुवसनः सुवेषः समलंकृतः ताम्बूलव भुक्तो वृष्योपो ष्ययेन सः ८
दनस्तस्यामनुरक्तोधिकस्मरः ॥ पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ॥ तत्रायोग्यपुरुषमाह ॥ अस्ना॰
शीतोधृतिः क्षुद्वान्सव्यथांगः पिपासितः बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनं ॥ तत्र या द

पुरीषादिवेगपीडितः १

थ स्त्रीयोग्यतादृश्युच्यते पुरुषस्य गुणैर्युक्ता विहितान्नभोजना नारी ऋतुमती पुंसा संगच्छे-
त सुतार्थिनी ॥ तत्रायोग्यास्त्रीमाह रजस्वला व्याधिमती विशेषाद्योनिरोगिणी ॥ वयोधिका च निष्कामा
मलिना गर्भिणी तथा एतासां संगमात् पुंसां ये गुणा विभवंति हि ॥ तत्र रजस्वला दिनत्रयं यावद्धतो नि-
षिद्धा ॥ यदुक्तं ॥ प्रथमे तु दिने चांडाली द्वितीये ब्रह्मघातिनी ॥ तृतीये रजकी पुंसा यथावर्ज्या तथांग-
ना ॥ व्याधिमती च [illegible]वर्ज्या ॥ तत्र स्त्रीणां व्याधयः प्रदरादयः तद्युक्ता निषिद्धा ॥ तत्रापि विशेषा-
द्योनिरोगिणी ॥ गर्भवितरणक्रममाह ॥ कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ॥ गर्भः संजायते
नार्याः स जातो बाल उच्यते ॥ गर्भो शुद्धः ॥ अशुद्धस्तु गर्भः ॥ अशुद्ध शुक्रशोणितयोरपि दंपत्योर्भवति ॥ यत
स्यात् ॥ दंपत्योः कुपथ्यात्तुल्यात् दुष्टशोणितशुक्रयोः ॥ यद् दंपत्योस्तयोर्जातं ज्ञेयं तदपि कुत्सितं ॥ कुष्ठे संजा-
तं यस्य तत् कुत्सितं ॥ अत्र तारकादिष्वादितश्च प्रत्ययः ॥ यत्तु वातादिदुष्टरेतसः प्रजातत्वादनेन स

मर्थ्या इति सुश्रुतः॥ तत्र शुद्धप्रजोत्पादनेन समर्थ्या इति बोधव्यं॥ रोगादिनाऽशुद्धास्तु प्रजावातादिना दुष्ट
शुक्राऽपित्तनयंति जनकांधबधिरपंग्वादिसंभवात्॥ ऋतौ स्त्रीपुंसयोर्योगे मकरध्वजवेगतः॥ मेढ्र
योन्यपि संघर्षात् शरीरोष्मानिलाहतः॥ पुंसः सर्वशरीरस्थं रेतो द्रावयतेऽथ तत्॥ वायुर्मेहनमा
र्गेण पातयत्यंगनाभगे॥ ततस्संसृत्य व्यात्तमुखं याति गर्भाशयं प्रति॥ तत्र शुक्रवदायातेनार्तवेन यु
तं भवेत्॥ गर्भाशयस्य स्वरूपमाह॥ शंखनाभ्याकृतिर्योनिस्त्र्यावर्ता सा च कीर्तिता॥ तस्यास्तृ
तीये त्वावर्ते गर्भशय्या प्रतिष्ठिता॥ यथा रोहितमत्स्यस्य मुखं भवति रूपतः॥ तत्संस्थानां तथा रूपां
गर्भशय्यां विदुर्बुधाः॥ अस्यार्थः॥ गर्भशय्यायाः मुखं रोहितमत्स्यस्यैव भवति॥ अथ च रोहितमत्स्य
स्य स्थितिर्जले भवति॥ तथा पित्ताशयपक्वाशयमध्ये गर्भशय्यायाः स्थितिर्भवति रूपमपि तस्यैव
भवति॥ यथा रोहितस्य मुखं स्वल्पमाशयस्तु महानिति अर्थः॥ शुक्रार्तवसमायोगे बोध्यं देवरवलुजा

इति स्त्रीयोग्यता दृश्युच्यते पुरुषस्य गुणैर्युक्ता विहितन्यूनभोजना नारी ऋतुमती पुंसा संगच्छे
त सुतार्थिनी ॥ तत्रायोग्यां स्त्रीमाह रजस्वला व्याधिमती विशेषाद्योनिरोगिणी ॥ वयोधिका च निष्कामा
मलिना गर्भिणी तथा एतासां संगमात् पुंसां ये गुणा विभवंति हि ॥ तत्र रजस्वला दिनत्रयं यावद् तां नि
षिद्धा ॥ यत उक्तं ॥ प्रथमे तन्निचांडाली द्वितीये ब्रह्मघातिनी ॥ तृतीये रजकी पुंसां यथा वर्ज्या तथांग
ना ॥ व्याधिमतीयत्नवर्ज्या ॥ तत्र स्त्रीणां व्याधयः प्रदरादयः तद्युक्ता निषिद्धा ॥ तत्रापि विशेषा
द्योनिरोगिणी ॥ गर्भवतरणक्रममाह ॥ कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ॥ गर्भः संजायते
नार्याः स जातो बाल उच्यते ॥ गर्भो शुद्धः ॥ अशुद्धस्तु गर्भः ॥ अशुद्धशुक्रशोणितयोरपि दंपत्योर्भवति ॥ यत
ण्पात् ॥ दंपत्योः कुपथ्यात्तु त्यागात् दुष्टशोणितशुक्रयोः ॥ यदपत्यं तयोर्जातं ज्ञेयं तदपि कुत्सितं ॥ कुष्ठं संजा
तं यस्य तत कुत्सितं ॥ अत्र तारकादिलादितच प्रत्ययः ॥ यत्तु वातादिदुष्टरेतसः प्रजोत्पादनेनस

यते॥ जीवस्तदैव विशति युक्तः शुक्रार्त्तवांतरं॥ सूर्यांशोः सूर्यमप्येतदुभयस्मात् युता यथा॥ वह्निस्सं-
जायते ज्जीवस्तथा शुक्रार्त्तवायुतात्॥ आत्मा सूक्ष्मोनंतसस्मा व्यक्तो वक्तुं न शक्यते॥ चिदानंदैकरूपोयं मन
सापि न गम्यते॥ एवंभूतोपि जगतो भाविनो वत्सलत्वतया॥ अविद्यास्वीकृतः कर्म्मवशो गर्भं विशत्ययं॥
गर्भं चतुर्विंशतितत्त्वमयं॥ स एव वक्ता रसनो द्रष्टा घ्राता स्पृशत्यपि॥ श्रोता च ज्ञाता कर्त्ता च गंतारं तोत्सृज-
त्यपि॥ दिने व्यतीते म्रियते संकुच्य हृदंबुजं यथा॥ ऋतौ व्यतीते नार्य्यास्तु योनिः संवृयते तथा॥ ऋतौ
रजोदर्शनात् षोडशनिशात्मके काले योनिरत्र गर्भद्वारं॥ बीजं तरवायुना भिन्नो॥ द्वौ जीवौ कुक्षिमा-
गतौ॥ यमाविव समिधीयते धर्म्मोत्तरपुरस्सरौ॥ धर्मेतरपुरस्सरौ॥ धर्म्मस्तदितरोऽधर्मस्तौ धर्म्म-
पुरस्सरौ यथोक्तौ ते नौ धर्मादधर्म्माभ्यां भवतः इत्यर्थः॥ आधिक्ये रेतसः पुत्रः कन्या स्यादार्त्तवा-
धिके॥ नपुंसकं तयोः साम्ये यथेष्टं पारमेश्वरी॥ नन्वेवं सति कथं पुत्रोत्पत्तिः॥ सदैवार्त्तवस्यैव

तिलकल्कोष्णमास्तिक्तं जोर्द्ध किट्टमलोप स्त्रियामिसमरः २

सद्यो बलतरा नार्य्यः सद्यो बलकरं पयः ॥ पयः पीत्वा स्त्रियं गच्छेत् तां च सक्ता पुनः पिबेत् ५

भावप्र०
१४

वातुल्यात् ॥ यदुक्तं ॥ आर्त्तवं च चतुरंजलिप्रमाणं ॥ शुक्रं प्रसृतमात्रमिति ॥ वाग्भटेप्युक्तं मात्रे
यादिभिः ॥ मज्जा मेदो वसा मूत्रं पित्तश्लेष्म सकृदसृक् ॥ रसो जलं च देहेस्मिन् एकैकांजलिवर्द्धि
तं ॥ पृथक्तु प्रसृतं प्राहुः मोजो मस्तिष्करेतसां ॥ द्वावंजली तु दुग्धस्य चत्वारो रजसस्तु ते
समधातोरिदं मानं विद्याद्वृद्धिक्षयावतः ॥ इतिमेवं ॥ यतो गर्भाशयस्यमेव शुक्रमार्त्तवं च गर्भोर
॥ त्पत्तिहेतुः ॥ शुक्रं कदाचिदयं तहर्षवशात् ॥ दुग्धादिशुक्रलद्रव्यसेवनात् ॥ शुक्रवातुल्यात्
गर्भाशये वहुश्रवति ॥ कदाचिद्धेमनस्यादिनाशुक्रात्पत्वात् चाल्पमिति ॥ एवमार्त्तवमपीति न दोषः
सुश्रुतः पुनराह ॥ वैलक्षण्याद्शरीराणामस्थायित्वात्तथैव च ॥ दोषधातुमलानां तु परिमाणं न वि
द्यते ॥ इति वैलक्षण्यात् ॥ दीर्घह्रस्वकृशादिभेदेन सादृश्याभावात् ॥ अस्थायित्वात् ॥ वयोहर्निश
तुभुक्तेष्वकमात्रानवस्थानात् ॥ एवं तामभिसंगम्य पुनर्मासाद्व्रजेदसौ ॥ मासादूर्ध्वमितिशेषः ॥ अ

शिव
१४

सास्यासाज्य२

वीकृगमनेन गर्भद्वारविघट्टनाद्गर्भच्युतिप्रसंगः स्यात्॥ केचित्तु पुनः पुष्पदर्शनेन गर्भोलाभनिश्चये
मासादूर्ध्वं गच्छेत्॥ लब्धगर्भां तु नैव गच्छेदिति वदंति॥ तत्र परिहार्यपरिहारार्थं सद्योगृहीतगर्भाया
लक्षणमाह॥ शुक्रशोणितयोर्योनेरस्रावो व्याप श्रमोद्भवः॥ सक्थिसादः पिपासा च ग्लानिः स्फू जंघापीडः २
मासोत्तरे
र्तिर्भगे भवेत्॥ अथ तस्या एव जातरकालेन लक्षणमाह॥ स्तनयोर्मुखकार्ष्ण्यं स्याद्रोमराज्युद्ग
मस्तथा॥ अक्षिपक्ष्माणि चाप्यस्याः संमील्यंते विशेषतः॥ छर्दयेत् पथ्यमुक्तापि गंधादुद्विजते शु
भात्॥ प्रसेकः सदनं चैव गर्भिण्या लिंगमुच्यते॥ तत्र पुत्रगर्भवत्या लक्षणमाह॥ पुत्रगर्भयुतायास्तु नार्याः
शीवनं पीडनं मासि द्वितीयके॥ गर्भो गर्भाशये लक्ष्यः पिंडाकारोऽपरं च तु॥ पिंडो वर्तुलाकृतिः॥ मासि द्वितीयके दृश्यः स्याद्ग
र्भः पिंडाकारो लक्ष्यः रसनेनैवान्वयानस्वग्रिमश्लोकोक्तपि दक्षिणाक्षिमहत्त्वं स्यात् प्राक्क्षीरं दक्षिणे स्त
ने॥ दक्षिणांगं सुपुष्टा स्यात् प्रसन्नमुखवर्णता॥ पुन्नामधेयद्रव्येषु स्वप्ने चापि मनोरथः॥ आम्रादिपू

लमाप्नोति स्वेप्नशुक्रमलादिच॥ कन्यागर्भवती गर्भे पेशी मासि द्वितीयके पुत्रगर्भस्य लिंगानि वि
परीतानि चेष्यते॥ पेशीदीर्घाकृतिः॥ नपुंसकं यदा गर्भे भवेन्मांसार्बुदाकृतिः॥ उन्नते भवतः पा॰
र्श्वे पुरस्तादुदरं मतं॥ अर्बुदं च तुलकूलाद्धं तुल्यं कठिनं च॥ नपुंसकविशेषानाह॥ आसेक्यश्च
सुगंधी च कुंभीकश्चेर्ष्यकस्तथा॥ अमीस शुक्रा बोधव्या अशुक्रः षंढसंज्ञकः॥ तेषां लक्षणमाह॥ पित्रो
स्तु स्वल्पवीर्यत्वादासेक्यः पुरुषो भवेत्॥ स शुक्रं प्राश्य लभते ध्वजोच्छ्रितिमसंशयं॥ पित्रोः मातापि
त्रोः स्वल्पवीर्यत्वात् स्वल्पशुक्रार्तवत्वात् आसेक्यः॥ आसेक्य नामा मुखयोनीति नामांतरं॥
सशुक्रं प्राश्येति स पुरुषोऽन्यपुरुषेण स्वमुखे मैथुनं कारयित्वा तस्य शुक्रं प्राश्य मेहनोत्थानं ल
दुर्गंधियोनौ २ भते इत्यर्थः॥ यः पूतियोनौ जायेत् स तु सौगंधिको भवेत्॥ स योनिशेफसोर्गंधमाघ्राय लभते बलं॰
पूतिगंधिस्तद्र॰ सौगंधिकनामा सौ योनीति नामांतरं॥ बलं मैथुने शक्तिं स्वे गुदे ब्रह्मचर्यार्थः स्त्रीषु पुंवत् प्र
गंधो रसमरः २

ना१ मैथुनात्२

वर्त्तते स कुंभीक [illegible] ज्ञेयो गुदयोनिस्तु स स्मृतः ॥ अब्रह्मचर्य्यात् ॥ ब्रह्मचर्य्यम मैथुनं ॥ अब्रह्मच
र्यं मैथुनं ॥ तस्मात् ॥ दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते ॥ ईर्ष्यकः स तु विज्ञेयो दृग्योनि
स्तु स स्मृतः ॥ यो भार्य्यायामृतौ मोहादंगनेव प्रवर्त्तते ॥ तत्र स्त्री चेष्टिताकारो जायते षंढसंज्ञ
कः ॥ स्त्री चेष्टिताकारः स्त्र्याकारः ॥ श्मश्रुरहितः स्त्रीचेष्टितः ॥ स मेहनोपि पुरुषशक्तिरहितः ॥
किंतु स्त्रीवदधो भूतः ॥ स्वगुदे पुरुषांतरेण मैथुनं कारयति ऋतौ ऋतौ पुरुषवत् प्रवर्त्तेतांगना
यदि तत्र कंन्या यदि भवेत् सा भवेन्नरचेष्टिता ॥ सा पुरुषवत् स्त्रियमारुह्य तस्या योनौ स्वयोनि
घर्षणं करोति अपराऽपि गर्भप्रकृतीरात् यदा नार्य्यावुपेयातां वृषस्यंतौ कथंचन ॥ मुंचंत्यौ शुक्रम
न्योन्यमनस्थि तत्र जायते ॥ अनस्थिः अत्रेम दर्प्येन तेनाल्पकोमलास्थिरित्यर्थः ॥ ऋतुस्नाता तु
यौ नारी स्वप्ने मैथुनमाचरेत् आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि मासि मासि प्रवर्द्धेत सगर्भो

वृषस्यंती तु कामुकी ॰ कामयंतौ

कुकुरे कुणिः अल्पहस्तः ४ पक्षिरल्पतनौ श्रोणः पंगो मूकस्तु मूकिते समरः ४

गर्भलक्षणं ॥ कललं जायते तस्मा वर्द्धितं पैत्तकैर्गुणैः ॥ गर्भलक्षणः ॥ प्रकृतगर्भलक्षणं ॥ पैत्त
कैर्गुणैः केशश्मश्रुलोमनखदंतशिरास्नायुधमनीरेतः प्रभृतिभिः ॥ सर्पवृश्चिककूष्मांडाकृ
तयो विकृताश्च ये ॥ गर्भास्तादृक्विधाश्चान्ये ज्ञेया पापकृतो भृशं गर्भो वातप्रकोपेण दोहदे चापं
मानिते भवेत्कुब्जः कुणिः पंगुः मूको मिन्मिण एव च ॥ पुत्राणां मातुराचारचेष्टाभेदस्य हेतुमातु
श्चाहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ स्त्रीपुंसौ समुपेयातां तयोः पुत्रोपि तादृशः ॥ समुपे
यातां संयोगं गछेतां ॥ अथ गर्भलक्षणमाह ॥ गर्भाशयगतं शुक्रं आवर्त्तजीवसंज्ञकं प्रकृतिः सविका
राश्चैतत्सर्वं गर्भसंज्ञकं ॥ कालेन वर्द्धितो गर्भो यदांगोपांगसंयुतः भवेत्तदा समुनिभिः शरीरीति नि
गद्यते अंगोपांगसंयुतः व्यक्तांगोपांगः तस्यांगान्युपांगानि ज्ञात्वा सुश्रुतशास्त्रतः मयाक्रमाद
भिधीयंते शिष्याः शृणुत यत्नतः ॥ आद्यं मंगं शिरः प्रोक्तं तदुपांगानि कुंतलाः ॥ तस्यांतर्मस्तुलुंग भा०ज्ञा० २
श्च ललाटो भ्रूयुगं तथा नेत्रद्वयं तयोरंतर्वर्त्तते द्वे कनीनिके दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च व

कृष्णभस्त्री भ्रुवोर्मध्ये तारकाद्स्यः कनीनिकाः १
दृष्टिद्वयस्य कृष्णतारा जिनगर्तिलं १

इति १

वर्त्तते स कुंभीकः ज्ञेयो गुदयोनिस्तु सस्मृतः ॥ अथ ब्रह्मचर्य्योक्त ॥ ब्रह्मचर्य्यम मैथुनं ॥ अब्रह्मच
र्यं मैथुनं ॥ तस्मात् ॥ दृष्ट्वान्यव्यवायमन्येषां व्यवायेयः प्रवर्त्तते ॥ ईर्ष्यकः स तु विज्ञेयो दृष्टियोनि
स्तु सस्मृतः ॥ यो भार्यायामृतौ मोहादंगनेव प्रवर्त्तते ॥ तत्र स्त्रीचेष्टिताकारो जायते षंढसंज्ञ
कः ॥ स्त्रीचेष्टिताकारः स्त्र्याकारः ॥ श्मश्रुरहितः स्त्रीचेष्टितः ॥ स मेढ्रेनापि पुरुषशक्तिरहितः ॥
किं तु स्त्रीवदधोभूतः ॥ स्वगुदे पुरुषांतरेण मैथुनं कारयति ऋतौ ऋतौ पुरुषवत् प्रवर्त्तताङ्गना
यदि तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता ॥ सा पुरुषवत् स्त्रियमारुह्य तस्या योनौ स्वयोनि
घर्षणं करोति अपराऽपि गर्भप्रकृतीरात् यदा नार्य्यावुपेयातां वृषस्यंतौ कथंचन ॥ मुंचंत्यौ शुक्रमन् वृषस्यंतौ तु मुकौ कामयतो
न्योन्यमनस्थि तत्र जायते ॥ अनस्थिः अत्रैव दर्पेन तेनाल्पकोमलास्थिरिति पाठः ॥ ऋतुस्नाता तु
यो नारी स्वप्ने मैथुनमाचरेत् आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि मासि मासि प्रवर्द्धेत सा गर्भो

सेन्द्रियः केशलोमनखाग्रान्तमलद्रवगुणैर्विना इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानमु-
क्तं ॥ तदपेक्षया हृदयं विशेषतश्चेतनावस्थानमिति कक्षयोर्वक्षसः संधी यत्रुणी समुदाहृते क-
क्षे तु भे समाख्याते तयोः स्यातां स्तनौ वक्षसि उदरं पचमानस्याग्रं वक्षःपार्श्वद्वयं मतं सपृष्ठवंशः पृष्ठं
तु समस्तैः सह मंस्यते उपांगानि च कथ्यन्ते तानि यानीहि यत्नतः शोणिताज्जायते प्लीहा
वामतो हृदयादधः रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः हृदयात्त्वामतोधश्च फुप्फु-
सो रक्तफेनजः अधो दक्षिणतश्चापि हृदयाद्यकृतस्थितिः (करेजा) तत्तु रंजकपित्तस्य स्थानं शोणितजं
मतं अधस्तु दक्षिणे भागे हृदयात्क्लोम तिष्ठति जलवाहिशिरामूलं तृष्णाछादनकं मतं ॥ क्लोम
तिलकं ॥ एतत्तु वातरक्तजं ॥ तथा च वृद्धवाग्भटः ॥ रक्तादनिलसंयुक्तात्कालीयकसमुद्भवः ॥
इति कालीयकं तिलकं ॥ तिल्ली इति लोके ॥ मेदःशोणितयोः सारात् वृक्कयोर्युगलं भवेत् तौ र-

पुक्कं अग्रमांसं हृदयं ॥ हृदयसमीपे यन्मांसं तत
वृक्कं ॥ ??? इति लोके

उण्डुकः स्यात्त्रिकः स्यादधः वस्तिमूत्राशयस्ततः शक्ति क्लीबे पुमान्स्तः तत्संधी पुंसि वंक्षणौ २

तुः पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः उक्ताः सार्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः अर्धव्या-
मेन हीनानि योषितामन्त्राणि निर्दिशेत् उण्डुकश्च कटी चापि त्रिकं वस्तिश्च वंक्षणौ कंडरा-
णां प्ररोहः स्यात् ... ध्वा वीर्यमूत्रयोः स एव गर्भस्याधानं कुर्याद्गर्भाशये स्त्रियः शंख- गाली २
नाभ्याकृतिर्योनिस्त्र्यावर्ता सा च कीर्तिता तस्यास्तृतीये त्वावर्ते गर्भशय्या प्रतिष्ठिता ॥
वृषणौ भवतः सारात् कफासृङ्मांसमेदसां वीर्यवाहिशिराधारौ तौ मतौ पौरुषावहौ गु-
दस्य मानं सर्वस्य सार्धस्याच्चतुरंगुलं तत्र स्युर्वलयास्तिस्रः शंखावर्तनिभास्तु ताः प्रवाहिणी भवेत्
पूर्वा सार्धांगुलमिता मता उत्सर्जनी तु तदधस्सा सार्धांगुलसंमिता तस्या अधः संवरणी स्यादेकांगुल-
संमिता अर्धांगुलप्रमाणं तु बुधैर्गुदमुखं मतं मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः पुंसः स्रोतांसि नव
नितंबौ परिगतौ तौ यौ तु तौ निगितवौ तु यो' तयोः कुंदरे स्यातां सक्थिनी लिंगमध्यमं तदुपांगानि च ... जानुनी पिं-

पित: १

ऊरुकाद्वयं जंघे द्वे घुटिके पार्ष्णी तले च प्रपदे तथा पादांगुलयस्तत्र दश तासां नखा दश ॥ अथेदं शरीर
मपरेणापि येन येन समवायिकारणेनोत्पद्यते तानि सर्वाण्याह ॥ अथ दोषाः प्रव दूष्यं ते धातवस्तत
दनंतरं ॥ आहारो देहस्तत्परिणामं च वक्ष्यते आर्तवं आद्यधातूनां मलास्तदुपधातवः आश
याश्च कलाश्चापि मर्माण्यथ च संधयः शिराश्च स्नायवश्चापि धमन्यश्छिद्ररास्तथा रंध्राणि भूरिस्त्रो
तांसि जालकूर्चाश्च रज्जवः सेवन्यश्चाथ संघाताः सीमंताश्च तथा त्वचः लोमानि लोमकूपाश्च देहए
तन्मयो मतः तत्र दोषस्वरूपमाह वाग्भटः वायुपित्तं कफश्चेति त्रयो दोषाः समासतः विकृताविकृता देहं
घ्नं घ्नंति ते वर्द्धयंति च ते व्यापिनोपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः वयोऽहोरात्रिभुक्तानां ते मध्या
दिगाः क्रमात् दोषशब्दस्य निरुक्तिमाह ॥ धातवश्च मलाश्चापि दुष्यंत्येभिर्यतस्ततः वातपित्तकफा एते
त्रयो दोषा इति स्मृताः दोषाः इत्यत्र दुषवैकृत्ये इति दुषधातोः ॥ दुष्यंत्येभिरिति वाक्ये अकर्त्तरि च कारके सं
ज्ञायामिति नेन सूत्रेण करणेर्थे घञ् प्रत्ययः तेन धातवोपि विवृद्धिर्गदिता देहधारणात् ॥ यतश्चात्सुश्रुतः ॥

दोषाः ९

शिव
१८

कर्णशष्कुल्यवधिश्च नमः श्रोत्रे १   हस्ताग्रेचिः ४

श्रोणी वक्षश्च एव पंचैशं स्वोच्चकर्णौ तद्धकुल्लीद्वयं पालिद्वयं कपोलौ च नासिका च प्रकी
र्तिता ओष्ठाधरौ च सृक्किण्यौ मुखं तालु हनुद्वयं दंताश्च दंतवेष्टाश्च रसना चिबुकं
गलः द्वितीयमंगं ग्रीवा तु यया मूर्द्धा विधार्यते तृतीयं बाहुयुगलं तदुपांगान्यथ ब्रु
वे तत्रोपरिमतो स्कंधौ प्रगंडौ भवतस्त्वधः कफोणियुग्मं तदधः प्रकोष्ठयुगलं तथा म
णिबंधौ तलौ हस्तौ तयोश्चांगुलयो दश नखाश्च दश ते स्थाप्या दश चैव्याः प्रकीर्तिताः चतुर्थ
मंगं वक्षस्तु तदुपांगान्यथ ब्रुवे स्तनौ पुंसस्तथा नार्या विशेषस्तूभयोरयं यौवनागमने नार्याः पीवरौ
भवतः स्तनौ गर्भविण्यप्रसूताया तावेव क्षीरपूरितौ हृदयं न पुंडरीकेन सदृशं स्यादधोमुखं जाग्रत
स्तद्विकसति स्वपतस्तु निमीलति आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमं अतस्तस्मिन्तमोव्या
से प्राणिनः प्रस्वपंतीति चेतनास्थानमुत्तममित्यस्यायमभिप्रायः चेतना नाम धिष्ठानं मनो देहश्च

स्थानान्याह॥ कण्ठेहृदि तथाधस्तात्कोष्ठवह्नेर्मलाशये शकलेपिशरीरेसौ क्रमेणपवनो वसेत्॥अथतेषां
कर्माण्याह उदानोनामयस्तूर्द्ध्वमुपैतिपवनोत्तमः तेनभाषितगीतादिप्रवृत्तिर्कुपितस्तुसः ऊर्द्ध्वजत्रुग
तान्रोगान्विदधातिविशेषतः योवायुःप्राणनामासौमुखंगच्छतिदेहधृक् सोन्नंप्रवेशयत्यंतःप्राणां
श्चाप्यवलंबते प्रायशोयैःकुरुतेदुष्टोहिक्काश्वासादिकान्गदान् आमपक्वाशयचरःसमानोवह्
निसंगतः सोन्नंपचतितज्जांश्चविशेषान्विविनक्तिहि तज्जानित्यादि अन्नजान्रसमलमू
त्रादीन्पृथक्करोतीत्यर्थः सदुष्टोवह्निमांद्यादिसारगुल्मान्करोतिहि पक्वाशयालयोऽपानं
कालेकर्षतिचाप्ययं समीरणःसकृन्मूत्रशुक्रगर्भार्तवान्यधः क्रुद्धस्तुकुरुतेरोगान्घोरान्व
स्तिगुदाश्रयान् शुक्रदोषप्रमेहांश्चव्यानापानप्रकोपजान् कृत्स्नदेहचरोव्यानोरससंवहनो
द्यतः स्वेदासृक्स्रावणश्चापि पंचधाचेष्टयत्यपि गतिप्रक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः॥
प्रायःसर्वाःक्रियास्तस्मिन्प्रतिबद्धाःशरीरिणां प्रस्यंदनोद्वहनेपूरणंचविवेचनंचधा शिव

संचलनं२ भारवहनं२ तद्धिः२ पृथक्करणं१ १८

गमपक्षेपणोत्क्षेपद्धिः२

रणंचेतिपंचेताश्चेष्टाःप्रोक्ताःनभस्वतः क्रुद्धःसकुरुतेरोगान्प्रायशःसर्वदेहगान् युगपत्कु
पिताएतेदेहंभिंद्युरसंशयं देहंभिन्द्युःकुर्युःमारयेयुरित्यर्थः अथपित्तस्यस्वरूपमाह॥ पित्तमुष्णंद्रवं
पीतंनीलंसत्वगुणोत्तरं सरंकटुलघुस्निग्धंतीक्ष्णमम्लंतुपाकतः पीतंविरामेनीलंसामं
एकंपित्तंवातवन्नामस्थानकर्मविभेदतःपंचविधं तेषांपित्तानांनामान्याह॥पाचकंर
रंजकंचापिसाधकालोचकेतथाभ्राजकंचेतिपित्तस्यनामानिस्थानभेदतः अथपाचकादीनांस्था
नान्याह अग्न्याशययकृत्प्लीह्नोर्हृदयेलोचनद्वयेत्वचिसर्वशरीरस्यपित्तंनिवसतिक्रमात्॥
अथतेषांकर्माण्याह॥पाचकंपचतेभुक्तंशोषाग्निबलवर्द्धनं रसमूत्रपुरीषाणिविवेचयति
निस्तशः पाचकंपित्तमामपक्वाशयमध्यस्थंपंचविधमहारंभोज्यंभक्ष्यंचर्व्यंलेह्यंपेयंपच सूक्ष्म
ति दोषरसमूत्रपुरीषाणिपृथक्करोतिचैतद्ग्न्याशयस्थमेवात्मशक्त्यारसरंजनेहृदय
स्थकफतमोऽपनोदनरूपग्रहणप्रभाप्रकाशनात्वंगलेपनादिपाचनाद्यग्निकर्मणार

भावप्र०
२०

शोषणं पित्तस्थानानामनुग्रहं करोति शोषाग्निरपि पित्तस्थानानि यकृत्प्लीहादीनि भा
गेन गत्वा तत्र तत्र रसरंजनादिकर्मभिरुपकरोतीत्यर्थः कथंभूतं पाचकं पित्तं शोषाग्नि
बलवर्द्धनं शोषाः अग्नयः पृथिव्यादिमहाभूतगताः यत उक्तं चरके भौमाप्याग्नेय
वायव्याः पंचोष्माणः सनाभसा इति ऊष्माणः अग्नयः यत उक्तं वाग्भटे दोषधातुमलादी
नामूष्मेत्यात्रेयशासनमिति दोषधातुमलादीनामूष्मेत्याग्निरित्यर्थः रसादिधातुगता
श्च सप्त तेषां बलवर्द्धनं यथा गृहस्थापितानि रत्नानि खद्योतवद् दूरभास्वराणि तान्य
पि दीपज्योतिषा दूरप्रकाशकानि भवंति तथाऽऽमाशयस्थपाचकाग्नितेजसा सर्वे
अग्नयो बलवंतो भवंति तथा च वाग्भटः अन्नस्य पक्ता सर्वेषां पक्तृणामधिको मतः तन्
मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मिका इति ननु पित्तादन्योऽग्निरुताहोस्वित्पित्तमेवा त
ग्निरिति संदेहे उच्यते पित्तसौक्ष्म्यादिगुणादाहारपाचनरंजनदर्शनादिकर्मणश्चान

शिव०
२०

विसर्गादानविक्षेपैः सोमसूर्यानिला यथा धारयंति जगद्देहं कफपित्तानिलास्तथा अत्र यथासं
ख्येनान्वयो बोधव्यः विसर्गादानं बलस्यैव विक्षेपः शीतोष्णादीनां विविधप्रकारेण प्रेरणं म
लाश्चैते रसादीनां मलिनीकरणान्मताः तत्र वायोः स्वरूपमाह दोषधातुमलादीनां ने
ता शीघ्रः समीरणः रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः नेता स्थानांतरं प्रापयिता शी
घ्रश्चाशुकारी चरकोऽप्याह उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्तनैः सम्यग्गत्या च धातूनामिंद्रिया
णां च पाटवैः अनुगृह्णात्यविकृतो हृदयेंद्रियचित्तधृक् रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्च
लः खरो मृदुर्योगवाही संयोगादुभयार्थकृत् दाहकृत्तेजसा युक्तः शीतकृत्सोमसंश्रयात् वि
भागकरणाद्वायुः प्रधानं दोषसंग्रहे पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेंद्रियं स्थानं वातस्य तत्
त्रापि पक्वाधाने विशेषतः एको वायुः पितवन्नामस्थानकर्मभेदैः पंचविधः तेषां वायूनां नामान्याह ॥
उदानः स्यात्तदनु प्राणः समानोऽपान एव च व्यानश्चेतानि नामानि वायोः स्थानप्रभेदतः ॥ अथोदानादीनां

भावप्र०
२१

द्रवं स्निग्धमधोगं च पित्तं वह्निरतोऽन्यथेति तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स शक्तिमान् स सं च
रति कुक्षिस्थः सर्वतो धमनीमुखैः स कायाग्निः स कायोष्मा स पक्ता स च जीवनं अनन्यगतिरि
त्येवं देहे कायाग्निरुच्यते अन्यच्च वामपार्श्वाश्रितं नाभेः किंचित्सोमस्य मंडलं तन्मध्ये मंड
लं सौर्यं तन्मध्येऽग्निर्व्यवस्थितः जरायुमात्रप्रच्छन्नः काचकोशस्थदीपवत् तथा च मधुर
कोशे द्रवतेजःसमुदायात्मकस्य पित्तस्य तेजोभागोऽग्निरिति तेन पित्तमग्निश्चोच्यते ॥
अति तापित्वाद्योगोलकवत् परमार्थतस्तु अग्निः पित्ताद्भिन्न एवेति सिद्धांतः अत एवाह
रसप्रदीपे जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः सौक्ष्म्याद्रसानाददानो विवेक्तुं नै
व शक्यते नाभेर्मध्ये शरीरस्य विशेषात्सोममंडले सोममंडलमध्यस्थं विद्यात्सूर्यस्य मं
डले प्रदीपवत्तत्र वर्णं स्थितो मध्ये हुताशनः स्थौ दिवियवाति दंस्तेजोयुक्तो गभस्तिभिः
विशोषयति सर्वाणि पल्वलानि शशोसिच्च तद्वच्छरीरिणां भुक्तं ज्वलनो नाभिमाश्रितः मयूखैः

शिव
२१

पच्यते क्षिप्रं नानाव्यंजनसंस्कृतं स्थूलकायेषु सत्वेषु यवमात्रः प्रमाणतः ह्रस्वकायेषु सत्वे
षु तिलमात्रः प्रमाणतः कृमिकीटपतंगेषु वालमात्रोऽवतिष्ठत इति पुनः प्रकृतिमनुसरति ॥ रं
जकं नाम यत्पित्तं तद्रसं शोणितं नयेत् यत्तु साधकसंज्ञं तत्कुर्याद्बुद्धिधृतिस्मृतीः ॥ धृतिमेधां
यदालोचकसंज्ञं तद्रूपग्रहणकारकं भ्राजकं कांतिकारि स्यात् लेपाभ्यंगादिपाचकं अथ श्ले
ष्मणः स्वरूपमाह ॥ श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छलः शीतलस्तथा तमोगुणाधिकः स्वादु
दुष्टस्व ६ र्विदग्धो लवणो भवेत् एकः श्लेष्मापि पित्तवन्नामस्थानैककर्मभेदैः पंचविधः तेषां श्ले
नामानि ७ ष्मणां नामान्याह कफस्यैतानि क्लेदनश्चावलंबनः रसनः स्नेहनश्चापि श्लेषणः
स्थानभेदतः अथ क्लेदनादीनां स्थानान्याह आमाशये च हृदये कंठे शिरसि संधिषु ॥ ५
स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात् दोषाणां सकलशरीरव्यापिनामपि पंचपंच
स्थानानीति ॥ वाग्भट्टाभिप्रायेणोक्तानि ॥ तथा च वाग्भटः इति प्रायेण दोषाणां स्थानान्यवि

कृतात्मनां व्यापिनामपि ज्ञेनीयात्कर्माणि चयप्रकोपप्रशमानिति चरकस्य ते व्यापिनोपि हृ
न्नाभ्योरधोमध्योर्ध्वसंश्रयाइति अथ तत्तत्स्थानगतस्य श्लेष्मणः कर्माण्याह । क्लेदनः
क्लेदयत्यन्नमामाशये तथा परानप्यपि अनुगृह्णाति च श्लेष्मस्थानान्युदककर्मणा अथार्थः
क्लेदकोन्नं क्लेदयति तेन संहतमन्नं भेदं प्राप्नोति अपरानप्यपि श्लेष्मस्थानानि हृदयादीनि भागे
न गत्वा तत्र तत्र हृदयावलंबनं साधारण रसग्रहण समस्तेंद्रियतर्पण संधिसंश्लेषणरूपैः उदक
कर्मभिरनुगृह्णाति उपकरोति तथा च रसयुक्तात्मवीर्येण हृदयस्यावलंबने त्रिकसंधारणं चा
पि विदधात्यवलंबनः त्रिकं शिरोबाहुद्वयसंधिः उभावपि यतः सौम्यौ तिष्ठत श्यांतिके यतः यतोर
सान्विजानीतो रसना रसनेौ समौ रसना रसनेन्द्रियं रसनाकण्ठस्थः कफः स्नेहनं स्नेहदाने
न समस्तेन्द्रियतर्पणः श्लेषणः पर्वसंधीनां संश्लेषं विदधात्यसौ अथ दोषप्रसंगात् दूष्यान
प्याह त्रिदोषाः धातवस्स्वस्तत्तन्मलाउपधातवः मलं मूत्रं च गर्भाद्या बुधैर्दूष्या उदाहृताः ।। अथ

धरणावतीमेधाविश्यामलिमाधीशू

खलु पित्तव्यतिरेकेणान्योऽग्निः तस्मादग्निरूपस्यैव पित्तस्य स्थानभेदात् पाचकरंजकसाधकालो
चकभ्राजकसंज्ञाः तथा च वाग्भटः पाचकं तिलमात्रं स्यात्कोटि न्यायान्नास्य दोषता अनुगृह्णाति स
विकृतं पित्तं पाकोष्मदर्शनैः क्षुत्तृड्रुचिप्रभामेधाधीशौर्य्यतनुमार्दवैः पित्तं पंचात्मकं तत्र पक्वामा
शयमध्यगं पंचभूतात्मकत्वेपि यत्तैजसगुणोदयात् त्यक्तद्रवत्वं पाकादिकर्मणानलशब्दितं ।। पचत्यन्नं
विभजते सारकिट्टौ पृथक् तथा तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहं करोति बलदानेन पाचकं नाम त
तस्मृतं ननु यदि पित्ताग्न्योरभेदस्तत्कथं घृतं पित्तस्य समकमग्नेर्दीपनं भवति तथा मत्स्याः
पित्तं कुर्वंति न च ते अग्निदीपकरा इति तथा पित्ताधिक्यात् तीक्ष्णोऽग्निरियपि कथं स्यात् तथा
समदोषः समाग्निश्चेत्यपि वक्तुं न युज्यते तथा द्रवं स्निग्धमधोगं च पित्तं वह्निरथोन्यथेति अत्रो
च्यते पित्तमग्नेः संतताधिष्ठानं तथा वाक्कसंप्यांतरे अग्निर्भिन्नगुणैर्युक्तः पित्तं भिन्नगुणं तथा ×

धातुशब्दस्य निरुक्तिमाह ॥ एते सप्त स्वयं स्थिता देहं दधति यन्नृणां रसासृग्मांसमेदोऽस्थि
मज्जाशुक्राणि धातवः धातवइत्यत्र धा धातोस्तु प्रत्ययः अथ धातूनां कर्माण्याह प्रीण
नं जीवनं लेपः स्नेहो धारणपूरणे गर्भोत्पादश्च कर्माणि धातूनां कथितानि हि तत्र रसश
ब्दस्य निरुक्तिः ॥ याह्यचोरसधातुर्यस्तत्ताभवद्दयं रसः स दैवसेवकलं देहं रसतीति रसस्मृतः
अथ रसस्य स्वरूपमाह सम्यक्पक्वस्य भुक्तस्य सारो निगदितो रसः स तु द्रवः सितः शीतः
स्वादुः स्निग्धश्चलो भवेत् सारो यथा गुडमधुकपुष्पवद्धूलिहलग्वदरीमल्लादिभावः सारो मदि
रा अथ रसस्य स्थानमाह सर्वदेहचरस्यापि रसस्य हृदयं स्थलं समानमरुता पू
र्वं यद्दमे हृदये धृतः अथ रसस्य कर्माण्याह आरुह्य धमनीर्गत्वा धातून्सर्वान्नयं र
सः पुष्णाति तदनुस्रोतो व्याप्नोति च तनुं गुणैः गुणैः शीतास्निग्धपोषकत्वैः मंदवर

क्षयाच्चैव धातूनां रसस्याद्रसशोणितं यथा तथान्यधातुस्थः स्थिरत्वात्कारणं भवेदिति तिमिरं लिंगनाशः स्यात्तेजरसस्य स्वजः

भावप्र० २२ क्षयात् आलोचकस्यापि तस्य तत्क्षमतागुणस्य च नश्यति वेगं नावेगं सम्यक् पश्यति विनिःसृतम् विहाय दुष्टतां स्वेन रूपेण स्थ

तिष्ठते प्रयत्नमनपेक्ष्य कृतकागुरुं विनिर्दिशेत् ॥२॥

स्निग्धविदग्धस्तु कटुर्वाम्लो भवेद्रसः स कुर्याद्धृल्लासोद्गारविदाहं करोत्यपि अथ पर

क्तस्य स्वरूपमाह ॥ यदा रसो यकृद्याति तत्र रंजकपित्ततः रागं पाकं च संप्राप्य स जन्येद्रक्तसंज्ञकः

रक्तं सर्वशरीरस्थं जीवस्याधार उत्तमः स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ॥ जीव

स्याधार उत्तम इति यतस्तस्मात् जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः वीर्ये रक्ते मले यस्मि

न्क्षीणे याति क्षयं क्षणात् इति वीर्ये रक्ते मले च शरीरारंभके वाग्भटोक्तपरिमाणमिति ॥

शुद्धे जीवो वसति न तु दुष्टे प्रवृद्धे रक्तस्रावणोपदेशस्य वैयर्थ्यप्रसंगात् पित्तवद्भवेत् ॥ अ

म्लो भवेदित्यर्थः अथ रक्तस्य स्थानमाह ॥ यकृत् प्लीहा च रक्तस्य मुख्यं स्थानं तयोः स्थितं ॥ र

क्तमन्यत्रापि स्थितं धातूनां रक्तानां पोषकं भवेत् अथ मांसस्य स्वरूपमाह ॥ शोणितं स्वाग्निनाप

क्वं वायुनायत् घनीकृतं तदेव मांसं जानीयात्तस्य भेदान् अपि ब्रुवे शोणितमिति शोणितं र

स्यात्तेन गच्छा रसएव शोणितसंज्ञां लभते एवमग्ररसस्यैव मांसादिव्यपदेशः अथमांसस्य
पेशीराह॥ यथार्थमूष्मणायुक्तो वायुस्रोतांसि दारयेत् अनुप्रविश्य पिशितं पेशीर्विभजते तथा॥
यथार्थं यथाप्रयोजनं मांसपेशीनां संख्यामाह॥ मांसपेश्यः समाख्याताः नृणां पंचाशतानि
तु तासां शतानि चत्वारि शाखासु कथितान्यथ कोष्ठेषु तु नरा षष्टि कथिता मुनिपुंगवैः
ग्रीवायाः तूर्द्ध्वगास्तास्तु चतुस्त्रिंशच्च प्रकीर्तिताः ताः शाखागताः प्राह॥ एकैकस्यां पादांगु-
ल्यां तिस्रः तिस्रः ताः पंचदश १५ प्रपदाग्रे १० दश पादोपरि कूर्चसंनिविष्टा दश १० गुल्फत-
लयोर्दश १० गुल्फजानुनोरंतरे विंशतिः २० जानौ पंच ५ ऊरौ विंशतिः २० वंक्षणे दश १०॥
एवमेकस्मिन् सक्थ्नि शतं भवति एतेनेतर शाखा व्याख्याता अथ कोष्ठगताः
प्राह गुदे तिस्रः ३ शेफस्येका १ सेवन्यामेका १ वृषणयोर्द्विः २ स्फिजोः पंच ५ पंच ५

वस्तिमूर्ध्नि द्वे २ उदरे पञ्च ५ नाभ्यामेका १ पृष्ठोर्ध्वसंनिविष्टा उभयतः पञ्च ५ पञ्च ५ दी
र्घाः पार्श्वयोः षट् ६ वक्षसि दश १० अक्षकांसौ प्रतिसमन्तात् सप्त ७ अक्षकौ जत्रुणी इ
ति लोके अंसौ स्कंधौ॥ हृदि द्वे २ यकृति द्वे २ प्लीह्नि द्वे २ उंडुके द्वे २ अपगीवोर्ध्वं ग्रं प्र हा॥
ग्रीवायां चतस्रः ४ हन्वो २ द्वे २ कण्ठमण्यां चंटिकायामिति यावदेका १ गले एका १ ता
लुनि द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां द्वे २ नेत्रयोर्द्वे ॥ गण्डयोश्चतस्रः ४ क
र्णयोर्द्वे २ ललाटे चतस्रः ४ शिरस्येका १ एवं मांसपेश्यः पञ्चशतानि भवंति स्त्रीणामपि
भवंत्येताः किंतु विंशतिरुत्तराः गर्भाशये गर्भमार्गयोन्यौ च स्तनयोरपि एताः पञ्चशतानि मांसपे
श्यः अधिका विंशतिर्यथा गर्भाशये तिस्रः ३ गर्भच्छिद्रसंस्थिताः शुक्रार्तवप्रवेशिन्यस्तिस्रः योनावभ्यं
तरतो मुखाश्रिते प्रसृते द्वे योनावेव बहिर्निर्गते श्रोतः पार्श्वद्वयस्थिते वर्तुले योनिकर्णिके इति यावत् द्वे २
स्तनयोः पञ्च ५ पञ्च ५ यौवने तासां वृद्धिर्भवति पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता मेहनमुष्कजाः स्त्रीणां मा

नितंवे २

२५ भावप्र॰ संख्यामाह शल्यतंत्रेऽस्थिखंडानां शतत्रयमुदाहृतं तान्येवात्र निगद्यंते तेषां स्थानानि यानि च
सविंशतिशतं त्वस्थ्नां शाखासु कथितं बुधैः पार्श्वयोः श्रोणिफलके वक्षःपृष्ठोदरेषु च ज्ञानीया
द्विषष्टे तेषु शतं सप्तदशोत्तरं ग्रीवायामूर्द्ध्वगं विंद्यादस्थ्नां षष्टिं त्रिसंयुतां तानि शाखागता
न्याह एकैकस्यां पादांगुल्यां त्रीणि त्रीणि तानि पंचदश १५ पादतले पंचास्थिशलाकास्तदा
धारभूतमेकमस्थि एवं षट् कूर्च्चे द्वे २ गुल्फे द्वे २ पार्ष्ण्यावेकं १ जंघयोर्द्वे २ जानुन्येकं १ ऊरा
वेकं १ एवं त्रिंशदेकस्मिन्सक्थ्नि भवंति एतेनेतरशक्थिवाहू च व्याख्यातौ अथ पार्श्वादिगा
तान्याह पार्श्वयोः षट्त्रिंशत् ३६ षट्त्रिंशत् ३६ ७२ श्रोणिफलके भगे वा एकं १ गुदे एकं १ नितंबयोरेकैकं २ त्रिके एकं ७४
१ वक्षस्यष्टौ ८ पृष्ठे त्रिंशत् ३० अक्षकसंज्ञके द्वे २ अथ ग्रीवोर्ध्वगतान्याह ग्रीवायां नव ९ कण्ठनाड्यां चत्वारि ४
हन्वोरेकैकं २ दंता द्वात्रिंशत् ३२ नासायां त्रीणि ३ तालुन्येकं १ गंडयोरेकैकं २ कर्णयोरेकैकं २ शंखयोरेकैकं २
शिरसि षट् ६ एतान्यस्थीनि पंचविधानि भवंति तानि विधानि यथा तरुणानि कपालानि रुचकानि भवंति

२५ श्रिव॰

वलयान्यपि तानि स्युर्नलकानि च कानि चित् ॥ अक्षिकोशश्रुतिघ्राणग्रीवासु तरुणानि हि शिरःशंखकपालेषु
तालुंशप्रोथजादिषु कपालानि भवंत्येषु दंतेषु रुचकानि च पाणिपार्श्वयुगे पृष्ठवक्षो जठरयोरपि पाद
योर्वलयानि स्युर्नलकानि भुवेऽधुना हस्तपादांगुलितले कूर्च्चेन्द्रमणिबंधयोः बाहुजंघाद्वये चापि ष्ठीनी
यान्नलकानि तु अथास्थ्नां प्रयोजनमाह ॥ मांसान्यत्र निबद्धानि शिराभिः स्नायुभिस्तथा अस्थ्यालंबनं स्था ४
कृत्वा न शीर्यंते पतंति न अथ मज्जस्वरूपमाह अस्थियत्तस्याग्निना पक्वं तस्य सारो द्रवो घनः यस्स्येद
वत एव कूभृतः समज्जेत्यभिधीयते अथ मज्ज्ञः स्थानान्याह स्थूलास्थिषु विशेषेण मज्जात्वभ्यंतरस्थि
ता अथ शुक्रस्योत्पत्तिमाह ॥ रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रस्य सं
भवः श्रुत्वेतेनैव वचनेन शुक्रं मज्जसंभवमुक्तं न तु मासेन रसः शुक्रं भवति स्त्रीणामार्तवं च भवतीति शुश्रु
तस्यैव वचनेन रसादेव शुक्रस्योत्पत्तिरुच्यते तदेतत्कथं गच्छते इदमेव संदेहं दूरीकर्तुं आहारादेर्गतिं परि
णमंत्याह यावन्मासमाहारः पूर्वप्राणानिलेरितः माधुर्यं पिच्छभावं च षड्रसोऽपि लभेत सः आहा
रस्सत्र आहीयते इत्याहारः अकर्त्तरि च कारके संज्ञायामिति सूत्रेण कर्मणि घञ् सर्पवद्विधः तथाच ॥

आहार्य्यं षड्विधं भोज्यं भक्ष्यं चर्व्यं तथैव च लेह्यं चोष्यं तथा पेयं तदुदाहरणानि तु भोज्यमोदनसू
पादि भक्ष्यं मोदकमंडकं चर्व्यं चिपिटधानादि रसालादि तु लिह्यते चोष्यमाम्रफलेक्ष्वादि पीयते
पानकं पयः आमाशयमाह चरकः नाभिस्तनांतरं जंतोराहुरामाशयं बुधा इति अत्र विशेषमाह
उरो रक्ताशयस्तस्मादधः श्लेष्माशयस्ततः आमाशयस्तु तदधस्तदधो दहनाशय इति प्राणानि
लेरित इति हृदयाधिष्ठानेन प्राणनाम्ना वायुना मुखं गतेनांतः प्रवेशितः तथा च सुश्रुते यो वा
युः प्राणनामासौ मुखं गच्छति देहधृक् सोऽन्नं प्रवेशयत्यंतः प्राणांश्चाप्यवलंबत इति तमाहार
मामाशयस्थः क्लेदननामा कफः क्लेदयति क्लेदनात्संहतं भिनत्ति च उक्तं च सुश्रुते क्लेदनः
क्लेदयत्यन्नं संहतं च भिनत्त्यपि इति स आहारः षड्रसोऽप्यामाशये माधुर्य्यं लभते आमाशयस्थस्य मधुरस्य क
फस्य योगात् उक्तं च श्लेष्मणः रूपं श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा तमोगुणा
धिकः स्वादुर्विदग्धो लवणो भवेदिति फेनभावं च लभते जठरानलतेजसा यत आह वाग्भटः सं
प्रक्षालितः धुक्षि धुक्षितः समानेन पचत्यामाशयस्थितं औदर्य्योऽग्निर्यथा बाह्यः स्थालीस्थं तोयतंडुलमिति ॥०

वर्द्धतिष्ठंति ~~[illegible]~~ फलमंतर्गताहिताः अस्यायमर्थः पुंसां मेहनमुष्कयोरप्याश्रिताः मांस
पेश्यः पूर्वमुक्ताः स्त्रीणां मेहनमुष्काभावात् फलं गर्भाशयं चावृत्य तिष्ठंति गयदासस्त्वाह स्त्रीणां
मांसपेश्यस्त्रिभिर्हीनानि पंचशतानि तथा च भोजः पंचपेशीशतान्येवं स्त्रीवर्ज्यं विद्धि मे प्रिय अ
तस्त्रिंशो हीयंते स्त्रीणां शेफसि मुष्कयोः अथ मांसपेशीनां कर्माण्याह शिरास्नाय्वस्थिपर्वा
णि संधयश्च शरीरिणां पेशीभिः संवृतान्येव बलवंति भवंति हि अथ मेदसः स्वरूपमाह यन्मांसं
स्वाग्निना पक्वं तन्मेद इति कथ्यते तदतीव गुरु स्निग्धं बलकार्यं निवर्हणं अथ मेदसः स्थानमा
ह मेदो हि सर्वभूतानामुदरेष्वस्थिषु स्थितं अत एवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् अथास्थ्नः
स्वरूपमाह मेदो यत्स्वाग्निना पक्वं वायुनात्यतिशोषितं तदस्थिसंज्ञां लभते स सारः सर्वविग्र
हे अभ्यंतरगतैः सारैर्यथा तिष्ठंति भूरुहाः अस्थिसारैस्तथा देहा ध्रियंते देहिनां ध्रुवं तस्मा
च्चिरं विनष्टेषु त्वङ्मांसेषु शरीरिणां अस्थीनि न विनश्यंति साराण्येतानि सर्वथा ॥ अथास्थ्नां

न१

भौतिकः तत्र पाचकपित्तस्थेनाग्निनोत्तेजितैः शरीरवर्त्तिभूम्याद्यग्निनाहारवर्त्तिभूभागः पच्यते पक्वो
भूभागः स्वकीयान्गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते तथा च सुश्रुते पंचभूतात्मके दे-
हे ह्याहारः पांचभौतिकः विपक्वः पंचधा सम्यग्गुणान्स्वानभिवर्द्धयेदिति गुणशब्देनात्र गुणिनः पृथिव्या
न४ दयः उच्यन्ते तैर्गुणान् शरीरवर्त्तिनः पार्थिवादीन्भागानभिवर्द्धयेदित्यर्थः एवमहोरात्रेण पक्व आहारो-
मिष्टः पटुश्च मधुरो भवति अम्लस्त्वम्लो भवति कटुतिक्तकषायश्च कटुर्भवति उक्तं च मिष्टः पटुश्च म-
धुरमम्लोऽम्लं पच्यते रसः कटुतिक्तकषायाणां विपाको जायते कटुरिति एवं विपक्वस्याहारस्य सारो रसः-
शेषो गृहणीस्थो मलद्रवः मलद्रवस्य जलभागः शिराभिर्वस्तिं नीतो मूत्रं भवति उक्तं च आहारस्य रसः-
सारः सारहीनो मलद्रवः शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात् शेषं किट्टं च यत्तस्य तत्पुरीषं-
निगद्यते समानवायुना नीतं तत्किट्टमपि मलाशये तत्र मलाशयालयेनापानवायुना प्रेरितं मूत्रं मे-
ढ्रभगमार्गेण पुरीषं गुदमार्गेण शरीराद्बहिर्याति उक्तं च मूत्रं तूपस्थमार्गेण पुरीषं गुदमार्गतः ।
अपानवायुना क्षिप्तं बहिर्याति शरीरितः उपस्थ शिश्नो भगश्च रसस्तु समानवायुना प्रेरितो धमनी शिव २७ भावप्र०

मार्गेण शरीरारंभकस्य रसस्य स्थानं हृदयं गत्वा तेन सह मिश्रितो भवति उक्तं च रसस्तु हृदयं याति- १
समानमरुतेरितः स तु व्यानेन विक्षिप्तः सर्वान्धातून्विवर्द्धयेत् केदारेषु यथा कुल्याः पुष्णन्ति वि-
विधौषधीः तथा कलेवरे धातून्सर्वान्वर्द्धयते रसः रसस्तु तत्र तत्र त्रिधा भिद्यते उक्तं च चरके स्थू-
तेषु तेषु धातुषु४ लांशमलभेदैः तत्र तत्र त्रिधा रसः स्वस्थूलांशं परं सूक्ष्मस्तत्कलां याति तन्मले अयमर्थः स्थू-
लांशस्स्वं याति यथा स्थितः तिष्ठति सूक्ष्मोंऽशः परं द्वितीयं धातुं याति तन्मलः रसादिमलः तत्र
मलं शरीरारंभके तत्तद्धातुमलं यातीत्यर्थः यथा लौकिकाग्निना इक्षुरसः पच्यते तथा शरीरारंभक-
स्य रसस्य अग्निनाहाररसः पच्यते पच्यमानः सः पंचाहोरात्रान् सार्द्धदंडमेकं यथावत् प्राकृतेन रस
धातावेव तिष्ठति उक्तं च सुश्रुते स खल्वप्यरसस्त्रीणि त्रीणि कलासहस्राणि पंचदश कला एकैकस्मि-
न्धातावेवतिष्ठत इति अत्र कलानां विंशतिर्मुहूर्त्तः स च दंडद्वयात्मकः तथा च भोजः धातौ रसादौ मज्जान्ते
प्रत्येकं क्रमतो रसः अहोरात्रान् स्वयं पंच सार्द्धदंडं च तिष्ठति ~~प्रत्येकमेकस्मिन्ने~~ प्रत्येकमेकस्मिन्नेकस्मिन्नित्यर्थः
ततो यथा पच्यमानादिक्षुरसान्मलो निर्गच्छति तथा पच्यमानादाहाररसा

२८ भावप्र॰

न्मलो निर्गच्छति स कफः उक्तं च सुश्रुते कफः पित्तं मलं खेषु प्रस्वेदो नखरोम च नेत्रविट् त्वक्षु च स्नेहो
धातूनां क्रमशो मलाः खेषु मलाः कर्णादिस्रोतोमलाः स च कफः प्राणानिलप्रेरितो धमनीमार्गेण शरीरारं
भकं क्लेदनाख्यं कफं गत्वा पुष्णाति ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मो
भागः शरीरारंभकं रसं पोषयन् सकलशरीराधिष्ठानेन व्याननवायुना प्रेरितो धमनीभिः संचर
न् पोषणस्नेहनजठरशान्त्याधिकृतसंतापनिवारणादिगुणैः सकलं शरीरं पुष्णाति ततः स्थू
लो भागः प्राणवायुना प्रेरितो धमनीमार्गेण शरीरारंभकस्य रक्तस्य स्थानं यकृत्प्लीहरूपं गत्वा तेन
सह मिश्रितो भवति ततः प्राकृतस्य रक्तस्याग्निना पुनः पच्यमाने पंचाहोरात्रात् सार्द्धदंडद्वया
वत् प्राकृतेन रक्तधातवे वर्तते इति ततो यथाग्निना पुनः पुनः पच्यमानादिक्षुविकारो द्वारंवारं मलं
निर्गच्छति तथा पुनः पच्यमानादाहाररसात् प्रतिवारं मलं निर्गच्छति तत्र रक्ताग्निना पच्यमानान्मलं
तत्र पित्तं समानवायुना प्रेरितं धमनीमार्गेण शरीरारंभकं पाचकाख्यं पित्तं गत्वा पुष्णाति ततः सार
भूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मो भागो रंजकाख्यपित्तेन रक्तीकृतः शा शिव॰ २८

पलितः

अथ संघाताहारः प्राणवायुना प्रेरितस्ततः किंचित् स्वेदितः पाचकपित्तोष्मणैव ... अम्लो भवति उक्तं
च अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेदिति पाचकपित्तेन पाचकपित्तस्योष्मणा ततः स ए
वाहारो नाभिमण्डलाधिष्ठानेन समाननाम्ना वायुना प्रेरितो ग्रहणीं प्रतिनीयते उक्तं च त
तः समानेन मरुता ग्रहणीमभिनीयते ग्रहणीलक्षणमाह षष्ठी पित्तधरा नाम या कला परिकीर्ति
ता आमपक्वाशयांतस्था ग्रहणी साभिधीयते पित्तधरा पाचकाख्यं पित्तं यदस्याधिष्ठानं तद्धा
रयति तत्र ग्रहण्यामामाशयपक्वाशयमध्यवर्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः प
च्यते स कटुश्च भवति तथा च ग्रहण्यां पच्यते कोष्ठवह्निना जायते कटुरिति अयमर्थः आहा
रो ग्रहण्यां कोष्ठवह्निना ग्रहणीस्थितपाचकपित्तस्य वह्निना पच्यते पच्यमानः स ग्रहणीस्थि
तस्य कटुरसस्य पित्तस्य संयोगात् कटुर्भवति एतदाहारपाके विशेषमाह शरीरं पांचभौतिकं
तत्र पंचसु भूतेषु पंचाग्नयस्तिष्ठंति उक्तं च चरके भौमाप्याग्नेयवायव्याः पंचोष्माणः सनाभ
साः पंचाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचंति हि अत्रोष्मपदेनाग्निरुच्यते आहारो विपाच्य

स्थूलो भागो व्यानवायुना प्रेरितो धमनीभिः शिराभिश्च शरीरारंभकान्यस्थीनि याति ततोऽस्थ्यग्निना
पुनः पच्यमानः पंचाहोरात्रात् सार्द्धं दंडं च यावदस्थिष्वेव तिष्ठति ततः पच्यमानात् तस्मान्मलो निर्ग-
च्छति स च व्यानवायुना प्रेरितः शिरामार्गेणागत्यांगुलिषु नखास्तनौ लोमानि भवंति ततः सारभूतस्या-
रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च ततः सूक्ष्मो भागोऽस्थीनि पुष्णाति ततः स्थूलो भागो व्यानवायु-
ना प्रेरितः स्रोतोमार्गैः मज्जस्थानानि स्थूलास्थ्यभ्यंतराणि याति ततो मज्जाग्निना पुनः पच्यमानः
पंचाहोरात्रात् सार्द्धं दंडं च यावन्मज्जस्वेवावतिष्ठति ततः पच्यमानात्तस्मात् मलो निर्गच्छति तच्च व्या-
नवायुना प्रेरितं शिरामार्गैः नयनयोरागत्य नेत्रविट् त्वक्षु स्नेहश्च भवति ततः सारभूतस्य रसस्य
द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मो भागो मज्जानं पुष्णाति ततः स्थूलो भागो व्यानवायुना-
प्रेरितो धमनीभिः शिराभिश्च शुक्रस्य स्थानं सकलं शरीरं गत्वा शरीरारंभकेन शुक्रेण सह मिश्रि-
तो भवति ततः शुक्रस्याग्निना पुनः पच्यते पच्यमाने तस्मिन्मलो नास्ति सहस्रधाध्मातसुव-

उक्तं च स्वाग्निभिः पच्यमानेषु मलः षट्सु रसादिषु न शुक्रे पच्यमानेऽपि हेमनीवाक्षये मलः अन्य-
च्च स्वाग्निभिः पच्यमानेषु मज्जांतेषु रसादिषु षट्सु धातुषु जायंते मलानि मुनयो जगुः यथा स-
हस्रधाध्मातेन मलं किल कांचनेन तथा रसेषु तु पिवेन मलं शुक्रे तां गते ततः सारभूतस्य रसस्-
स्य शुक्रस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मः स्नेहभागश्चौजः तस्य लक्षणमाह
ओजः सर्वशरीरस्थं स्निग्धं शीतं स्थिरं सितं सोमात्मकं शरीरस्य बलपुष्टिकरं मतं बलं चेष्टाप्रा-
टवं तथा च चेष्टासु पाटवं यत्तु बलं तदभिधीयते इति यत्तु सुश्रुते रसादीनां शुक्रांतानां धातू-
नां यत्परं तेजस्तत्खल्वोजस्तदेव बलमिति तेजस्तेज एव अत्रायमभिप्रायः यस्माद्रसा-
दोजो भवति स रसः सर्वधातुस्थानगतत्वात्तत्तद्धातुवन्न्यनत इति सर्वधातूनां स्नेहमोजः क्षी-
रे घृतमिव तदेव बलमिति तत्कार्यकारणयोरभेदोपचारात् अभेदकथनं च चिकित्सैवार्थं
अन्यच्च गुरु शीतं मृदु स्निग्धं सांद्रं स्वादु स्थिरं तथा प्रसन्नं पिच्छिलं सूक्ष्ममोजो दशगुणं स्मृतं

भावप्र० ३०

जीर्

चरके तु अष्टबिंदुप्रमाणं तदीषद्रक्तं सपीतकं अग्निषोमात्मकत्वेनाद्विरूपं वर्णितं तु तत् वाग्भटेन ×
ओजस्तु तेजो धातूनां शुक्रांतानां परं स्मृतं हृदयस्थमपि व्यापि देहस्थितिनिबंधनं यस्य प्रवृद्धौ देहस्य
तुष्टिपुष्टिबलोदयाः यन्नाशे नियतो नाशो यस्मिं तिष्ठति जीवनं निःपद्यंते यतो भावा विविधा देहसंश्रयाः
उत्साहप्रतिभाधैर्यलावण्यसुकुमारता ततः स्थूलो भागो रसो मासेन पुंसां शुक्रं स्त्रीणां आर्त्तवं शुक्रं च भ
वतः उक्तं च सुश्रुते एवं मासेन रसः शुक्रीभवति स्त्रीणां चार्त्तवं च भवतीति स्त्रीणां चेति चकारात् स्त्रीणाम
पि शुक्रं भवति अत एवोक्तं सुश्रुते योषितोपि स्रवत्येव शुक्रं पुंसः समागमे तन्न गर्भस्य किंचित्तु करोतीति ८
न स्त्रियते गर्भस्य शुद्धस्य विकृतस्य तु गर्भस्य कारणं तदपि भवति तत्र उक्तं च यदा नार्यौ उपेयातां वृ
षस्यंदौ कथंचन मुंचतः शुक्रमन्योन्यमनस्थिस्तत्र जायते इति एतेन स्त्रीणां सप्तमो धातुरार्त्तवं शु
क्रमष्टम इति केचित् आशयाद्यापित्ववत् स्त्रीणां गर्भोपयोगी स्यादार्त्तवं सर्वसंमतं तासामपि बलं
वर्णं शुक्रं पुष्टिं करोति हि एवं रस एव केदारीकुल्यान्यायेन सर्वधातून् पूरयन् मासेन नवदंडो
त्तरेण शुक्रमार्त्तवं च भवति इति सिद्धांतः एवं सति रसाद्रक्तमिति संगतमेव रक्तं ततो मांसं ततो रक्तात्

शिव ३०

शरीरारंभकं रक्तं पोषयन् व्यानवायुना प्रेरितो धमनीभिः संचरन् सकलशरीरगतानि रुधिराणि पुष्णा
ति ततः स्थूलो भागो व्यानवायुना प्रेरितो धमनीभिः शिराभिश्च शरीरारंभकानि मांसानि याति ततो
मांसाग्निना पुनः पच्यमानः पंचाहोरात्रात् सार्द्धदंडचयावन्मांसे स्थवतिष्ठति ततः पच्यमाना
त्तस्मात् मलं निर्गच्छति तत् व्यानवायुनाक्षिप्तं सत् कर्णावागयकर्णं विद्रवति ततः सारभूतस्य ८
रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च ततः सूक्ष्मो भागो मांसानि पुष्णाति ततः स्थूलो भागोपि व्या
नवायुना प्रेरितो धमनीभिः शरीरारंभकस्य मेदसः स्थानमुदरं याति ततो मेदसोऽग्निना पुनः
पच्यमानः पंचाहोरात्रात् सार्द्धदंडत्रयावत् मेदस्यवतिष्ठति ततः पच्यमानात्तस्मान्मलो नि
र्गच्छति प्रस्वेदरूपः स च शीतः स्रोतःस्थवतिष्ठति शरीरे प्राणानि तत्र श्रोतदा व्यानवायुना प्रेरितः
शिरामार्गैर्लोमकूपेभ्यो बहिर्याति जिह्वादंतकक्षामेढ्रादिमलं च मेदोमलमित्येके ततः सारभूतस्य र
सस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मो भागो मेदः पुष्णाति उदरे तिष्ठन् व्यानवायुना प्रेरि
तः स्रोतोमार्गैः सूक्ष्मास्थिस्थितान्यपि मेदांसि पुष्णाति

भावप्र० ३१

ध्वंकीता स्पर्शादयः स्वप्रभावाधिक्यात् शुक्रं विरेचयंति द्रव्यक्षीरादयः स्वगुणाधिक्यात् स्निग्धत्वाद्याधिक्या
त् माषादयः स्वप्रभावस्निग्धत्वादिगुणाधिक्यात् वाजीकरणपद इति वक्तव्ये न माधुर्यानुवर्तनं तेन
वल्यवृंहणजीवनीयगणादयस्तद्वद्बोधव्याः वि[illegible]रेचयंति प्रभावगुणाधिक्यात् शीघ्रमेव रसा
द्युत्पादनपूर्वकं शुक्रं जनयित्वा प्रवर्तयंति यतआह दुग्धं माषाश्च भल्लातकफलमज्जामलकानि
जनकानि निगद्यंते रेचकानि च रेतसः ननु बालानां कथं शुक्रं न दृश्यते इत्यत आह बालानां शुक्रमस्त्ये
व किंतु सौक्ष्म्यान्न दृश्यते पुष्पाणां मुकुले गंधो यथा सन्नपि नाप्यते तेषां तदेव तारुण्ये पुष्टत्वात्
व्यक्तिमेति हि कुसुमानां प्रफुल्लानां गंधः प्रादुर्भवेद्यथा रोमराज्यादयः पुंसां नारीणामपि यौवने
जायते न त्वयो भेदो ज्ञेयो व्याख्यानतः सरस व्याख्यानं च यथा पुंसां रोमराजीश्मश्रुप्रभृतयः नारी
णां तु रोमराजीस्तनस्तन्यार्तवप्रभृतयः ननु अन्नरसोपरसस्य धातुवृद्धिं कथं न करोतीत्यत आह न
नु बाल्ये वृद्धे च वर्धमानेन वायुना रससंशोषणात् न तथा धातुवृद्धिः स्यात् ततस्तत्रानिलं जयेत् अथ
शुक्रस्य स्वरूपमाह शुक्रं सौम्यं सितं स्निग्धं बलपुष्टिकरं स्मृतं गर्भबीजं वपुःसारो जीवस्याश्र शिव. ३१

य उत्तमः यतआह जीवो वसति सर्वस्मिन्देहे तत्र विशेषतः वीर्ये रक्ते मले यस्मिन्क्षीणे यातिक्षयं
क्षणात् अथ गर्भसंजननयोग्यस्य शुक्रस्य लक्षणमाह स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगंधि शुक्राभं
च शुक्रमिच्छंति केचित्तु तैलक्षौ[illegible]द्रनिभं वदेत् अथ शुक्रस्य स्थानमाह यथा पयसि सर्पिस्तु गूढश्चे
क्षौ रसो यथा एवं हि सकले काले शुक्रं तिष्ठति देहिनां अत्र सर्पिर्दृष्टांतो बहुतरशुक्रेऽल्पमथनेन न
सर्पिः शुक्रयोर्लब्धात् इक्षुरसदृष्टांतस्तु स्वल्पशुक्रे पुंसि अतिपीडनेनेक्षुरसशुक्रयोर्लाभात् ॥
अथ शुक्रस्य क्षरण(मार्ग)माह द्व्यंगुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः मूत्रस्रोतः पथं शुक्रं पुरु
षस्य प्रवर्तते वृद्धवाग्भटोप्याह सप्तमी शुक्रधरा द्व्यंगुले दक्षिणे वस्तिद्वारस्य चाप्यधो मूत्र पार्श्वे४
मार्गमाश्रिता सकलशरीरव्यापिनी शुक्रं प्रवर्तयतीति सप्तमी कला अथ शुक्रस्य क्षरणकारणमाह
कृत्स्नदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा स्त्रीषु व्यायच्छतश्चापि हर्षात्तत्संप्रवर्तते स्त्रीषु व्यायच्छ
तः स्त्रीषु सुरतरूपं व्यायामं कुर्वतः अत्रान्यत्र शुक्रं कामेन कामिन्या दर्शनात्स्पर्शनादपि श

स्रोतोभिः स्पंदते देहः छ्मनी शुक्रवाहिभिः हर्षणे दीरितं रागात् संकल्पाच्च मनोभवात् वसौ संस्य निर्याति स्थूलाविम विबोदकमिति १

अर्ह स्रवेत् २

३२ भावप्र० द्रसंश्रवणाद्ध्यानात्संभोगाच्च प्रवर्तते अथार्तवस्य स्वरूपमाह स्त्रीणां रस एव मासेनार्तवं भवतीत्यु
क्तं पुनराह सुश्रुत एव रसादेव रजः स्त्रीणां मासि मासि ध्रुवं भवेत् तद्वर्षाद्द्वादशादूर्ध्वं याति पंचाशतः क्षयं
मासेनोपचितं काले धमनीभ्यां तदार्तवं ईषत्कृष्णं विवर्णं च वायुर्योनिमुखं नयेत् गर्भग्रहणयोग्यस्यार्तवस्य व २
लक्षणमाह शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमं तदार्तवं प्रशंसंति यद्वासो न विरंजयेत् आर्तव
स्य वर्णद्वयाभिधानं वातादिप्रकृतिभेदेन वर्णभेदात् यद्वासो न विरंजयेत् यद्वासो लग्नं प्रक्षालितं सत्
सस्य जति न तु विकृततरं कुर्यात् ऋतुस्त्रीणां रजोदर्शनात् षोडशनिशास्तत्र भवमार्तवं गृहीतगर्भा
णां स्त्रीणामार्तववहानां स्रोतसां गर्भेणावरोधादार्तवं न स्रवति किंतु तदेवाधः प्रतिहतमूर्द्ध्वमागत
मुपचीयमानमपराभवति अपरानाम इति लोके शेषं चोर्द्ध्वतरमागतं पयोधरौ याति तस्मात्पीनोन्नतपी
पानादि ४ नोन्नायत पयोधरा भवंति अथ धातुव्यतिरिक्तान् गुणानाह अतिरिक्ता गुणा रक्ते चेहू मांसे तु पार्थिवाः
मेदस्यपांभुवः छिः २ मेदस्यपि भुवस्त्वस्थ्नि पृथिव्यनिलतेजसां मज्ज्ञि शुक्रे च सौम्यस्य मत्रैव शिखिनो गुणाः भुवस्तोयात्तथैव
ग्नेः रसे क्षीरे तथांभसः अथ धातूनां मलाः कफः पित्तं मलाः खेषु प्रस्वेदो नखरोमच नेत्रविट् त्वक्षु च स्नेहो

शिव ३२

अधिकान् ३

आहारोऽन्यत्तयोऽस्थ्युरसहभुपगच्छति शोणितं तृतीये त्रिचतुर्थे मांसतां पंचमे मेदरत्वं षष्ठे कीकसत्वं तु सप्तमे मज्जतां शुक्रतां याति नियमादष्टमे
दिने ततो ति पथ्यापथ्याभ्यामातराभ्यां ध्रुवं संग्रहात्रेण षट्प्रदृश्यंति धातवः ५

एतेरनंतरं मांसं जायते रसादेवेत्यर्थः मांसान्मेदः प्रजायते इति मांसादनंतरं मेदः प्रजायते रसादेवेत्य
र्थः मेदसोऽस्थि मेदसोऽनंतरमस्थि जायते रसादेवेत्यर्थः एवं ततो मज्जा मज्ज्ञः शुक्रस्य संभवः इत्य
र्थः रसः शरीरे त्रिधा संचरति तथा चोक्तं रसः शरीरे शब्दार्चिर्जलसंतानवत्त्रिधा संचरत्यनुरूपाय
नियमेवहि देहिनां अस्यायमभिप्रायः पुरुषास्तीक्ष्णाग्नयो मध्यमाग्नयो मंदाग्नयश्च भवंति ×
तत्र तीक्ष्णाग्नीनां रसः शब्दसंतानवच्छीघ्रं संचरति मध्यमाग्नीनामर्चिःसंतानवन्मध्यवेगेन रसः ×
संचरति मंदाग्नीनां जलसंतानवन्मंदरसः संचरति तेन मासेन रसः शुक्रं भवतीति यदुक्तं तन्मध्यमा
ग्नीनधिकृत्योक्तं दीप्ताग्नीनां तु रसः किंचिन्न्यूनेन मासेन शुक्रं भवति मंदाग्नेः किंचिदधिकेन मासेने
ति सिद्धांतः तर्हि वाजीकरणीनामौषधीनां किं प्रयोजनमित्याह वाजीकरणमौषधस्य प्रभावगु
णेन स्यात् विरेचयंति ताः शुक्रं विरेकि द्रव्यवल्लक्षणं वाजीकरणप्रभाविरौषधीभिः पुरुषः शुक्राधिक्या
त्स्त्रीषु वाजीवत्सामर्थ्यं प्राप्नोतीति वाजीकरणः स्वभावगुणेन स्यात् तत्र काश्चिदौषध्यः स्वप्रभा
वाधिक्यात् काश्चित् स्वगुणाधिक्यात् काश्चित्स्वप्रभावगुणाधिक्यात् तत्र संकल्पपादलेप विशि

यास्त्रयः जरागर्भाशयः प्रोक्ताः पित्तपक्वाशयांतरे स्तनौ प्रसिद्धौ तावेव चतुर्थस्तन्याशयौ मतौ अथ कला॰
स्वरूपमाह स्नायुभिस्तु प्रतिच्छन्नान्संततांश्च जरायुणा श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु
तान्विदुः तथा च सुश्रुते कलाः काष्ठादिसारवत् यथा हि सारः काष्ठेषु छिद्यमानेषु दृश्यते तथा कला हि
मांसेषु छिद्यमानेषु दृश्यते कला धात्वाशयांतरमर्यादा धात्वाशयांतरे धातोः यः क्लेदस्त्वभितिष्ठति
देहोष्मणा विपक्वश्च सा कलेत्यभिधीयते ताः सप्त आद्या मांसधरा नाम द्वितीया रक्तधारिणी मेदोध
रा तृतीया तु चतुर्थी श्लेष्मधारिणी पंचमी तु मलधरा षष्ठी पित्तधरा मता रेतोधरा सप्तमी स्यादिति सप्त
कलाः स्मृताः अथ मर्माणि सन्निपातः शिरास्नायुसंधिमांसास्थिसंभवः मर्माणि तेषु तिष्ठंति प्रा॰
णाः खलु विशेषतः सप्तोत्तरशतं संति देहे मर्माणि देहिनां तान्येकादश मांसे स्युरष्टावस्थिषु सं
त्ति हि संधीनां विंशतिस्तानि स्नायूनां सप्तविंशतिः चत्वारिंशत्तथैकं च शिरामर्माणि तत्र तु द्वात्रिं॰
शतिः शक्थियुगे तावंत्येव भुजद्वये द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश ग्रीवाया ऊर्ध्वभागे तु स
प्तत्रिंशन्मतानि हि मर्माणि हतानि संति पंचधा भवंति तद्यथा सद्यःप्राणहराणि स्युर्मर्माण्येकोनविं

शतिः मर्मदेशास्त्रयस्त्रिंशत्स्युः कालांतरमारकाः चत्वारिंशच्च चत्वारि वैकल्यं जनयंति हि मर्माष्टकं रुजाकारि
त्रीणिमर्माणि २ विशल्यघ्नं त्रिकं मतं तद्यथा शृंगाटकान्यधिपतिः शंखौ कंठशिराः गुदं हृदयं वस्तिनाभ्यौ च सद्योघ्नं
ति हतानि चेत् शृंगाटकानि घ्राणश्रोत्राक्षिजिह्वासंतर्पणीनां शिरामुखानां शिरसो मध्ये संयोगस्थानं
तानि चत्वारि शिरामर्माणि चतुरंगुलप्रमाणानि हतानि तैः सद्योमारकाणि अधिपतिः मस्तकस्या
२५ भ्यंतरे संधिशिरयोः सन्निपाते उपरिष्टाद्रोमावर्तः स एकः संधिमर्मेदमर्धांगुलप्रमाणं सद्योमारकं शं
खौ भ्रुवोरंतौ परिकर्णे ललाटमध्ये तौ द्वौ अस्थिमर्मणी अर्धांगुले सद्योमारके कंठशिराः मातृका॰
ग्रीवाया उभयपार्श्वयोश्चतस्रश्चतस्रः शिरास्ता अष्टौ शिरामर्माणि चतुरंगुलानि सद्योमारकाणि
गुदं प्रसिद्धमेकं मांसमर्म चतुरंगुलं सद्योमारकं हृदयं स्तनयोर्मध्यमामाशयद्वारमेकं शिरामर्म चतु
रंगुलं सद्योमारकं वस्तिः नाभिपृष्ठकटीमुष्कगुदवंक्षणशेफसां मध्ये वस्तिः तनुत्वगेक एकद्वारोऽधो
मुखः स्नायुमर्मेदं चतुरंगुलं सद्योमारकं नाभिः प्रसिद्धा शिरामर्मेदं चतुरंगुलं सद्योमारकं वक्षोमर्मा योद्धिः २
णि सीमंतास्तलक्षिप्रं इंद्रवस्तयः बृहत्यौ पार्श्वजौ संधी कटीकतरुणे ये नितंबावपि ति चैतानि कालांतर

भावप्र० ३४

यार

हृदयाणि तु वक्षोमर्माणि स्तनमूलस्तनरोहितापलापापस्तंभाः स्तनमूले स्तनयोरधस्ताद्द्व्यंगुले याव
त् द्वे शिरामर्मणी द्व्यंगुले कफपूर्णकोष्ठतया कालांतरमारके। स्तनरोहिते स्तनयोरुपरि द्व्यंगुले या
वत् द्वे मांसमर्मणी रक्तपूरितकोष्ठतया कालांतरमारके। अपलापौ अंसकूटयोरधस्तात्पार्श्वयोरु
परि द्वे शिरामर्मणी अर्द्धांगुले रक्तेन पूयतां गतेन कालांतरमारकौ। अपस्तंभौ उरस उभयतो नाड्यौ य४
वातवहे शिरामर्मणी अर्द्धांगुले वातपूर्णकोष्ठतया काशश्वासाभ्यां च कालांतरमारके। सीमंताः
सिरसि पंचसंधयः संधिमर्माणि चतुरंगुलानि उन्मादभयचित्तनाशैः कालांतरमारकाः। तलानि मध्यां
गुलिमनुक्रम्य हस्तस्य मध्ये तलं एवमपरस्य हस्तस्य पादयोश्च चत्वारि तलानि मांसमर्माणि अर्द्धां
गुलानि रुजाभिः कालांतरमारकाणि। क्षिप्राणि अंगुष्ठांगुल्योर्मध्ये क्षिप्रं तत्र हस्तद्वयो द्वे पादयो द्वे
एवं चत्वारि स्नायुमर्माण्यर्द्धांगुलान्याक्षेपकेण कालांतरमारकाणि। इंद्रवस्तयः प्रकोष्ठयोर्मध्ये
द्वे जंघयोर्मध्ये द्वे एवं चत्वारो मांसमर्माणि द्व्यंगुलानि शोणितक्षयेन कालांतरमारकाः। वृहत्यौ
स्तनमूलादुभयतः पृष्ठमूलं यावत् सिरामर्मणी अर्द्धांगुले शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैः॥ शिव ३४

द्यो धातूनां क्रमशो मलाः। नेत्रजिह्वाकपोलानां जलं पित्तं रसजं मलं इत्येके खेषु मलाः कर्णादिश्रोतस्सु मलाः
रसनादंतकक्षामेढ्रादिमलमपि मेदोमलमित्येके। नेत्रविट् त्वचां स्नेह ओजस्तु मलाः शुक्रस्य मलमेव
नास्ति सत्त्वस्य धातुसुवर्णस्येव। अथोपधातवः। वनितानां प्रसूतानां धमनीभ्यां स्तनौ गतात् रसा
देव हि जायेत स्तन्यं स्तनयुगाशयं शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता मेदसः स्वाप्यमानस्य
स्नेहो व्याकथिता वसा। शार्ङ्गधरे तु स्तन्यं रजो वसा स्वेदो दंताः केशास्तथैव च ओजश्च सप्त धातूनां
क्रमात्सप्तोपधातवः। अथाशयाः। उरो रक्ताशयस्तस्मादधः श्लेष्माशयः स्मृतः। आमाशयस्तु तदधः
स्तल्लिंगं चरकोवदत्। तद्यथा। नाभिस्तनांतरं जंतोराहुरामाशयं बुधाः इति। आमाशयादधः पक्वाश
यादूर्ध्वे तु या कला ग्रहणी नामिका सैव कथितः पाचकाशयः। ऊर्ध्वमग्न्याशयो नाभेर्मध्यभागे व्य
वस्थितः। तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः। पक्वाशयस्तु तदधः स एव तु मलाशयः। तदधः कथि
तो वस्तिः स हि मूत्राशयो मतः। आशयानुक्रमस्तु वाग्भटेनोक्तः। स यथा। आशयाः सप्त विज्ञेयाः रक्तस्या
धः क्रमात्परे कफामपित्तपक्वानां वायोर्मलमूत्रयोरिति। पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशया

मा०प्र०
३५

गुल्फयोर्मध्ये तयोरूर्ध्वमधश्च एवं चत्वारः स्नायुमर्माणि वैकल्यकरास्तत्र पादयोर्भ्रमणं वेपनं भवतः विटपे
द्वे वंक्षणवृषणयोर्मध्ये स्नायुमर्मणी एकांगुले वैकल्यकरे तत्र षाण्ढ्यमल्पशुक्रता वा कूर्परौ कूर्परानौ
द्वौ संधिमर्मणी त्र्यंगुलौ वैकल्यकरौ तत्र बाहुमध्यसंकोचः कुकुंदरे नितंबकूपकौ द्वौ संधिमर्मणी अर्द्धां-
गुले वैकल्यकरे तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च कक्षाधरे वक्षःकक्षयोर्मध्ये द्वे स्नायुमर्मणी ए-
कांगुले वैकल्यकरे तत्र पक्षाघातः विधुरे कर्णपृष्ठतोऽधः संश्रिते किंचिन्निम्नाकारे द्वे स्नायुमर्मणी अ-
र्द्धांगुले वैकल्यकरे तत्र बाधिर्यं कृकाटिके शिरोग्रीवयोरुभयतः संधी द्वे संधिमर्मणी अर्द्धांगुले वैकल्यक-
रे तत्र शिरःकंपः अंसौ स्कंधौ स्नायुमर्मणी अर्द्धांगुलौ वैकल्यकरौ तत्र बाहुस्तंभः अंसफलके पृष्ठोपरि पृष्ठवंशमु-
भयतस्त्रिकसंबंधे ग्रीवायाश्चांसद्वयस्य च संयोगो यत्र तत्त्रिकं अस्थिमर्मणी अर्द्धांगुले वैकल्यकरे तत्र बाह्वोः
शून्यता शोषश्च अपांगौ नेत्रयोरंतौ शिरामर्मणी अर्द्धांगुलौ वैकल्यकरौ तत्रांध्यं दृष्ट्युपघातो वा नी-
ऊतिद्धिः२ ले मन्ये च कंठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे मन्ये तत्र एका नीला एका मन्या एकस्मिन्पा-
र्श्वे अन्या नीला अन्या मन्या अपरस्मिन्पार्श्वे द्वे द्वे शिरामर्मणी चतुरंगुले वैकल्यकरे तत्र मूकता विकृता शिव
३५

स्वरत्ताऽरसग्राहिता च फणे घ्राणमार्गमुभयतोऽभ्यंतरे शिरामर्मणी अर्द्धांगुले वैकल्यकरे तत्र
गंधाज्ञानं आवर्तौ भ्रुवोरुपरि निम्नयोः संधिमर्मणी अर्द्धांगुलौ वैकल्यकरौ तत्रांध्यं दृष्ट्युप-
घातो वा गुल्फौ द्वौ मणिबंधौ द्वौ तथा कूर्चशिरांसि च रुजाकराणि जानीयाद्दशैतानि बुद्धि- ×
मान् गुल्फौ घुटिके संधिमर्मणी त्र्यंगुले रुजाकरे तत्र रुजा पादस्तंभः खंजता वा मणिबंधौ ×
हस्तप्रकोष्ठसंधी संधिमर्मणी त्र्यंगुलौ रुजाकरौ तत्र हस्तयोः क्रियाराहित्यं कूर्चशिरांसि गु- ×
ल्फसंधेरध उभयत एकस्मिन्पादे द्वे द्वे च द्वितीये एवं चत्वारि स्नायुमर्माण्येकांगुलानि रुजाकरा- ×
णि तत्र रुजा शोफश्च उत्क्षेपौ स्थापनी चैव विशल्यघ्नं त्रिकं मतं उत्क्षेपौ शंखयोरुपरि केशांता-
वत स्नायुमर्मणी अर्द्धांगुलौ तयोर्विद्धयोः सशल्यो जीवेत्पाकात्पतितशल्यो वा उद्धृतशल्य-
स्तु म्रियते अतएव विशल्यमुद्धृतशल्यं हंतीति विशल्यघ्नं मर्म स्थापनी एका भ्रुवोर्मध्ये सिरामर्मे-
दमर्द्धांगुलं विशल्यघ्नं सप्तरात्रांतरे हंतुः सद्यःप्राणहराणि कालांतरप्राणहरं पक्षे मासे
चे मारकं सद्यःप्राणहरं स्यांते विद्धं कालेन मारयेत् कालांतरप्राणहरमंते विद्धं तु दुःखदं॥०॥

अंते मर्मसमीपे मर्मण्यपधिघाय तु ये विकारा मूर्छंति काये विविधा नराणां प्रायेण ते कृछ्रतमा भ-
वंति वैद्येन यत्नैरपि साध्यमानाः अथ संधयः ते द्विविधाः चेष्टावंतः स्थिराश्च शाखासु हन्वोः
कट्यां च चेष्टावंतो भवंति हि शेषास्तु संधयः सर्वे स्थिराः स्तैरुदाहृताः कथिता देहिनां देहे
संधयो द्वे शते दश शाखासु तेऽष्टषष्टिश्च कोष्ठे सैकोनषष्टिकाः ग्रीवायाः ऊर्ध्वदेशे तु त्र्यशीतिर-
स्ते प्रकीर्तिताः प्रथमं परिगण्यंते तेषु शाखागतास्तु एकैकस्यां तु पादांगुल्यां त्रयस्त्रयो द्वावंगुष्ठे
ते च चतुर्दश गुल्फजानुवंक्षणेष्वेकैक एवं सप्तदशैकस्मिन्सक्थिनि भवंति एतेनेतर सक्थिबाहू
च व्याख्यातौ एवमष्टषष्टिः शाखासु अथ कोष्ठगतानाह त्रयः कटीकपालेषु चतुर्विंशतिः पृष्ठवंशे
तावंत एव पार्श्वयोरष्टावुरसि एवमेकोनषष्टिः कोष्ठे अथ ग्रीवोर्ध्वगतानाह अष्टौ ग्रीवायां त्रयः
कण्ठनाडीषु हृदयक्लोमफुप्फुसनिबद्धाः अष्टादश द्वात्रिंशद्दंतमूले एकैकः कण्ठमेकोनासा-
यां चैकैकः द्वौ द्वौ वर्त्ममंडलगण्डकर्णशंखेषु द्वौ हनुसंधौ द्वावुपरिष्टाद्भ्रुवोः शंखयोश्चापरिष्टात्

शिर
२५

कालांतरमारके पार्श्वसंधी जघनपार्श्वयोः संधी शिरामर्मणी अर्धांगुले शोणितपूर्णकोष्ठतया का-
लांतरमारके कटीकतरुणे त्रिकसन्निधाने उभयतः श्रोणिकांडलग्नी करुणास्थिनी अस्थिमर्म-
णी अर्धांगुले शोणितक्षयात् पांडुविवर्णरूपं कृत्वा कालांतरमारके नितंबौ प्रसिद्धौ द्वौ अ-
स्थिमर्मणी अर्धांगुलावधः कायशोषेण दौर्बल्येन च कालांतरमारकौ लोहिताक्षाणि जान्वूर्वीकूर्चविट-
पकूर्पराः ककुंदरे कक्षधरे विधुरे सकृकाटिके अंसांसफलके अपांगौ नीले मन्ये फणे तथा वैकल्यकार-
णान्याहुः आवर्तौ द्वौ तथैव च लोहिताक्षाणि ऊर्वोरूर्ध्वमधो वंक्षणसंधेर्लोहिताक्षं तत्र बाह्वोरूर्ध्वं
ऊर्वोरेवं तानि चत्वारि शिरामर्माण्यर्धांगुलानि वैकल्यकारणानि तत्र शोणितक्षयेन पक्षाघातः
सक्थिसादो वा आण्यः जानुन ऊर्ध्वमुभयोः पार्श्वयोस्त्र्यंगुला एकस्मिन् जानुनि द्वे अपरस्मिन् द्वे
एवं चतस्रः स्नायुमर्माण्यर्धांगुला वैकल्यकार्यस्तत्र शोथाभिवृद्धिः सक्थिस्तंभश्च जानुनी जंघो-
रोर्वोः संधी संधिमर्मणी त्र्यंगुले वैकल्यकरे तत्र खंजता ऊर्व्यः द्वे ऊर्वोर्मध्ये द्वे प्रगंडयोर्मध्ये एवं च-
तस्रः सिरामर्माण्येकांगुल्यो वैकल्यकर्यस्तत्र शोणितक्षयात् सक्थिशोषः कूर्चाः पादयोरंगुष्ठां-

सत्रपिंदु

भावप्र०
३७

राभिः प्रोच्यते सदा प्रणालिभिरिवारामः कुल्याभिः क्षेत्रधान्यवत् अत्र प्रणालिभिः कुल्याभि
रिति दृष्टान्तद्वयं स्थूलसूक्ष्मशिराभेदात् प्रसारणाकुञ्चनादिक्रियाभिः सततं ततो शिरा
एवोपकुर्वन्ति तास्तु सप्तशतानि तु यथा द्रुमदले साक्षाद्दृश्यन्ते प्रतताः शिराः तथैव देहिनां दे
हे वर्तन्ते सकले शिराः नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिरुपाश्रिता शिराभिरावृता ना
भिश्चक्रनाभिरिवारकैः ॥ तद्यथा तासां खलु मूलशिराश्चत्वारिंशत् तासां दश वातवहाः दश श्लेष्मवहाः
दश पित्तवहाः दश रक्तवहाः तासां खलु वातवहानां वातस्थानगतानां सपञ्चसप्ततिशतं १७५ भवति तावन्त एव पि
त्तवहाः पित्तस्थानगताः श्लेष्मवहाः श्लेष्मस्थानगताः रक्तवहाः यकृत्प्लीहगताः एवं शिराः सप्तशतानि भवन्ति
तत्र वातवहाः एकस्मिन् सक्थ्नि पञ्चविंशतिः एतेनेतरसक्थि बाहू च व्याख्यातौ विशेषतः कोष्ठे चतुस्त्रिं
चतुस्त्रिंशतानां शत् तासां श्रोण्यां गुदमेढ्राश्रिता अष्टौ द्वे द्वे पार्श्वयोः षट् पृष्ठे तावत्य उदरे दश वक्षसि एकचत्वारिंशद
मध्ये २ जत्रुण ऊर्ध्वं तासां चतुर्दश ग्रीवायां चतस्रः कर्णयोः नव जिह्वायां षट् नासिकायां अष्टौ नेत्रयोः एवं वातवहा शिव ३७

नां सपञ्चसप्ततिशतं भवति एष विभागः पित्तवहानामपि विशेषस्तु पित्तवहा नेत्रयोर्दश कर्णयोर्द्वे एवं
रक्तवहाः श्लेष्मवहास्तु षोडश ग्रीवायां कर्णयोर्द्वे एवं शिराणां सप्तशतानि व्याख्यातानि क्रियाणाम
प्रतिघातममोहं बुद्धिकर्मणां करोत्यन्यान् गुणांश्चापि स्वाः शिराः पवनश्चरन् क्रियाणां प्रसारणाकुं
चनादीनां अमोहं बुद्धिकर्मणां बुद्धीन्द्रियाणां मनसो बुद्धेश्च स्वे स्वे विषये अज्ञानं न करोतीत्यर्थः अ
न्यान् गुणान् रसादिव्यापनद्वारा शरीरपोषणादीन् यदा तु कुपितो वायुः स्वाः शिराः प्रतिपद्यते तदा
दीप्तिं करोती स्य विविधा रोगाः जायन्ते वातसंभवाः भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगतां करोत्यन्यान् गुणांश्चा
सर्वाः पि पित्तं भास्वच्छिराश्चरन् अरोगतां पैत्तिकरोगानुत्पत्तिं अन्यान् गुणान् मेधाबुद्धिदर्शनशक्त्यादीन्
यदा तु कुपितं पित्तं सेवते स्ववहाः शिराः तदास्य विविधा रोगा जायन्ते पित्तसंभवाः स्नेहमङ्गेषु संधीनां त
स्थैर्यं बलमरोगतां करोत्यन्यान् गुणानपि बलासः स्वाः शिराश्चरन् अरोगतां श्लैष्मिकरोगानुत्प
त्तिं अन्यान् गुणान् बलपुष्ट्यादीन् यदा तु कुपितः श्लेष्मा स्वाः शिराः प्रतिपद्यते तदास्य विविधा रोगाः

जायंते श्लेष्मसंभवाः धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयं स्वाः शिरासु चरद्रक्तं कुर्याच्चान्यान्गुणानपि
स्त्रस्यान्गुणान्बलपुष्ट्यादीन् यदा तु कुपितं रक्तं सेवते स्ववहाः शिराः तदास्य विविधा रोगा जायंते रक्तसंभ
वाः तत्रारुणा वातवहाः पूर्यंते वायुना शिराः पित्तादुष्णाश्च नीलाश्च शीता गौर्यः स्थिराः कफात् अ गौर्यः
स्रक्वहास्तु तारक्ताः स्युश्च नात्युष्णशीतलाः ~~अथ स्नायवः~~ तत्र स्नायोः स्वरूपमाह मेदसः स्नेहमा
दाय शिरास्नायुत्वमाप्नुयात् शिराणां तु मृदुः पाकः स्नायूनां तु ततः खरः ॥ तीक्ष्णः ॥ स्नायवो बंधनानि स्युर्देहे मांस
सास्थि~~०~~मेदसां संधीनामपि यतास्तु शिराभ्यः सुदृढाः स्मृताः नौर्यथा फलकास्तीर्णा बंधनैर्बहुभिर्युता निर
युक्ता गाधसलिले भवेद्भारसहा भृशं एवमेव शरीरेस्मिन् यावंतः संधयः स्मृताः स्नायुभिर्बहुभिर्बद्धास्तेन
भारसहा नराः फलकैः काष्ठपट्टैः आस्तीर्णा व्याप्ता शतानि नव जायंते शरीरे स्नायवो नृणां तासां वि
वरणं ब्रूमः शिष्याः शृणुत यत्नतः शाखासु षट्शतानि स्युः कोष्ठे त्रिंशच्छतद्वयं ग्रीवायाश्चोर्द्ध्वदेशे तु स्नायूनां
सप्ततिः स्मृताः तत्र शाखागतान्याह एकैकस्यां पादांगुल्यां षट्षट् तास्त्रिंशत् तावंत्य एव तलकूर्चेषु तावंत्य

पंचशीर्षकपालेष्वेको मूर्द्धि इति कण्ठमण्यां घंटिकेति प्रसिद्धः एते संधयोष्टविधा भवंति ते
यथा कोरोलूखलसामुद्गाः प्रतरस्तून्नसेवनी' काकतुंडं मंडलं च शंखावर्तोऽष्टसंधयः कोरो
गर्तः कलिकेत्यन्ये उलूखलं प्रसिद्धः समुद्गः संपुटः समुद्ग एव सामुद्गः अवस्थाप्येऽण प्रतरं
यनेनेति प्रतरो वेलकः तून्नस्य तुन्नीरस्य सेवनी स्यूतिस्तून्नसेवनी काकतुंडं काकमुखं मंडलं
प्रसिद्धं शंखस्यावर्तः शंखावर्तः एते यथा नामाकृतयः संधयो भवंती ~~तदर्थः~~ एषामंगुलीमणि
बंधगुल्फजानुकूर्परेषु कोराः संधयः कक्षावंक्षणदंतेषु उलूखलाः अंसपीठगुदभगनितं
बेषु सामुद्गाः ग्रीवायां पृष्ठवंशयोः प्रतराः शिरःकटीकपालेषु तुन्नसेवन्यः हन्वोरुभयतः काकतुं
डाख्याः कण्ठहृदयक्लोमनाडीषु मंडलाख्याः श्रोत्रशृंगाटकेषु शंखावर्ताः अस्थ्नां तु संधयोऽ
ते केवलाः समुदाहृताः पेशीस्नायुशिराणां तु संधिसंख्या न विद्यते अथ शिराः संधिबंधनका
रिण्यो दोषधातुवहाः शिराः नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समंततः शरीरं सकलं सेतासि

भावप्र०
३८

तासांमध्ये द्वे द्वे वातपित्तकफशोणितरसान्वहतः ताः दश द्वे अन्नवहे अम्बुवहे आश्रिते द्वे तोयवहे द्वे वस्तिंगते
मूत्रवहे द्वे शुक्रस्य प्रादुर्भावाय द्वे तद्विसर्गाय ते एव नारीणामार्तवप्रादुर्भावाय तद्विसृजतः द्वे स्थू
लांत्रप्रतिबद्धे पुरीषं विसृजतः अष्टावन्यास्तिर्यग्गताः स्वेदमर्पयंति एता अत्रिंशत् एताभिरधो
गामिभिः पक्वाशयकटीमूत्रपुरीषवस्तिगुदमेढ्रसक्थीनि धार्यंते याप्यंते च तिर्यग्गतानां तु चतसृ
णामेकैकस्याः शतधा सहस्रधा चोत्तरोत्तरं विभज्यंते तास्त्वसंख्येयाः ताभिरिदं शरीरं गवाक्षितं
विबद्धमाततं च गवाक्षितं गवाक्षाकारैश्छिद्रैर्युक्तं कृतमित्यर्थः तासां मुखानि रोमलग्नानि
शांतरक्षि ६ यैर्मुखैः स्वेदं स्रवंति रसं चापि संतर्पयंत्यंतर्बहिश्च तैरेवाभ्यंगपरिषेकावगाहनालेपनवीर्या
णि त्वचि विपक्वान्यंतः प्रवेशयंति तैरेव स्पर्शं शुभमशुभं वा गृह्णंति यथा स्वभावतः खानि मृणालेषु
विशेषु च धमनीनां तथा खानि रसो यैरभितश्चरेत् पंचाभिभूतास्त्वथ पंचकृत्वः पंचेंद्रियं पंच
सु भावयंति पंचेंद्रियं पंचसु भावयित्वा पंचत्वमायांति विनाशकाले अस्यायमर्थः धमन्यः कथंभू

शिव
३८

पंचेंद्रियं पंचेंद्रियाणि पंचेंद्रियाणां मनः

ताः पंचाभिभूताः पंचभ्यः आकाशादिमहाभूतेभ्यः अभिसंभूतात् नृता उभयात्मकं मनश्च यस्यां तं पंचेन्द्रि
यं जीवात्मानं पंचसु इंद्रियाधिष्ठानेषु श्रोत्रादिषु पंचकृत्वः पंचवारान् पर्यायेण नत्वेकदैव भावयंति
प्रापयंति पंचेंद्रियं पंचानामिंद्रियाणां समाहारः पंचेंद्रियं श्रोत्रादि तदुपलक्षितं कर्मेंद्रियं मनश्च पंच
सु शब्दादिषु बुद्धींद्रियविषयेषु तदुपलक्षितेषु हस्तादिव्यापारेषु कर्मेंद्रियविषयेषु मंतव्ये मनो
विषये च भावयित्वा प्रापय्य संयोज्येति यावत् विनाशकाले पंचत्वं आकाशादिभावं आयांति प्रा
प्नुवंतीत्यर्थः अथ कंडराः महत्यः स्नायवः प्रोक्ताः कंडरास्तास्तु षोडश प्रसारणाकुंचनयो
र्दृष्टं तासां प्रयोजनं चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः ग्रीवायामपि तावत्यस्तावत्यः
पृष्ठसंगताः तत्र पादहस्तगतानां कंडराणां नखाः प्ररोहाः ग्रीवानिबंधिनीनामधोभागगतानां प्ररो
हो मेढ्रं पृष्ठनिबद्धानां प्ररोहा नितंबमूर्द्धोरुवक्षोंऽसस्तनपिंडाः अथ रंध्राणि नेत्रश्रवणना
सानां द्वे द्वे रंध्रे प्रकीर्तिते मुखमेहनपायूनामेकैकं रंध्रमुच्यते दशमं मस्तके प्रोक्तं रंध्राणीति नृणां विदुः स्त्री

एषामन्यानि चत्वारि स्तनयोर्गर्भवर्त्मनि अथ स्रोतांसि मनःप्राणान्नपानीय दोषधातूपधातवः धातूनां च
मलामूत्रं मलमित्यादयस्तु ते संचरन्ति ये मार्गैस्तानि स्रोतांसि संजगुः बहूनि तानि संख्याय प्रशक्यन्ते नैव भा
षितुं अथ जालानि निरंतररंध्रनिकरकलितानि समूहितानि च जालानीव जालानि जालानि तु शिरास्ना
युमांसास्थ्नामुद्भवन्ति हि तानि चत्वारि चत्वारि सर्वाण्येव तु षोडश तानि मणिबंधगुल्फसंश्रितानि परस्प
रनिबद्धानि परस्परसमाश्लिष्टानि परस्परगवाक्षितानि चेति यैर्गवाक्षितमिदं शरीरं अथ मर्थः॥
एकस्मिन्मणिबंधे एकं जालं शिरायाः अपरं स्नायोस्तृतीयं मांसस्य चतुर्थमस्थ्नः एवं चत्वारि जालानि ए
तेनैतरमणिबंधगुल्फौ च व्याख्यातौ गवाक्षितं विरचितं निरंतरजालाकाररंध्रनिकरपरिकलितमित्यर्थः
अथ कूर्चाः कूर्चाः स्युः षट् तेषां द्वौ तु तावन्तौ पादयोरपि ग्रीवायामेक एकस्तु मेढ्रे सर्वेऽपि बद्धाः स्मृताः कूर्चा
अपि शिरास्नायुमांसास्थिप्रभवाः स्मृताः अथ रज्जवः पृष्ठवंशस्योभयतश्च महत्यो मांसरज्जवः चतस्रो मां
सपेशीनां बंधनं तत्प्रयोजनं अथ सेवन्यः सेवन्यः सप्त तासां तु भवेयुः पंच मस्तके एका शेफसि जिह्वायामे

एवं जंघायां दश जानुनि चत्वारिंशद् ऊरौ दश वंक्षणे एवं सार्द्धशतमेकस्मिन्सक्थिनि भवंति एतेनैवेतर
सक्थिबाहू च व्याख्यातौ अथ कोष्ठगताः प्राह बहिः कट्यां तावत्यः पार्श्वयोः अशीतिः पृष्ठे त्रिंशदुरसि॥
अथ ग्रीवोर्द्ध्वगताः प्राह षट्त्रिंशत् ग्रीवायां चतुस्त्रिंशन्मूर्द्ध्नि एवं स्नायूनां नवशतानि भवंति अथ धम
न्यः धमन्यो नाभितो जाताः चतुर्विंशतिसंख्यया दशोर्द्ध्वगा दशाधोगाः शेषास्तिर्यक्चराः स्मृताः॥
ते चोर्द्ध्वगाः शब्दस्पर्शरूपरसगंधप्रश्वासोच्छ्वासजृंभितक्षुत्हसितकथितरुदितगीतादिविशेषान
भिवहंत्यः शरीरं धारयंतीति प्रश्वासः अंतःप्रविशन्वायुः उच्छ्वासः ऊर्द्ध्वं गच्छन्वायुः तास्तु हृदयं गता
स्त्रिधा जायंते तास्त्रिंशत् तासां मध्ये द्वे द्वे वातपित्तकफशोणितरसान्वहतः ता दश अष्टाभिः शब्द
रूपरसगंधान्गृह्णाति पुरुषः द्वाभ्यां भाषते द्वाभ्यां स्प्रशति द्वाभ्यां स्वपिति द्वाभ्यां जागर्ति द्वे चाश्रुवाहि
न्यौ द्वे स्तन्यं स्त्रियाः वहतः एतास्त्रिंशत् एताभिरुदरपार्श्वपृष्ठोरःस्कंधग्रीवाबाहवो धार्यंते यान्त्यते
च अधोगास्तु वातमूत्रपुरीषशुक्रार्तवादीन्यधो वहंति तास्तु पित्ताशयं गतास्त्रिधा जायंते तास्त्रिंशत्॥

भावप्र०
७२

दन्तानामधिष्ठाने स्थूलत्वक् सप्तमी ख्याता विद्रध्यादेः स्थितिस्तथा सा व्रीहिद्वयप्रमाणा अत एवोक्तं शार्ङ्गधरेण
स्थूला व्रीहिद्विमात्रेयमिति सप्तापि त्वचः समुदिता विंशतितमभागेन षट्यवप्रमाणाः षट्यवप्रमाणं तु अंगुष्ठो-
दरतुल्यं यदुक्तं उदरेऽङ्गुष्ठोदरप्रमाणमवगाह्य विध्येदिति एतत्प्रमाणं मांसलेषु स्थूलेषु बोधव्यं॥
न तु ललाटसूक्ष्मांगुल्यादिषु अथ लोमानि लोमकूपाश्च अस्थ्नो मलानि रोमाणि लक्षसंख्यानि भवंति
हि संति यावंति लोमानि तावंतो लोमकूपकाः अंगप्रत्यंगनिर्वृत्तिः स्वभावादेव जायते सन्निवेशश्च गात्रा-
णां तत्रास्ते कारणांतरं निर्वृत्तिः सिद्धिः स्वभावात् ईश्वरात् सन्निवेशो रचनाविशेषः अंगप्रत्यंग-
निर्वृत्तौ ये भवंत्यगुणा गुणाः ते ते गर्भस्य विज्ञेया धर्माधर्मनिमित्तजाः दंतानां पतनं जन्म पुनः
पाते च संभवः तलेष्वनुद्भवो लोम्नामेतत्सर्वं स्वभावतः गर्भो मासि मासि यादृग्भवति तदाह गर्भा-
परमेश्वरात् २ शये निपतितं यादृक् शुक्रं तथार्तवं तादृगेव द्रवीभूतं प्रथमे मासि तिष्ठति मरुत्पित्तकफैस्तत्तस्यैः
पच्यमानो द्वितीयके कललस्य महाभूतसमुदाय घनो घनो भवेत् अत्र मस्तकपूर्योरपि पाकेतुलं

शिव
म

कललो गर्भाशयः १

तयोरल्पत्वेनोऽधिकरणत्वात् यत्तदुक्तं चरके भौमाप्याग्नेयवायव्याः पंचोष्माणः सनाभसा
इति तृतीये मासि शिरसो हस्तयोः पादयोस्तथा पिंडकाः पंच सिध्यंति सूक्ष्मा अवयवास्तनोः सर्वाण्यंगान्युपां-
गानि च तुर्थे स्युः स्फुटानि हि हृदयं व्यक्तिभावेन व्यज्यते चेतनापि च तस्माच्चतुर्थे गर्भस्तु नानावस्तूनि कां-
क्षति तत्र द्विहृदयायास्तस्या नारी दौहृदिनी मता दौहृदावज्ञया कुब्जं कुणिं खंजं च वामनं विकृताक्षम-
नक्षं वा पुत्रं नारी प्रसूयते यतः स्त्री दौहृदं प्राप्य वीर्यवंतं चिरायुषं पुत्रं प्रसूयते तस्मात्तस्यै वांछि-
तमर्पयेत् इंद्रियार्थानि सौ यान्यान्भोक्तुमिच्छति गर्भिणी गर्भबाधभयात्तांस्तान्भिषगाहृत्य दा-
पयेत् भोक्तुमुपभोक्तुमित्यर्थः सा प्राप्य दौहृदा पुत्रं जनयेत गुणान्वितं अलब्धदौहृदा गर्भे लभे-
तात्मनि वा भयं येषु येष्विंद्रियार्थेषु दौहृदे सा विमानिता (अपमानिता) प्रसूयते सुतं सार्त्तिं तस्मिंस्तस्मिंस्तदिं-
द्रिये सार्त्तिव्यथासहितं दौहृदविशेषफलमाह राजसंदर्शने यस्या दौहृदं जायते स्त्रियाः अर्थवंतं
महाभागं कुमारं सा प्रसूयते दुकूलपट्टकौशेयभूषणादिषु दौहृदात् अलंकारैषिणं पुत्रं ललितं सा

भावप्र०
४२

प्रसूयते आश्रमे संयतात्मानं धर्मशीलं प्रसूयते देवताप्रतिमायां तु प्रसूते पार्षदोपमं आश्रमे तप-
स्विनं आश्रमे दौर्हृदात् पार्षदोपमं प्रमथोपमं दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते रक्ताक्षं लो-
मसं शूरं मत्तिकाभिष दौर्हृदात् वराहमांसे स्वप्नालुं सूरं च जनयेत्सुतं मृगमांसेषु जंघालं वि-
क्रांतं वनचारिणं अतोऽनुलेषु यान्नारी दौर्हृदं विदधाति हि शरीराचारशीलैः सा समाने जन-
यिष्यति पंचमे मानसं षष्ठे बुद्धिरस्याति प्रबुध्यते सर्वाण्यंगान्युपांगानि भवंत्यव्यक्तानि सप्त-
तमे अष्टमे संचरति माता पुत्रौ मुहुः क्रमात् तेन तौ म्लानमुदितौ स्यातां जातो न जीव-
ति नजीवत्यष्टमे जातः तत्रौजोऽनस्थिरं यतः तथा नैरृतभागत्वात् पयेत्तद्बलिं ततः नै-
रृताय भागस्य बालघ्रुकृद्गणदत्तः यदुक्तं कुमारतंत्रे अष्टमे मासि नैरृताय मांसौदनं ब-
लिं दापयेदिति नैरृताय राक्षसाय बालग्रहाय नवमे दशमे मासि नारी बालं प्रसूयते
एकादशे द्वादशे वा ततोऽन्यत्र विकारतः गर्भस्य देहे प्रथमं भवति तदा तु शिरो भवतिचा

शिव०
४२

सीतांकि: २

कायविध्यन्तताः क्वचित् अथ संघाताः चतुर्दशास्थ्नां संघाताः तेषां त्रयो गुल्फजानुवंक्षणेषु एतेनेतरसक्थिबाहू
च व्याख्यातौ त्रिकशिरसोरेकैकः अत्र तु त्रिकपदेन चातुर्ग्रीवास्थिसंघात उच्यते अथ सीमंताः चतुर्दशैव सी-
मंताः कथिता मुनिपुंगवैः संघातास्तैर्चितायेस्तु सीमंतास्ते प्रकीर्तिताः ये अस्थिभिः अथ त्वचः क्षीरस्य पच्यमानस्य यथा
संतानिका भवेत् पच्यमानस्य शुक्रस्य रजसश्च तथा त्वचः पूर्वावभासिनी तासां सिध्मस्थानं च सा मता अव-
भासिनी भ्राजके नापि तेनावभासमानात् परिणाहेन विस्तारितस्य व्रीहेः विंशतिः भागेष्वष्टादश भागाः प्रमा-
णं तस्याः व्रीहिरत्रयवः सा सिध्मपद्मकंटकयोरधिष्ठानं द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः
सा यवषोडशभागप्रमाणा तिलकालकन्यच्छव्यंगानामधिष्ठानं तृतीया तु भवेच्छ्वेता स्थानं चर्मदल दाढु०
स्य सा सा यवद्वादशभागप्रमाणा चर्मदलाजगल्लिका मशकानामधिष्ठानं ताम्रा चतुर्थी विज्ञेया लि-
कासश्वित्रभूमिका यवाष्टभागप्रमाणा पंचमी वेदनीनाम्ना सर्वकुष्ठोद्भवा स्मृता सा व्रीहिः पंचभागप्रमा-
णा षष्ठी तु रोहिणी नाम्ना ग्रंथिगंडापचीस्थितिः सा व्रीहि त्रिभागप्रमाणा गंथ्यपचीगलगंडमालार्बुदश्लीप-

अवचतुर्भागप्रमाणाः सर्वकुष्ठानामधिष्ठानं॥३॥ कि

इंद्रियाणि च सर्वाणि भवंसेतानि चात्मनः दुःखादिकमित्यादिशब्देन नानायोनिजन्मादिकमुच्यते आत्म
नः आत्मसंनिकर्षादेव न त्वात्मनो जायते आत्मनो निर्विकारात् प्रकृतिभावानुपपत्तेः गर्भस्य किंचिद्वि
शिष्टोपकारकं तदाह ॥ अग्निः सोमो मही वायुर्नभस्सत्वरजस्तमः पंचेंद्रियाणि भूतात्मा गर्भं संजीवयं
ति हि अग्नि रत्र पाचकभ्राजकआलोचकरंजकसाधकानां तथा पंचभौतिकानां तथा सप्तधातुग
तानामग्नीनां शक्तिरूपतयाऽवस्थितो वाय्वाधिदैवतं प्राणो बोधव्यः स च पाकादिकर्मणा जीवयति ।
सोमश्च पंचात्मकश्लेष्मरसशुक्रादीनां सोमात्मकानां भावानां रसनेंद्रियस्य च शक्तिरूपतयाऽ
वस्थितो मनसश्चाधिदैवतं प्राणो बोधव्यः स च सौम्यधातोरोजः प्रभृतेः पोषणेन पवनपावका
संशुष्कभागस्याद्रतां विधानेन जीवयतीति शेषः मही च जले नत्क्लिन्नस्यापि कठिनविधानेन
वायुर्दोषधातुमलादीनां संचारणेनोच्छ्वासनिश्वासाभ्यां च नभोऽनिलानलविदारितस्रोत
सामूर्ध्वोधस्तिर्यगवकाशदानेन संवर्द्धनात् सत्वं रजस्तम इति मनोरूपतया परिणतं जी
वात्मनः शरीरांतरग्रहणमोक्षणहेतुरिति तदपि जीवयति सत्वं रजस्तमश्च मनोरूपतया शिव
४२

शेषराशेः हि शरी
रादेः

पंचेंद्रियाणि श्रोत्रत्वक्नेत्रजिह्वाघ्राणानि शब्दादिग्रहणकर्मणा भूतात्मा कर्मपुरुषः सत्वाशेष
स्यैव कर्मराशेरागंतश्चैतन्यहेतुरिति जीवयति अपरं गर्भस्य जीवनोपायमाह गर्भस्य नाभि
नाडी तु नाडी रसवहा स्त्रियः संलग्नास्तेन गर्भस्य वृद्धिर्भवति नियतश्च निश्वासोच्छ्वाससंक्षोभस्य प्राप्ना
भौधिगच्छति मातुर्निश्वसितोच्छ्वाससंक्षोभस्य प्रसंभवात् संक्षोभं संचलनं मातानिश्वासादिका ।
या याश्चेष्टाः करोति तास्ताः गर्भोऽपि करोतीत्यर्थः गर्भवृद्धेर्हेतुमाह गर्भस्य नाभिमध्ये तु ज्योतिःस्था
नं ध्रुवं स्मृतं तदाधमति वातश्च देहस्तेनास्य वर्द्धते उष्मणा सहितश्चापि दारयत्यस्य मारुतः ऊ
र्ध्वं तीर्यगधस्ताच्च स्रोतांसि च यथा तथा यथा दारयति विस्तारयति तथा देहो वर्द्धते इति पूर्वेण
न्वयः दृष्टिरोमकूपानामवृद्धिमाह दृष्टिश्च रोमकूपाश्च न वर्द्धंते कदाचन ध्रुवाण्येतानि मर्त्या(
नामिति धन्वंतरेर्मतं नखकेशानां सदावृद्धिमाह शरीरे क्षीयमाणेऽपि वर्द्धेते हि विमौ सदा
स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः प्रकृतिं कृत्वा कारणं कृत्वा रतिः स्थितिर्मर्यादा अचेत
नान्यंगान्याह चेतनानामधिष्ठानं मनो देहश्च सेंद्रियः केशलोमनखाग्रांतमलद्रवगुणैर्वि

ना गर्भस्य वातविण्मूत्रोत्सर्गाऽकरणे कारणमाह वातात्मूत्रादयोगाश्च वायोः पक्वाशयस्य च
वातमूत्रपुरीषाणि गर्भस्थो न प्रमुंचति अयोगाद्दीर्घयोगात् गर्भरोदने कारणमाह जरायुणा गर्भरो०
मुखे छन्ने कंठे च कफवेष्टिते वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदति अथ गर्भवतीकृत्या
न्यानि गर्भिणी प्रथमादन्हः प्रहृष्टा भूषिता शुचिः भवेत् शुक्लांबरधरा गुरुविप्रार्चने रता भो
ज्यं तु मधुरप्रायं स्निग्धं हृद्यं द्रवं लघु संस्कृतं दीपनीयं तु नियममेवोपयोजयत् गुर्विणी न तु
कुर्वीत व्यायाममपतर्पणं कषायं च न सेवेत न कुर्यादतितर्पणं रात्रौ जागरणं शोकं यान
यनशनेद स्यारोहणं तथा रक्तमोक्षं वेगरोधं न कुर्यादुत्कटासनं दोषाभिघातैर्गर्भिण्या यो यो भागः प्र
पीड्यते स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते मलिनां विकृताकारां हीनांगीं न स्पृशेत्स्त्री
यं न जिघ्रेदपि दुर्गंधं न पश्येन्नयनाप्रियं वचांसि नापि शृणुयात् कर्णयोरप्रियाणि च नान्नं प
र्युषितं शुष्कं भुंजीत क्वथितं न च चैत्यश्मशानवृक्षांश्च भावाक्रान्तापथाश्मशाकरान् यतिर्निष्क्र
ष्क्रमणं क्रोधं शून्यागारं च वर्जयेत् नोच्चैर्ब्रूयात् न तत्कुर्यात् येन गर्भो विनश्यति तैलाभ्यं श्रिव ४४

स्तेधुरशवस्थानेनेसः २

गस्य पूर्वमित्याह शौनकः शिरस्येवोपजायंते प्रधानानींद्रियाणि यत् हृदयं जायते पूर्वं कृ
तवीर्यो वदन्मुनिः बुद्धेश्च मनसश्चापि यतस्तत्स्थानमीरितं पाराशर्य इति प्राह पूर्वं ना
भिसमुद्भवः प्राणस्य तत्स्थितो देहं वर्द्धयन् सूक्ष्मसंयुतः पाणिपादं भवेत्पूर्वं मार्कंडेयो वदन्मुनिः देहिनां सक
लाश्चेष्टा पाणिपादाश्रया यतः प्रथमं जायते कोष्ठं ततः सर्वांगसंभवः एतत्तु कथयामास गौतमो मुनिपुंगवः ॥
सर्वाण्यंगान्युपांगानि युगपत्संभवंति हि सूक्ष्मत्वान्नोपलभ्यंते भगवान्धन्वंतरेरिदं आम्रस्याणुफले
भवंति युगपन्मांसास्थिमज्जादयो लक्ष्यंते न पृथक् पृथक् लणुतया पुष्टास्त एव स्फुटाः एवं गर्भस्य मु
द्भवे लवयवाः सर्वे भवंत्येकदा लक्ष्याः सूक्ष्मतया न ते प्रकटतामायांति वृद्धिं गताः १ मज्जादयः इत्यादि
शब्देन त्वक्केसरमज्जां कुरवं तानि गृह्यते अथ शरीरे पितृजा मातृजा रसजात्मजा भागा उच्यंते तत्र
केशाः श्मश्रु च लोमानि नखा दंताः शिरास्तथा धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि मांसासृक्म
ज्जो मेदांसि यकृत्प्लीहांत्रनाभयः हृदयं च गुदं चापि भवंत्येतानि मातृतः शरीरोपचयो वर्णो बल
देहस्थितिस्तथा रसादेतानि जायंते भित्त्वात्मनो जगुः ज्ञानं विज्ञानमायुश्च सुखदुःखादिकं तथा

भावप्र०
७५

हेच्या शनैः पूर्वं प्रगाढं च ततः परं ततो गाढतरं गर्भे योनिद्वारमुपागते अपरासहिता गर्भो यावत्पतति
भूतले अथाकारहितायाः प्रजातना दोषरूपमाह मूकं वा बधिरं कुब्जं श्वासकासक्षयान्वितं सूते सु
सुतनुं बालं अकाले तु प्रवाहणात् ॥ इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भाव
विरचिते भावप्रकाशे गर्भोपनिषद्दर्शितशरीरार्थेति इदं आयुर्वेदप्रसिद्धं गर्भप्रकरणं द्वितीयम् ॥२॥
गर्भप्रकरणे शारीरकमविसमाप्तं ॥ ॥ तथा कुञ्जिनिबद्धेवकरयुग्मं चरणयुग्ममुत मांसं गात्रमिति
अथ बालस्य जन्मोत्तरविधि अथ बाले समुत्पन्ने विदध्यात् विधिं तथा यथोक्तं कुलवृद्धस्त्री व्य
वहारपरंपरा अथ प्रसूताया नियममाह प्रसूता हितमाहारं विहारं च समाचरेत् व्यायामं मैथु
नं क्रोधं शीतसेवां विवर्जयेत् मिथ्याचारात् सूतिकाया यो व्याधिरुपजायते स कृच्छ्रसाध्योऽसा
ध्यो वा भवेत् पथ्यं समाचरेत् अथ प्रसूताया नियमसमयावधिमाह सर्वतः परिशुद्धा सा स्निग्धपथ्या
ल्पभोजना स्वेदाभ्यंगपरा नित्यं भवेन्मासमतंद्रिता सर्वतः परिशुद्धा स्तुता वशिष्ट दुष्टरुधिरा अतंद्रिता
पथ्यादौ सावधाना प्रसूता सार्द्धमासांते दृष्टे वा पुनरार्तवे सूतिकानामहीनास्यादिति धन्वंतरेर्मतं शिव ७५

सुपद्रवां विशुद्धां च विज्ञाय वरवर्णिनी ऊर्द्धं चतुर्भ्यो मासेभ्यो नियमं परिहारयेत् अथ स्तन्यस्य स्वरूपमाह
सार रसप्रसादो मधुरः पक्काहारनिमित्तजः कृत्स्नाद्देहात् स्तनौ प्राप्तः स्तन्यमित्यभिधीयते रसप्रसादः रसस्य सारः ॥ सार
स्तन्यस्य प्रवृत्तिमाह स्तन्यं त्रिरात्रात् स्त्रीणां वा चतुरात्राद् अनंतरं प्रवर्तयंति विवृता धमन्यो हृदये स्थि
ताः अथ स्तन्यस्य प्रवृत्तिनिमित्तमाह पयः पुत्रस्य संस्पर्शाद्दर्शनात् स्मरणादपि ग्रहणादप्युरोजस्य
क्षीतिः५ शुक्रवत् सम्प्रवर्तते स्नेहो निरंतरं तस्य प्रस्रवे हेतुरुच्यते अथ स्तन्याल्पतायां हेतुमाह अवात्सल्याद्भया
च्छोकात् क्रोधादप्यपतर्पणात् स्त्रीणां स्तन्यं भवेत् स्वल्पं गर्भांतरविधारणात् अथ स्तन्यस्य वृद्धिहेतूनाह ॥
शालिषष्टिकगोधूमान् माषान् क्षुद्रझषानपि कालशाकमलाबूं च नालिकेरकशेरुकान् शृंगाटकविदारी वा
पि विदारीकंदमेव च लशुनं दुग्धं च द्रव्येसू सेवेत सुमनाः भवेत् कलमस्य तंडुलानां कल्कं क्षीरपेष
षितं पिबति सा भवति प्रचुरक्षीरभरेणैव तुंगकुचयुगला कलमो धान्यविशेषः तस्य लक्षणमाह ॥
कलमः कुलविख्यातो जायते सरटहद्दे काश्मीरदेशे एवो कोमत तंडुलसेतुकः विदारीकंदस्वरसं पि
बेत् स्तन्यस्य वृद्धये तच्चूर्णं तस्य रसं वा पिबेद्धा क्षीरसंयुतं अथ स्तन्यस्य दुष्टिहेतुमाह धात्र्या गुरु

हृदेर

कलमः किलविख्यातो जायते सरटहद्दे ॥ सरेति द्विः२

अकाले चातिमात्रं च तथासात्म्यं च भोजनं विषमाशनं च यत्कुर्वन्स मिथ्याहार उच्यते ॥ असात्म्यं कुरुते कर्म शक्तितुल्यं करोति ना मिथ्याविहारं विज्ञेयः कथितो मुनिपुंगवैः ॥१५

भावप्र०

४६ मिथ्याहारैर्विविधैर्दुष्टैर्बलैस्तथा देहे दोषाः प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति मिथ्याहारविहारेण दुष्टा वाता
दयः स्त्रियः दूषयन्ति पयस्तेन शारीरव्याधयः शिशोः अथ दुष्टस्तन्यस्य लक्षणमाह कषायसलिलप्ला
वि स्तन्यं मारुतदूषितं पित्तादम्लं च कटुकं राज्योऽम्लसिताः पीतिकाः कफदुष्टं च तु तोये निमज्जति च र
पिच्छिलं द्वंद्वजं तु द्विलिंगं स्यात्त्रिलिंगं संनिपातिकं अथ दुष्टस्य स्तन्यस्य शोधनविधिमाह धात्री
क्षीरविशुध्यर्थं मुद्गयूषरसाशिनी भार्ङ्गीदारुवचाः पिष्ट्वा पिबेत्सातिविषास्तथा पाठामूर्वामृतानिंबदा
रुशुंठी चूलिंगकैः सारिवामत्स्यपित्ताख्यैः क्वाथः स्तन्यविशोधनः मत्स्यपित्ताकटुकी पटोलानिंबासनदारु
पाठामूर्वागुडूचीकटुरोहिणीं च सनागरां च क्वथितां च तोये धात्री पिबेत्स्तन्यविशुद्धिहेतोः अथ शुद्धस
स्तन्यस्य लक्षणमाह नीरे स्तन्यं यदेकीस्यादविवर्णं मतं तु मत् पाण्डुरं तनु शीतं च दुग्धं शुद्धं मादिशेत् सट
अथ धात्रीलक्षणं पिता यदि बालस्य विदध्यादुपमातरं सुविचार्य गुणान्दोषान्कुर्याद्धात्रीं तदी
दृशीं सवर्णां मध्यवयस्कां सुशीलां मुदितां सदा शुद्धदुग्धां च तुष्टीरां सवत्सां मतिवत्सलां स्वाधीना
मल्पसंतुष्टां कुलीनां सज्जनात्मजां वैरेण च परित्यक्तां निजपुत्रदर्शीं शिशौ अथ निषिद्धां धात्रीमाह॥ शिव ४६

गोऽहृतेनैव नासर्पं कारयेदपि नामहास्तरणं कुर्यान्नातृप्ता शयनासनं एतांस्तु नियमान्स
र्वान्यत्नात्कुर्वीत गुर्विणी अथ प्रसवमासानाह नवमे दशमे मासि नारी गर्भं प्रसूयते एकादशे
द्वादशे वा ततोऽन्यत्र विकारतः अथ सूतिकागारलाकृतिः अष्टहस्तायतं तच्चारु चतुरहस्तविशालकं प्राग्द्वारमु
दग्द्वारं विदध्यात्सूतिकागृहं अथासन्नप्रसवाया लक्षणमाह जाते शिथिले कुक्षौ मुक्ते हृदयबंधने सशू
ले जघने नारी विज्ञेया प्रसवोत्सुका आसन्नप्रसवायास्तु कटीपृष्ठं तु सव्यथं भवेन्मुहुः प्रवृत्तिश्च मूत्रस्य
च मलस्य च अथासन्नप्रसवाया उपचारमाह तैलेनाभ्यक्तगात्रां तां सुस्नातामुष्णवारिणा यवागूं पाययेत्
त्कोष्णां मात्रया घृतसंयुतां कृतोपधाने मृदुनि विस्तीर्णे शयने शनैः आभुग्नसक्थी चोत्ताना नारी
तिष्ठेद्व्यथान्विता आभुग्नसक्थी संकोचितोरूः अथ जनयित्रीराह॥ चतस्रः शंकिनीयाश्च सावने
कुशला हिताः वृद्धाः परिचरेयुस्तां सम्यक् छिन्ननखाः स्त्रियः अथ जनयित्रीकृत्यं अपत्यमार्गं तैलेन समभ्य
ज्यसमंततः एका तु तां सुसुभगे प्रवाहस्वेति तां वदेत् अथ व्यथा माप्रवाहिष्ठा प्रवाहेथा व्यथा यदि प्रवा

क्षीरमेव सात्म्यं भवति न त्वन्नादिकं आ स्तन्यप्रवृत्तेरिति पयः यावत् स्त्रियः स्तन्यस्य सम्यक् ततो भावेन
प्राप्तिर्भवति मात्रया यावत् स्तन्यपानस्य योग्यता तावदित्यर्थः अथ बालस्यान्नप्राशनसमयः यथो
क्तविधिना बालं मासि षष्ठेऽष्टमेऽपि वा अन्नं संप्राशयेत् किंचित् तत्तस्तद्वृद्धये क्रमात् अथ बाल
स्य परिचर्याविधिः बालमंके सुखं दद्यान्न चैनं तर्जयेत् क्वचित् सहसा बोधयेन्नैव नायोग्यमुपवेश
येत् अयोग्यं उपवेशनासमर्थं नाकृष्य स्थापयेत् क्रोडे न क्षिप्रं शाययेन्न क्षिपेत् रोदयेन्न क्वचित् कार्ये
विधिमावश्यकं विना आचरणको विधिः भेषजदानतैलाभ्यंगोद्वर्तनादिः तच्चित्तमनुवर्तेत तं स
दैवानुमोदयेत् संसेवितमना एवं नियमेवाभिवर्द्धते वातातपतडिद्वृष्टिधूमानलजलादितः
निम्नोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः बालस्य स्वभावात् हितान्याह अभ्यंगोद्वर्तने स्नाने नेत्र
योरंजने तथा वमने मृदु यत्नश्च तथा मृद्वनुलेपनं जन्मप्रभृति पथ्यानि बालस्यैतानि सर्वथा
बालस्य कवलादेः समयमाह कवलं पंचमाद्वर्षादष्टमान्नस्यकर्म च विरेकः षोडशाद्वर्षाद्विंशते
श्चैव मैथुनं कवलः गण्डूषः नस्यं नासिकायां हितं बाल्यादेरवधिमाह सुश्रुतः वयस्तु त्रिविधं बाल्यं
मध्यमं वार्द्धकं तथा ऊनषोडशवर्षस्तु नरो बालो निगद्यते त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशीत

पयोऽन्नभुक् दुग्धाशी वर्षपर्यंतं दुग्धान्नाशी शरद्द्वयं तदुत्तरस्मादन्नाशी एवं बालस्त्रिधा मतः म
ध्यः षोडशसप्तत्योर्मध्यमः कथितो बुधैः चतुर्धा मध्यमं प्राहुर्यौवनं त्रिंशतो मतः चत्वारिंशत्समाया
वत् तिष्ठेद्वीर्यादिपूरितः ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः वीर्यादि इत्यादिशब्देन रसादि
सर्वधात्विंद्रियबलोत्साहाः उच्यंते क्षीणः सर्वधात्विंद्रियबलोत्साहैर्हीनः ततस्तु सप्ततेरूर्द्धं क्षी
णधातुरसादिकः क्षीयमाणेंद्रियबलः क्षीणरेता दिने दिने वलीपलितखालित्ययुक्तः कर्मसु
चाक्षमः कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः बाल्ये विवर्द्धते श्लेष्मा पित्तस्यान्मध्यमेऽ
धिकं वार्द्धके वर्द्धते वायुर्विचार्यैतदुपक्रमेत् उपक्रमेत् चिकित्सेत् तत्रांतरे तु बाल्यं वृद्धि
श्छविर्मेधात्वग्दृष्टिः शुक्रविक्रमौ बुद्धिः कर्मेन्द्रियं चेति जीवितं दशतो ह्रसेत् अथ प्रकृतिलक्ष
णानि सप्तप्रकृतयो नृणां वातात् पित्तात्कफात्तथा संसर्गात्संनिपाताच्च भवंति भिषजां मते शुक्रशो
णितसंयोगे यो दोषस्तूत्कटो भवेत् प्रकृतिर्जायते तेन तस्याः लक्षणमुच्यते वाग्भटः वात्रेयादयः शुक्रा
स्रगार्भिणीभोज्यचेष्टागर्भाशयार्तुषु यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता सोऽपि दोषः स्वभावा

लोमनाश
कोरोगः

भावप्र०
४९

वस्थितः नतु दुष्टः दुष्टे न तु शुक्रशोणिते तयोर्दुष्टया शुद्धगर्भासंभवात् जागरूकोल्पकेशश्च स्फुटि
तांघ्रिकरः कृशः शीघ्रगो बहुवाग्रूक्षः स्वप्ने वियति गच्छति एवंविधो यः स ज्ञेयो वातप्रकृतिको
नरः पित्तप्रकृतिको यादृक् तादृशोऽपि निगद्यते अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ब
हुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति एवंविधो भवेद्यस्तु पित्तप्रकृतिको नरः श्यामकेशः क्षमः
स्थूलो बहुवीर्यो महाबलः स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः दृश्यते प्रकृतौ यत्र रूपं
दोषद्वयस्य तु तं संसर्गेण जानीयात् सर्वलिंगैस्त्रिदोषजं वाग्भटेन तु प्रायस्त एव पवनाध्युषिता
मनुष्याः दोषात्मकाः स्फुटितधूसरकेशगात्राः शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टाः सौहार्ददृष्टि ५८
पितकफ्रूट गतयोतिबहुप्रलापाः स्वल्पवित्तबलजीवितनिद्रासन्नशक्तिचलजर्जरवाचः नास्तिका बहु
भुजः सविलासा गीतहास्यमृगयाकलिलोलाः मधुराम्लपटूष्णसात्म्यकांक्षाः कृशदीर्घाकृतयः
सशब्दयानाः न दृढा न जितेंद्रिया न चार्याः न च कांतादयिता बहुप्रजा वा नेत्राणि चैषां खरधू
सराणि वृत्तान्यचारूणि मृतोपमानि उन्मीलितानीव भवंति सुप्ते शैलद्रुमांस्ते गगनं प्रयांति ॥ शिव ४९

शोकाकुला क्षुधार्ता च श्रांता व्याधिमती सदा अत्युच्चासितरांनीचा स्थूलातीव भृशं कृशा गर्भिणी ज्वरिणी चा
पि लंबोन्नतपयोधरा अजीर्णभोजिनी चापि तथापथ्यविवर्जिता अशक्ता दुष्टकार्या दुःखार्ता चंच
लाधिका एतासां स्तन्यपानेन शिशुर्भवति सामयः अथ बालस्य स्तन्यपानविधिः तत्र माता प्रशस्तेऽह्नि
चारुवस्त्रा पुरोमुखी उपविश्यासने सम्यक् दक्षिणं स्तनमंबुना प्रक्षाल्य स्वल्पं परिस्राव्य मंत्रेणानेनाभि
मंत्रितं उदङ्मुखं शिशुं क्रोडे शनैराधाय पाययेत् मातेत्युपलक्षणं धात्री च ईदृक्परिस्राव्य अन्यत्र
धात्रैकगुणमातृसुश्रुतः अप्राश्रावितस्तन्ये बालः पिबेत्स्तन्येन भूयसा पूर्णस्रोतो वमीकासश्वासैर्भवति
पीडितः अथाभिमंत्रणमाह क्षीरन्नीरनिधिस्ते तु स्तनयोः क्षीरपूरकः सदैव सुभगो बालो भवेदे
षमहाबलः पयोऽमृतरसं पीत्वा कुमारस्ते शुभानने दीर्घमायुरवाप्नोतु देवाः प्राश्यामृतं यथा
मंत्रौ च पित्रा अन्येन ब्राह्मणेन वा पाठनीयौ यावन्मंत्रपाठस्तावन्मात्रा धात्र्या वा दक्षिणेन ह
स्तेन दक्षिणस्तनस्पर्शः कार्यः जनन्याः क्षीराभावे धात्र्याश्चालाभे प्रकारमाह क्षीरसात्म्यतया क्षी
रमाजमथवा विना दद्याद्वास्तन्यपर्याप्तेर्बालेभ्यो वीक्ष्य मात्रया क्षीरसात्म्यतयेति यतः शिशोः

मृद्वंगः समसुविभक्तचारुदेहो बहुलौजो रतिरसयुक्तपुत्रभृत्यः धर्मात्मा वदति न निष्ठुरंच यीतु प्रच्छन्नं
वहति दृढं चिरं च वैरं समदद्धिरद्वंद्वतुल्ययातो जलदांभोधिमृदंगसिंहघोषः स्मृतिमानभियो
गवान्विनितो न च बाल्ये प्यतिरोदनो न लोलः तिक्तंकषायं कटुकोष्णरूक्षमल्पंसभुंक्ते बलवांस्त
थापि रक्तांतसुस्निग्धविशालदीर्घ सुव्यक्तशुक्लासितपक्ष्मलाक्षः अल्पाहारः क्रोधपानाशने
दीर्घदर्शी पृ र्ष्यः प्राज्ञो विनीतो दीर्घसूत्री वदान्यः हृदगंभीरः स्थूलवक्षाक्षमावाञ्छीर्यनिद्रालुर्दीर्घदर्शी कृ
तोज्ञः ऋजुर्विपश्चित्सुभगः सुलज्जो भक्तो गुरूणां स्थिरसौहृदश्च स्वप्ने सपद्मान्सविहंगमालान्
तोयाशयान्पश्यति तोयदांश्च ब्रह्मरुद्रेंद्रवरुणतार्क्ष्यहंसगजाधिपैः श्लेष्मप्रकृतयस्तुल्यास्त
थासिंहाश्वगोवृषैः ननु प्रकृतिहेतूनां मध्ये योधिकः स स्वव्याधीन् कथं न करोतीत्याशंक्याह विष
जातो यथा कीटो न विषेण प्रबाध्यते तद्वत्प्रकृतयो मर्त्यं शक्नुवंति न बाधितुं एतौ द्वौ नजावकीवदर्थौ
तेन विषेण विषजदालादिना इव त्र बाध्यते न तु मृत्युः तथा च प्रकृतयः प्रकृतिहेतवो दोषाः बाधि
तुं न शक्नुवंति करचरणस्फुटितत्वस्वेदनिद्राधिक्यादिना इव बाधितुं शक्नुवंत्येव न तु ज्वरादिभिः शिव.
४८

प्रकोपो वाल्पवात्स्यभावो वा क्षयो वा नोपजायते प्रकृतीनां स्वभावेन जायते तु गतायुषः ॥ इति
श्रीमिश्रलटकनतनय श्रीमन्मिश्रभावविरचिते भावप्रकाशे बालप्रकरणं तृतीयं ३ ॥ अथ देशाः ॥
भूमिदेशस्त्रिधानूपो जांगलो मिश्रलक्षणः तत्रानूपस्य लक्षणमाह नदीपल्वलशैलाढ्यः फुल्लोत्प
लकुलैर्युतः हंससारसकारंडचक्रवाकादिसेवितः शशवराहमहिषरुरुरोहितकुलाकुलः प्रभूतद्रु स्वरेतोद्धिः
मशष्पाढ्यो नालशस्यफलान्वितः अनेकशालिकेदारकदलीक्षुविभूषितः अनूपदेशो ज्ञात
व्यो वातश्लेष्मामयार्तिमान् जांगललक्षणमाह आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः श
मीकरीरबिल्वार्कपीलुकर्कंधुसंकुलः हरिणैणर्क्षपृषतगोकर्णखरसंयुतः सुस्वादुफलवा
न्देशो वातलो जांगलः स्मृतः तत्रांतरेतु बहूदकनगोनूपः कफमारुतरोगवान् जांगलोल्पां
बुशाखी च पित्तासृक्मारुतोत्तरः साधारणलक्षणं संसृष्टलक्षणोपेतो देशः साधारणो मतः
समाः साधारणो यस्मात् शीतवर्षोष्णमारुतः समता तेन दोषाणां तस्मात्साधारणो वरः सुश्रुतः
गदोत्तरेंद्रियस्य उचितेच तथा नेस्य नास्ति दुर्देशजं भयं आहारस्वप्नचेष्टादौ तद्देशस्य कृते सति वकुव्यामहात

मा०व्या०
५०

× यस्य देशस्य यो जंतुः तज्जं तस्यौषधं हितं देशादन्यत्र वसतस्तत्तुल्यगुणमौषधं स्वदेशेनि
× चिता दोषाः अन्यस्मिन्कोपमागताः बलवंतस्तथा नस्युर्जलजास्थलजास्तथा अथ दिनादि
× चर्याः मानवो येन विधिना स्वस्थस्तिष्ठति सर्वदा तमेव कारयेत् वैद्यो यतः स्वास्थ्यं सदेप्सितं
× स्वदिनचर्यां निशाचर्यामृतुचर्यां यथोदितां आचरन् पुरुषः स्वस्थः सदा तिष्ठति नान्यथा ॥ ४ स्वास्थ्यरक्ष
× तत्र स्वस्थस्य लक्षणमाह सुश्रुतः समदोषः समाग्निश्च समधातुसमक्रियः प्रसन्नात्मेन्द्रिय
× मनाः स्वस्थ इत्यभिधीयते क्रियात्र कर्म तेन समक्रियः शरीरानुरूपं कर्मस्वास्थ्यमात्र शरीरं स्व
रहर्निशं तु भुक्तवयसदोषाणां वृद्धेः कथं समदोषता उच्यते अहोरात्रप्रथमादिभागे ततः दोषवृ
द्धेः स्वस्थवृत्तोक्तविधिरनुवर्त्यते समदोषतेति समदोषः किं च यतः साम्यं हि दोषस्य निखिल
भिः सर्वथा व्यर्थते न तत्स्वास्थ्यं विनाय तु शक्यमल्पेन हेतुना एतेन समदोषस्वस्थदोषाणां लक्ष
णमल्पोपद्रवं समदोषः स्वस्थः समदोषः तत्र दिनचर्यामाह ब्राह्मे मुहूर्तेति। तत्र कोसौ ब्राह्मो
मुहूर्तः इत्याशंकयाह। रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः स ब्राह्म इति विज्ञेयो विहि

शिव०
५०

यश्चातदस्मादिति द्विः २ अवासक्ष्मालिततरंगनीरकान्त्या द्विः ५

अधन्या मत्सराध्माताः स्तेनाः प्रोद्बद्धपिण्डिकाः श्वशृगालोष्ट्रगृध्राखुकाकोलूकाश्च वातिकाः पित्तं
वह्निर्वह्निर्जयस्तैदस्मात्पित्तोद्रिक्तस्तीव्रतृष्णो बुभुक्षुः गौरोष्णांगस्ताम्रहस्तांघ्रिवक्त्रः शूरो मा वह्नुद्धिः
नी पिंगकेशोऽल्परोमा दयितमाल्यविलेपनमण्डनः सुचरितः सुचिराश्रितवत्सलः विभवसा
शुद्ध४ हसबुद्धिबलान्वितो भवति भीरुमति द्विषतामपि मेधावी शिथिलितसंधिबंधमांसो नारीणा
मनभिमतोऽल्पशुक्रकामः आवासः पलिततरंगनीलिकानां भुंक्तेन्नं मधुरकषायतिक्तशीतं घर
र्मद्वेषी स्वेदनः पूतिगंधिर्भूर्युच्चारः क्रोधपानाशनेर्ष्यः सुप्तः पश्येत्कर्णिकारान्पलाशान् दि
ग्दाहोल्काविद्युदर्कानलांश्च तनूनि पिंगानि चलानि चैषां तन्वल्पपक्ष्माणि हिमप्रियाणि ॥
कोपेन मद्येन रवेश्च भासा रागं व्रजंत्याशु विलोचनानि मध्यायुषो मध्यबलाः पंडिताः क्लेशभी
भ्रांतःद्विः२ रवः व्याघ्रर्क्षकपिमार्जारयक्षोलूकाश्च पैत्तिकाः श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो गूढस्थिर क्रू०२ ४
गूढश्लिष्टसंध्यास्थिमांसः क्षुत्तृड्दुःखक्लेशघर्मैरतप्तो बुद्ध्यायुक्तः सात्त्विकः सत्यसंधः प्रियंगु
दूर्वाशरकांडदर्भगोरोचनापद्मसुवर्णवर्णः प्रलंबबाहुः पृथुपीनवक्षा महाललाटो घननीलकेशः

मूत्रनिरहात् विनामः शरीरस्य नम्रता वेगरोधनात्ः वेगरोधस्याकृष्टिलवत्यौ नवेगितोऽन्यकार्यः स्या
त्र वेगान्नीरयेद्बलात् कामशोकभयक्रोधान्मनोवेगान्विधारयेत् गुदादिमलमार्गाणां शौचं कां
तिबलप्रदं पवित्रकरमायुष्यं मलश्रमकलिपापहृत् प्रक्षालनं मतं पादयोः शुद्धिका
रणं मलश्रमहरं वृष्यं चक्षुष्यं राक्षसापहं दंतकाष्ठविधिः भक्षयेद्दंतधावनं द्वादशांगुलमायतं
कनिष्ठिकाग्रवत्स्थूलमृज्वग्रंथितथाव्रणं एकैकं घर्षयेद्दंतं मृदुनाकूर्चकेन तु दंतशोधन
चूर्णेन दंतमांसान्यबाधयन् क्षौद्रत्रिकटुकाक्तेन तैलसिंधुभवेन वा चूर्णेन तेजोवत्याश्च दं
तान्नित्यं विशोधयेत् तेजोवती तेजवल्कल इति प्रसिद्धं लोके मधूको मधुरे श्रेष्ठः करंजः कटु
के तथा निंबस्तिक्ते कषाये खदिरस्तथा समयं च समालोक्य दोषं च प्रकृतिं तथा
यथायोग्यैः रसैर्वीर्यैर्युक्तं द्रव्यं प्रयोजयेत् तेनास्य रसवैरस्यं गंधं जिह्वास्यजा गदाः रुचिर्वैशद्य दंतविधिः
लघुता न भवंति भवंति हि अर्के वीर्यं वटे दीप्तिः करंजे विजयो भवेत् प्लक्षे चैवार्थसंपत्तिर्बदर्यां
मधुरो ध्वनिः खदिरे मुखसौगंध्यं बिल्वे तु विपुलं धनं उदुंबरे तु वाक्सिद्धिराम्रे त्वारोग्यमेव च शिव ५१

दूर१

चकदंबे च धृतिर्मेधा चंपके दृढवाक्श्रुतिः शिरीषे कीर्तिसौभाग्यमायुरारोग्यमेव च अपामार्गे
धृतिर्मेधा प्रज्ञाशक्तिस्तथा ध्वनिः दाडिम्यां सुंदराकारः ककुभे कटुजे तथा जातीतगरमंदारे दुः
स्वप्नं च विनश्यति गुंजाकतलहिंतालकेतकश्चैव दंतदुरः खर्जूरं नारिकेरं च सप्तैते तृणराज
कः तृणराजसमुत्पन्नं यः कुर्याद्दंतधावनं नरश्चांडालयोनिः स्याद्यावद्गंगां न पश्यति ॥ अथ दं
तधावनवर्ज्यरोगेषु नखादेद्गलताल्वोष्ठजिह्वादंतगदेषु तत् मुखस्य पाके शोथे च श्वासकास
वमिषु च दुर्बलोऽजीर्णभुक्तश्च हिक्कामूर्छामदान्वितः शिरोरुजार्तस्तृषितः श्रांतः पानक्लमान्वितः
अर्दिती कर्णशूली च नेत्ररोगी नवज्वरी वर्जयेद्दंतकाष्ठं तु हृदामययुतोऽपि च अजीर्णभुक्तः नजीर
र्णभुक्तो यस्य सः जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा पाटितं मृदु तत्काष्ठं मृदुपत्रमयं तथा
तत्काष्ठं दंतशोधनयोग्यं काष्ठं दशांगुलं मृदु स्निग्धं तेन जिह्वां लिखेत् सुखं तत् जिह्वामलवैर
स्यदुर्गंधजडताहरं इति दंतधावनगुणागुणाः अथ गंडूषः गंडूषमथ कुर्वीत शीतेन पयसा
मुहुः कफतृष्णामलहरं मुखांतःशुद्धिकारकं सुखोष्णोदकगंडूषः कफारुचिमलापहः दंते

भावप्र०
५२

सुस्निग्धघनपक्ष्माणि द्धिः ७

ज्ञाऽवहरश्चापि मुखलाघवकारकः विषमूर्छामदार्त्तानां शोषिणां रक्तपित्तिकानाम् कुपिताक्षिम
लक्षीणरूक्षाणां स न प्रशस्यते स सुखोष्णोदकगंडूषैः मुखप्रक्षालनं शीतपयसा रक्तपित्तजित्
मुखस्य पिडिकाशोषनीलिकाव्यंगनाशनं कुर्याद्दापिकदुग्धेन पयसास्यविशोधनं कफवात
हरं स्निग्धं मुखशोषविनाशनं इति मुखप्रक्षालनं कवलश्च कटुतैलादिनस्याद्यैर्नित्याभ्या
सेन योजयेत् प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं समीरणे सुगंधवदनाः स्निग्धनिःस्वना वि
निर्वली द्धिः ६ मलेंद्रियाः नवली पलितव्यंगा भवेयुर्नस्यशीलिनः इति नस्यं ॥ अथांजनं सौवीरमंज
ततो भजेत् द्धिः ७ ननित्यं हितमक्ष्णोः प्रयोजयेत् लोचने भवतस्तेन मनोज्ञे सूक्ष्मदर्शिनी सौवीरं श्वेतसुरमा
इति लोके प्रसिद्धं स्रोतोंजनमतः श्रेष्ठं विशुद्धं सिंधुसंभवं दृष्टेःकंडूमलहरं दाहक्लेदरुजापहं अ
क्ष्णोरूपवहं चैव सहते मारुतातपौ नेत्ररोगा न जायंते तस्मादंजनमाचरेत् स्रोतोंजनं सिंधुनामा
कृष्णसुरमा इति लोके प्रसिद्धं विशुद्धं शोधनं बिनापि सिंधुसंभवं रात्रौ जागरितः श्रांतश्छर्दि पर्वतः तत्र
तो भुक्तवांस्तथा ज्वरातुरः शिरःस्नातो नाक्ष्णोरंजनमाचरेत् अथ केशकल्पने पंचरात्रान्त संभवं २

शिव
५२

तः संप्रबोधने ॥ ब्राह्मे मुहूर्ते प्रबुध्य स्मरेत् ॥ मैत्रैः प्रसाधने स्नाने दंतधावनमंजनं ॥ पूर्वाह्ण एव कुर्वी
त देवतानां च पूजनं यतो निराशा गच्छंति देवाः पितृगणैः सह नस्नातः स्नातुकामो वा भक्ष
येत् दंतधावनं ॥ मलिने दर्पणे तैले सलिले मलिने घृते तथैव रुधिरे मूत्रे स्वरूपं नावलोक
येत् ब्राह्मे मुहूर्ते बुध्येत स्वस्थो रक्षार्थमायुषः तत्र सर्वाघशांत्यर्थं स्मरेच्च मधुसूदनं द
ध्याज्यादर्शसिद्धार्थबिल्वगोरोचनास्रजां दर्शनं स्पर्शनं कार्यं प्रबुद्धेन सुखं वहे स्वमाननं १ जागरणेन
घृते पश्येत् यदिच्छेत् चिरजीवितां आयुष्यमुषसि प्रोक्तं मलादीनां विसर्जनं तदंत्रकूजनाध्मानोदरगौ
रवबारणं आदिशब्देन वातमूत्रादीनां ग्रहणं आटोपशूलौ परिकर्तिका च संगपुरीषस्य तथोर्द्ध वा
तः पुरीषमास्याद् अथवा निरेति पुरीषवेगेऽभिहते नरस्य परिकर्तिका गुदे परिकर्तनवत् पीडा पुरीषस्य
संगः मलनिरोधः ऊर्द्धवातः उद्गारः वातमूत्रपुरीषाणां संगो ध्मानं क्लमो रुजा जठरे वातजाश्चा
न्ये रोगाः स्युर्वातनिग्रहात् बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा विनामो वंक्षणानाहः स्याल्लिंगं

संजायते स्वेदो बलार्द्धं तु तदादिशेत् भुक्तवान्कृतसंभोगः कासी श्वासी कृशः क्षयी रक्तपित्ती क्षतीशो
षी न तं कुर्यात् कदाचन अतिव्यायामतः कासो ज्वरश्छर्दिः श्रमः क्लमः तृष्णा क्षयः प्रतमको रक्त श्वासः २
पित्तं च जायते अथाभ्यंगगुणाः अभ्यंगमाचरेन्नित्यं सर्वेष्वंगेषु पुष्टिदं शिरः श्रवणपादेषु तं वि
शेषेण शीलयेत् सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥
गंधतैलं गंधद्रव्याणां अपूर्वादीनामग्नियोगेन निष्कासितः स्नेहः अभ्यंगो वातकफहृत् श्रम शिरसोपूर्णतामविद्धिं २
शांतिं बलं सुखं निद्रां वर्णं मृदुत्वमायुः कुरुते देहपुष्टिकृत् अभ्यंगः शीलितो मूर्ध्नि सकलेंद्रियतर्प
णः दृष्टिपुष्टिकरो हंति शिरोभूमिगतान्गदान् केशानां बहुतां दार्ढ्यं मृदुतां दीर्घतां तथा कृष्णतां कु
नट रुते कुर्यात् शिरसः पूर्णतामपि कर्णरोगान्मलं न च मन्याहनुग्रहः नोच्चैः श्रुतिर्न बाधिर्यं स्यान्
नित्यं कर्णपूरणात् रसाद्यैः पूरणं कर्णे भोजनात्प्राक् प्रशस्यते तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥
पादाभ्यंगस्तु तत्स्थैर्यं निद्रा दृष्टिप्रसादकृत् पादसुप्तिश्रमस्तंभसंकोचस्फुटनप्रणुत् व्यायाम
क्षुण्णवपुषं पद्भ्यां संमर्दितं तथा व्याधयो नोपसर्पंति वैनतेयमिवोरगाः लोमकूपशिराजालध शिव ५३

मनीभिः कलेवरं तर्पयेत् बलमाधत्ते स्नेहयुक्तो ह्यवगाहने अद्भिः संसिक्तमूलानां तरूणां पल्लवा ×
दयः वर्द्धंते हि तथा नृणां स्नेहसंसिक्तधातवः अथाभ्यंगवर्जनम् तरुणज्वरी ह्यजीर्णी च नाभ्य ×
क्तव्यः कथंचन तथा विरिक्तो वांतश्च निरूहेण च यो नरः निरूढः दत्तो निरूहबस्तिर्यस्मै सः पूर्वयोः
कृच्छ्रता व्याधेरसाध्यत्वमथापि वा शेषाणां तदहः प्रोक्ता वह्निसादादयो गदाः पूर्वयोस्तरुणज्वरिणोऽजी
र्णिनश्च अथोद्वर्तनगुणाः उद्वर्तनं कफहरं मेदोघ्नं शुक्रदं परं बल्यं शोणितकृत् त्वक्प्रसाद
मृदुत्वकृत् मुखलेपाद् दृढं चक्षुः पीनो गंडस्तथाननं कांतमव्यंगपिडकं भवेत्कमलसंनिभं ॥
अथ स्नानगुणाः दीपनं वृष्यमायुष्यं स्नानमोजोबलप्रदं कंडूमलश्रमस्वेदतंद्रातृड्दाहपापनु
त् वाह्यैश्च शीतैः शीताद्यैरूष्मांतर्याति पीडितः नरस्य स्नानमात्रस्य दीप्यते तेन पावकः शी
तेन पयसा स्नानं रक्तपित्तप्रशांतिकृत् तदेवोष्णेन तोयेन बल्यं वातकफापहं शिरःस्नानमत्यु
ष्णेन मस्तकेनांबुना सदा वातश्लेष्मप्रकोपे तु हितं तच्च प्रकीर्तितं अशीतेनांभसा स्नानं पयः
पानं नवाः स्त्रियः एतद्विमानवे पथ्यं स्निग्धमल्पं च भोजनं हरिद्राद्रव्यस्थेत् यःसदा म ॥

ल्लके स्नानं करोति स विनिश्चितं बलीपलितनिर्मुक्तो जीवेत् वर्षशतं नरः अथ स्नानवर्ज्याः स्नानं
×ज्वरे तिसारे च नेत्रकर्णानिलार्त्तिषु आध्माने पीनसाजीर्णे भुक्तवत्सु च गर्हितं अथ तनुमार्जन
×गुणाः स्नानस्यानंतरं सम्यक् वस्त्रेण तनुमार्जनं कांतिप्रदं शरीरस्य कण्डूत्वग्दोषनाशनं अथ
×वस्त्रधारणगुणाः कौशेयं चित्रवस्त्रं च रक्तवस्त्रं तथैव च वातश्लेष्महरं तत्तु शीतकाले विधार
×येत् कौशेयपट्टवस्त्रं आरक्तवस्त्रं च मेध्यं तु शीतं पित्तघ्नं कषायं वस्त्रमुच्यते तद्धारयेत् दुष्ण
काले तच्चापि लघु शस्यते कषायं कोकुटी इति लोके प्रसिद्धं कषायं रागरक्तं वा इति कषायवस्त्रगुणाः
शुक्लं तु शुभदं वस्त्रं शीतातपनिवारणं न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत् यशस्यं काम्यमा
श्रीमदानंदवृद्धिः युष्यं श्रीदं मानंदवर्द्धनं लघ्वं वशीकरं रुच्यं नवं निर्मलमंबरं श्वेतवस्त्रगुणाः काम्यं कामोद्दीप
नं अथ मलिनवस्त्रगुणाः कदापि न जने सद्भिर्धार्यं मलिनमंबरं तत्तु कण्डूकृमिकरं ग्लान्यल
क्ष्मीकरं मतं अलक्ष्मी अशोभा दारिद्र्यं च अथानुलेपनगुणाः कुंकुमं चंदनं चापि कस्तागरुवि
मिश्रितं उष्णं वातकफध्वंसि शीतकाले तदिष्यते चंदनं घनसारेण वालकेन च मिश्रितं सुगंधि परमं शीतं शिव
५४

संप्रसाधनं चेति द्धिः१

खश्मश्रुकेशरोमाणि कल्पयेत् केशश्मश्रुनखादीनां कर्तनं संप्रधावनं पौष्टिकं धन्यमायुष्यं शौचं कांतिकरं परं
संप्रसाधनं२ संप्रधावनं शोभाजनकं उत्पाटयेत्तु लोमानि नाशायां न कदाचन तदुत्पाटनतो दृष्टेर्दौर्बल्यं हरवां भवेत् अथ
कंकतीगुणाः केशपाशे प्रकुर्वीत प्रसाधन्या प्रसाधनं केशप्रसाधनं केश्यं रजोजंतुमलापहं अथादर्शगु
णाः आदर्शलोकनं प्रोक्तं मांगल्यं कांतिकारकं पौष्टिकं बलमायुष्यं पापालक्ष्मीविनाशनं अथ व्याया
मगुणाः लाघवं कर्मसामर्थ्यं विभक्तघनगात्रता दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते व्याया
माद्दृढगात्रस्य व्याधिर्नास्ति कदाचन विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं विपच्यते भवंति शीघ्रं नै
तस्य वलीशिथिलतादयः न चैनं सहसाक्रम्य जरा समधिरोहति न चास्ति सदृशं तेन किंचित्
स्थौल्यापकर्षकं ससरुगुणमाधत्ते वलिनां स्निग्धभोजिनां वसंते शीतसमये नितरां स तु तोमतः
अन्यदापि च कर्तव्यो वलार्द्धेन यथावलं अथ वलार्द्धस्य लक्षणं हृदयस्थो यदा वायुर्वक्त्रं शीघ्रं
प्रपद्यते मुखशोषं च लभते तद्बलार्द्धस्य लक्षणं किंवा ललाटे नाशायां गात्रसंधिषु कक्षयोः यदा

र्य्यान्मागत्य दर्शनं तस्य प्रदक्षिणं नित्यं आयुर्धर्म्मविवर्द्धनं लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हु
ताशनः हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः अथ पादुकारोहणगुणाः पादुकारोहणं कुर्यात्पू
र्वं भोजनतः परं पादरोगहरं वृष्यं चक्षुष्यं चायुषो हितं अथ चतुर्द्धा वांछा शरीरे जायते नित्यं वांछा
न्तरेण चतुर्विधा बुभुक्षा च पिपासा च सुषुप्सा सुरतस्पृहा भोजनेच्छाविघातात्तु स्यादंगमर्द्दोऽरुचिः श्रमः तं
द्रालोचनदौर्बल्यं धातुदाहो बलक्षयः विघाते न पिपासायाः शोषः कंठास्ययोर्भवेत् श्रवणस्य च ×
रोधश्च रक्तशोषो हृदि व्यथा निद्राविघाततो जृंभा शिरोलोचनगौरवं अंगमर्द्दस्तथा तंद्रा स्यादन्नापाक नेः ७
एव च शरीरे जायते नित्यं देहिनो सुरतस्पृहा (नक्षमैथुनात्) अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः अन्यच्च । प्रमेहः ७
(कामवांछाविघातस्य) कामजे चित्तविभ्रंशस्तंद्रालस्यमभोजनम् हृदये वेदना चास्य गात्रं च परिशुष्यति आयुष्मंतो मंदजरा
वपुर्वर्णबलान्विताः स्थिरोपचितमांसाश्च भवंति स्त्रीषु संयताः अथ बुभुक्षितदोषाः बुभुक्षितो न यः १
स्नाति तस्याहारेंधनं यातं मंदी भवति कायाग्निर्यथा चाग्निर्निरिंधनः आहारं पचति शिखी दोषानाहा
रवर्जितः शिखी अग्निः आहारं पचति आहारं विना दोषान्पचति दोषक्षये धातून्पचति धातुक्षये
प्राणान्पचति अथाहारस्य गुणाः आहारः प्रीणनः सद्यो बलकृद्देहधारणः स्मृत्यायुःशक्तिवर्णौजः
नाभोजनेन कायाग्निर्दीप्यते नातिभोजनात् ॥ यथा निरिंधनो वह्निरल्पो वातींधनावृतः ॥ भोजने हीनमात्रं तु न बलोपचयौजसे सर्ववातात शिव. ५५
तेरोगाणां हेतुतां च प्रवद्यते ॥७४

तेन समस्तेन कार्यं यदा तत्तु जंतुः समूहेऽपाहूर्त्तिनिर्हारं च करोति तदा क्रियाशोभया तीन्नो भवति ॥७४

सत्वं शोभाविवर्द्धनः यथोक्तगुणसंपन्नमुपसेवेत भोजनं विचार्य दोषकालादीन्कालयोरुभयोरपि उभ
पर योःकालयोः प्रातः सायं तथाच प्रातः सायं मनुष्याणां भोजनं श्रुतिबोधितं नांतरा भोजनं कुर्यात् अग्नि
होत्रसमो विधिः श्रुतिबोधितं वेदवचनेन बोधितं ज्ञातं प्रातः प्रथमयामादुपरि द्वितीययामादर्वाक् त
थाच याममध्ये न भोक्तव्यं यामयुग्मं न लंघयेत् याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः अन्यच्च क्षुद आमोत्पत्तिः
र्तो भवति पक्वेषु रसदोषमलेषु च काले वा यदि वाकाले सोऽन्नकाल उदाहृतः रसादीनां पाकस्तानमाह ॥
उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः लघुता क्षुत्पिपासा च यदा कालः स भोजने स्यान्नमाह ॥×
आहारं तु रसं कुर्यान्निर्हारमपि सर्वदा उभाभ्यां लक्ष्मपेतः स्यात् प्रकाशे हीयते श्रियः निर्हारो मलमू
त्रोत्सर्गः अन्यच्च आहारनिर्हारविहारयोगाः सदैव सद्भिर्विजने विधेया इति वर्ज्यान्द्रष्टीन्भोजने
वीक्षातीयाः २ निवारयति व्याजानात् हीनदीनक्षुधार्तानां नीचपाखंडरोगिणां कुकुटादिशुनां दृष्टिर्भोजने नेष्टशोभना येषां
दृष्टिः शुभदा तानाह मातृपितृसुहृद्वैद्यपाककृद्धंससर्वहिणां सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा भाजना
न्याह दोषहृद्दृष्टिदं पथ्यं हैमं भोजनभाजनं रौप्यं भवति चाक्षुष्यं पित्तहृत्कफवातकृत् कांस्यं बुद्धिप्रदं रुच्यं

५६ नाशनं रक्तपित्तप्रसादनं पैत्तलं वातकृत् रूक्षमुष्णं च कृमिकफप्रणुत् आयसे काचपात्रे च भोजनं सिद्धिकारकं शोथपां
डुहरं बल्यं कामलापहमुत्तमं शैलजे मृण्मये पात्रे भोजनं श्रीनिवारकं दारुजे च विशेषेण रुचिदं श्लेष्मकारि
च पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत् अथ जलपात्रमाह ॥ जलपात्रं तु ताम्रस्य तदभावे मृदो हितं पवित्रं शीतर
लं पात्रं घटितं स्फटिकेन यत् काचेन रचितं तद्वत् तथा वैडूर्यसंभवं भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं
कांचेकैरचितं४ अग्निसंदीपनं रुच्यं जिह्वाकंठविशोधनं ननु लवणस्य पित्तजनकत्वात् आर्द्रकस्य कटुत्वेन पित्तलत्वात् कथमु
क्तितस्य वृद्धपित्तस्य कथं प्रथमं लवणार्द्रकभक्षणमुचितं उच्यते लवणं सैंधवं ज्ञेयं चंदनं रक्तचंदनं
मिति वचनात् लवणमत्र सैंधवं तत्त्रिदोषघ्नं यतस्तस्य गुणः सैंधवं लवणं स्वादु दीपनं पाचनं लघु
स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत् आर्द्रकं कटुकमपि न पित्तविरोधी मधुरपाकित्वात् तत्रैव
आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी च सा कटुका मधुरा पाके रूक्षा वातकफापहा अथवा अ
न्यदपि लवणमार्द्रकं च न पित्तविरोधी संयोगस्वभावात् संयोगस्वरूपं चैतादृशं भोजनस्य पूर्वं लवणा
र्द्रकभक्षणबोधकं वचनमेव प्रमाणं यत्र भोजनादौ दृष्टिदोषविनाशाय ब्रह्मादीन् स्मरेत् तद्यथा ॥ शिव
५६

मुष्णकाले तदिष्यते घनसारः कर्पूरः वालकं ह्रीवेरं चंदनं घुसृणं चैव तं मृगनाभिसमायुतं न चोष्णं न च वा शी
तं वर्षाकाले तदिष्यते घुसृणं कुंकुमं मृगनाभिः कस्तूरी अनुलेपस्तथा मूर्छा दुर्गंधश्रममदाहजित् सौभाग्य
तेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धनः स्नानेन हीन लोकानामनुलेपोपि नो हितः अथ माल्यधारणगुणाः
सुगंधिपुष्पपत्राणां धारणं कांतिकारकं पापरक्षोग्रहहरं कामौजःश्रीविवर्द्धनं अथाभरणधारणगुणाः
भूषणैर्भूषयेदंगं यथायोग्यं विधानतः शुचिसौभाग्यसंतोषदायकं कांचनं स्मृतं ग्रहदृष्टिहरं पुष्टिकरं
दुःस्वप्ननाशनं पापदौर्भाग्यशमनं रत्नाभरणधारणं माणिक्यं तरणेः सुजात्यममलं मुक्ताफलं शी
तगोर्माहेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मकं देवेज्यस्य च पुष्परागमसुराचार्यस्य वज्रं श
[illegible] नेर्नीलं निर्मलमन्ययोश्च गदिते वैडूर्यगोमेदके अथ वस्त्रादिधारणगुणाः वासःस्कंधरत्नानां
धारणं प्रीतिवर्द्धनं रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमं अथ मांगल्यधारणगुणाः सततं सिद्धमंत्र
स्य महौषध्यास्तथैव च रोचनासर्षपादीनां मांगल्यादीनां च धारणं आयुर्लक्ष्मीकरं रक्षोहरं मंगल
दं शुभम् हिंस्रादिभयविध्वंसि वशीकरणकारणं अथ मांगल्यदर्शगुणाः ततो भोजनवेलायां कु

यस्तन्नमस्याद्युच्चविपर्ययं अस्तु हयामन्नं बलेहेति शीतं शुष्कं च दुर्जरं स्वपिति क्लिन्नं ग्लानिकरं युक्ति
युक्तं हि भोजने अतिद्रुताशिना तारो गुणान् दोषानेव विन्दति भोज्यं शीतमत्युष्णं च स्यादिति लंघित
मिष्यते गुरुत्रिविधं तन्निवारयन्नाह मेदानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् स्वभावतश्च
गुरुयत् तथा संस्कारतो गुरुः मात्रागुरुस्तु मुद्गादिः माषादिः प्रकृत्या गुरुः संस्कारगुरुः पिष्टान्नं प्रोक्त
मित्युपलक्षणं आहारं षड्विधं चोष्यं पेयं लेह्यं तथैव च भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यात् यथोत्त
रं चोष्यं इक्षुदाडिमादि पेयं पानकं शर्करोदकादि लेह्यं रसालाकपित्थादि चर्वितकट्टी इति लोके
भोज्यं भक्तसूपादि भक्ष्यं लड्डुकमण्डकादि चर्व्यं चिपिट चणकादि स्वभावसंस्कारगुरुणः स्वभाव
लघुनश्च भक्षस्य भोजनपरिमाणमाह गुरूणामर्धसौहित्यं लघूनां तृप्तिरिष्यते अयमर्थः माष सं२
पिष्टान्नादिभिरर्धसौहित्यं कर्तव्यं मुद्गादिभिः स्वाभाविक्या मात्रया तृप्तिः कर्तव्येत्यर्थः द्रवोद्रवो
त्तरश्चापि न मात्रागुरुरिष्यते द्रवः पेयादिः द्रवोत्तरः॥ ॥ ॥ ॥

तक्रा [illegible] व्यधिकं ओदनादि मात्रातोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः पेयस्य सर्वतो लघुत्वात् उक्तं
च सुश्रुते पेयलेह्यादिभक्षाणां गुरुं विद्याद्यथोत्तरमिति द्रवाढ्यमपि शुष्कं तु सम्यगेवोप
पद्यते विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति अयमर्थः शुष्कमपि स्रोतोरोधकं रसमपि द्रवार
ढ्यं सम्यक् पाकं याति केवलस्य शुष्कस्यान्नस्य दोषमाह विशुष्कमन्नमित्यादि अपक्वमन्नं किं
भवति इत्यपेक्षायामाह पिंडीकृतमसंक्लिन्नं विदाहमुपगच्छति पिंडीकृते अष्ठीलावत्कृतं अ
संक्लिन्नं चरसम्पर्काद्रहितं विदाहमुपगच्छति विदग्धं भवतीत्यर्थः शुष्कादीनां वैगुण्यमाह॥
शुष्कं विरुद्धं विष्टंभि वह्निव्यापादमावहेत् शुष्कं चिपिटादि विरुद्धं क्षीरमत्स्यादि विष्टंभि चर
णकमसूरादि वह्निमांद्यं कुर्यात् न भुक्त्वा न रदैः छित्वा न निशायां न चावहून् न जलांतरिता न्नद्विः
सक्तून् अद्यान्न केवलान् पुनर्दानं पृथक्पाने सामिषं पयसा निशि दंतच्छेदं न भुंजीत सत्तू सक्तून् वर्ज
येत् सुश्रुतः शक्तूनामाशु जीर्जेति मृदुत्वमबलेहिका विषमासनस्थानमाह बहुशोक मकाले

त

वातेऽग्निर्विषमाशनं आलस्यगौरवाटोपशब्दांश्च कुरुते। अधिकं हीनमात्रं तत्तनोः कार्श्यं करोति च बलक्षयं अ-
धिकं अन्नं। अकालेभुक्तस्य दोषमाह। अप्राप्तकाले भुंजानो ह्यसमर्थतनुर्नरः। तांस्तान्व्याधीनवाप्नोति
मरणं चाधिगच्छति। अप्राप्तकालः कालादर्वाक् प्राक् भुंजानः असमर्थशरीरो भवति तथासति तान् तान्व्या-
धीन् शिरोव्यथा विषूचिकालसकविलंबिकादीन् प्राप्नोति तेषामाधिक्ये मरणमपि प्राप्नोति कालेऽतीत-
तेभुक्तो जंतोर्वायुनोपहते तेनले कृच्छ्राद्विपच्यते भुक्तं न स्याद्द्वितीयं तु पुनःस्पृहा कुक्षेर्भागद्वयं भोज्यैः
तृतीयं वारिपूरं पूरयेत्। वायोः संचारणार्थाय चतुर्थमवशेषयेत्। रसेनान्नस्य रसस्य प्रथमेनोप-
तर्पिता न तथा स्वादुमाप्नोति ततः सेव्यं अंबुनांतरा। अत्यंबुपानान्न विपच्यतेऽन्नमनंबुपानाच्च
स एव दोषः। तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि। भुक्तस्यादौ जलं पीतं कार्श्यमंदा-
ग्निदोषकृत्। मध्येऽग्निदीपनं श्रेष्ठमंते स्थौल्यकफप्रदं। अत्यस्य समस्य स्थूलकृशा भुक्तमध्यांतप्र-
थमाम्बुपाः इति वाग्भटः। भुक्त्वा भोजनं तृषितस्तु न चाश्नीयात् क्षुधितो न पिबेज्जलं तृषितस्तु भवेत्

अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः इति संचिंत्य भुंजाने दृष्टिदोषो न विद्यते॥ न बाधते॥ अंजनी-
गर्भसंभूतं कुमारं ब्रह्मचारिणं दृष्टिदोषविनाशाय हनुमंतं स्मराम्यहं। भोजनक्रममाह। अश्नीयात्
तन्मना भूत्वा पूर्वं तु मधुरं रसं मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान्। फलान्यादौ समश्नीया-
द्दाडिमादीनि बुद्धिमान्। विना मोचाफलं (केलाफल) तद्वत् वर्ज्जनीया च कर्कटी। मृणालविशशालूककंदेक्षुप्रभृती-
न्यपि पूर्वमेव हि भोज्यानि न तु भुक्तो कदाचन। मृणालं पद्मनालं विशं भसीडु शालूकं कंदप्रसीद्धं गुरुविष्टंभि यं द्रव्यं
तंडूलान्पृथुकानपि (चिउरा) न जातु भुक्तवान्खादेन्मात्रां खादेद्बुभुक्षितः। घृतपूर्वं समश्नीयात् कठिनं प्राक्ततो मृदु
बला द्रोगन मुं चति ७ अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुंचति। अयमर्थः प्राक् घृतं पूर्वं कठिनं समश्नीयात्। यथा काश्मीरदिवासिनः॥
प्रथमं सर्व्यंजनां घृतपूर्वां रोटिकां भुंजते ततो मृदुसपूपादिकमोदनं भुंजते अंते पुनः द्रवाशीति भोजनां-
ते दधितक्रदुग्धादि भुंजते। यद्यत्स्वादुतरं तत्तद्विदध्यादुत्तरोत्तरं भुक्त्वा यत्प्रार्थ्यते भूयस्तत्स्वा-
दु तो स्वादुभोजनं स्वाद्वन्नस्य गुणमाह। सौमनस्यं बलं पुष्टिमुत्साहं रसनासुखं स्वादु संजन

मितोपि तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन कफस्यापि वृद्धिरूपक्षीणं भवति क्षीणकफवृ
द्धिरग्निमांद्यादीन् व्याधीन् उत्पादयितुं न शक्नोति ननु शत्रोर्नाशनेन शत्रुहंतुर्वृद्धिर्दृश्य
ते न तु क्षीणत्वं तत्कथं कफः क्षीयत इति उच्यते बलवच्छत्रुविनाशनेन शत्रुहंतुः क्षीणता च दृ
श्यते तथा च नाशनात् प्रत्यनीकस्य स्वयं च क्षीयते यथा वह्निसंतप्तलोहस्य तप्ततां नाशयेज्जलं ननु
भोजनावसानसमये भुक्तः कटुतिक्तकषायरसः कफं शमयिष्यति वातस्य वृद्धिं विधास्यति इति चेत् तन्न
कट्वादीनां क्षीणशक्तिकत्वात् तथा च यदेकं नाशयेत् दोषं तन्नान्यं वर्धयेत् कुतः नाशनादेकदो
षस्य यतस्तात् क्षीणशक्तिकमिति वस्तुतः य एव रसः प्रान्तेऽपि भुक्तस्य स एव रसो वशो भवति यत
श्चात् सुश्रुतः जग्धाः सर्वेपि गच्छंति बलिनो वश्यतां रसाः यथा प्रकुपिता दोषा वशं यांति बलीयस इति
बलिनः रसस्य बलीयसः दोषस्य एवं भुक्त्वा समाचरेत् दूषणग्रहणपूर्वकं भोजने दंतलग्नानि निर्हृ
त्य प्रमनेचरेत् दंतान्तरगतं चान्नं शोधनेनाहरेच्छनैः कुर्यादनिर्हृतं तद्धि मुखस्यानिष्टगंधतां दं

तलग्नमनिर्हार्यं लेपं मन्येत दंतवत् न तत्र बहुशः कुर्याद्यत्नं निर्हरणं प्रति आचम्य जलयुक्ता ×
भ्यां पाणिभ्यां चक्षुषी स्पृशेत् भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते यदि अचिरेणैव तत् हारि तिमिरा
णि व्यपोहति भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन् सुखावहान् विष्णुरन्नस्त्वथ चैवान्नपरिणामश्च
वै यथा सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं तथा अगस्तिरग्निर्वडवानलश्च भुक्तं ममान्नं जरय
त्वशेषं सुखं मम तत्परिणामसंभवं यच्छत्वरोग्यं मम चास्तु देहे अंगारकमगस्तिं च पावकं सूर्यम
श्विनौ पंच एतान् संस्मरेन्नित्यं भुक्तं तस्याशु जीर्यति इत्यन्नं स्वहस्तेन परिमार्ज्य तथोदरं अना
यासप्रदायीनि कुर्यात् कर्माण्यतंद्रितः जाग्रतस्तिष्ठतो वा स्वप्यात् भुक्तमात्रस्य तु स्वपतः संप्र
ग्निं कुपितः कफ इति वचनात् जीर्णेऽन्ने वर्धते वायुर्विदग्धोपि तु पित्तं मध्ये भुक्तमात्रे कफः आपि
कृमो यं भोजनोपरि विदाहे किंचित्पक्वे किंचिदपक्वे भुक्तमात्रे संजातस्य कफस्य प्रतीकारमाह ×
धूमेनाद्यैः धूपैर्वा चोद्धृत्य दोषं वा कषायकटुतिक्तकैः पूगकर्पूरकस्तूरीलवंगसुमनःफलैः फलैः कटुक

आयासो श्रमः न आयासो ऽनायासः श्रमरहितः सन् ४

षायैः वा मुखवैशद्यकारिभिः तांबूलपत्रसहितैः सुगंधैर्वा विचक्षणः धूमेन अगुर्वादिधूमेन वा अपो
ह्य कफं दूरीकृत्य हृद्यैर्मनोहरैः कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरीलवंगादिभिः पूगैः क्रमु
कैः सुमनःफलैः जातीफलैः एलातरीतक्यादिफलैः रते सुप्तोत्थिते स्नाते भुक्ते वांते च संगरे स
भायां विदुषां राज्ञां कुर्यात् तांबूलचर्वणं प्रत्यूषसि भुक्तसमये वरयुवतीनां च संगमे निधने वि
द्वद्रूपसभायां तांबूलं यो न खादेत् स पशुः प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा निशायां चू
र्णमधिकं तांबूलं भक्षयेत् सदा अथ तांबूलचर्वणगुणाः तांबूलमुक्तं तीक्ष्णोष्णं रोचनं तुवरं
सरं तिक्तं क्षारोष्णं कामकरं कफपित्तकरं लघु वश्यं श्लेष्मास्यदौर्गंध्यमलवातश्रमापहं मुखवै
शद्यसौगंध्यकांतिसौष्ठवकारकं हनुदंतमलध्वंसि जिह्वेंद्रियविशोधनं मुखप्रसेकशमनं गला
मयविनाशनं नवं तदेव मधुरं कषायानुरसं गुरु विलासजननं प्रायः पत्रशाकगुणं स्मृतं
वंगदेशोद्भवं पर्णं वरं कटुरसं सरं पांचजन्यं पित्तजनकं मुष्कं कफहरं मतम् पर्णं पुराणमकटु क्षुल्ल
कं तनुपांडुरं विशेषात् गुणवद् हृद्यमन्यद्धीनगुणं स्मृतं अथ क्रमुकगुणाः पूगं गुरु हिमं रूक्षं क

गुल्मी क्षुधितस्तु जलोदरी न नु शिष्टां भोजनांते दुग्धं पिबंति तत्कथमुचितं यतस्त्रिधाविभक्तस्य भोजन
कालस्य प्रथमो भागो वातस्य द्वितीयं पित्तस्य तृतीयं कफस्य अतएवाह अस्त्रीयाया तन्मनाभुक्ता पूर्वं
तु मधुरं रसं मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् अस्यायमभिप्रायः भोजने पूर्वं भुक्तो मधुरो रसो बु
भुक्षितस्य वातपित्तयोः समको भवति भोजनमध्ये भुक्तौ अम्ललवणौ पित्ताशये च वह्निवृद्धिं कुर्वतः भोज
नांते समये भुक्ताः कटुतिक्तकषायरसाः कफं शमयंति अतो भोजनावसानसमये स्य कफकालत्वात्
तत्र कथं श्लेष्मजनकं दुग्धं पातुमुचितं भवति यतउक्तं दुग्धं स्वादुरसं स्निग्धं ओजस्यं धातुवर्द्धनं
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलं इति उच्यते विदाहीन्यन्नपानानि यानि भुक्ते हि मानवः
तद्विदाहप्रशांत्यर्थं भोजनांते पयः पिबेत् अतएव चक्रपाणिः कुर्यात् क्षीरांतमाहारं न दध्यं
तं क्वचनेति लवणाम्लकटूष्णानि विदाहीन्युच्यंति यानि तु तद्दोषं हन्तुमाहारं मधुरेण समाप
येत् इति भोजनावसानसमये दुग्धादिमधुरभोजनैनैव वर्द्धितः कफो लवणाम्लकटुभोजनज

ल्लो नामेरूर्द्ध्वेऽस्ति जंतुनां तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थं त्रिदोषशमनी खट्वा तूलीवातक ×
फापहा भूशय्या वृंहणी वृष्या काष्ठपट्टी तु वातला स्तस्यः पुनराह भूशय्या वातला वृष्या रूक्षा पित्ता
स्रनाशिनी सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदं श्रमानिलहरं वृष्यं विपरीतमतोऽन्यथा संवाहनं मांसरक्त
प्रसादकरं परं प्रीतिनिद्राकरं वृष्यं कफवातश्रमापहं प्रवातं रौक्ष्यवैवर्ण्यस्तंभकृद्दाहपित्तनुत् स्वेदमूर्च्छापि
पासघ्नमप्रवातमतोऽन्यथा सुखप्रवातं सेवेत ग्रीष्मे शरदि चांतरा निर्वातमायुषे सेव्यमारोग्याय च सर्वदा पू
र्वोऽनिलो गुरुः सोष्णः स्निग्धः पित्तास्रदूषकः विदाही वातलः सोऽतिकफशोषवतां हितः स्वादुः पटुरभिष्यं स५
दी त्वग्दोषार्शोविषक्रिमीन् संनिपातज्वरश्वासामवातं च कोपयेत् स्वादुः भक्ष्य द्रव्येषु वातुल्य नम
धुररसजनकः दक्षिणः पवनः स्वादुः पित्तरक्तहरो लघुः वीर्येण शीतलो बल्यश्चक्षुष्यो न च वातलः
पश्चिमः पवनस्तीक्ष्णः शोषणो बलहृल्लघुः मेदःपित्तकफध्वंसी प्रभंजनविवर्द्धनः उत्तरो मारुतः शी
तः स्निग्धो दोषप्रकोपकृत् क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः दोषप्रकोपकृत्तेस्यातुराणां यो

ऽग्नेयो दाहकृद्रूक्षो नैर्ऋतो न विदाहकृत् वायव्यस्तु भवेत्तिक्त ऐशानः कटुकस्ततः विष्वग्वायुरना
युष्यः प्राणिनां बहुरोगकृत् अतस्तं नैव सेवेत सेवितस्स्यान्न शर्मणे व्यजनस्यानिलो दाहस्वेदमूर्च्छा
श्रमापहः तालवृंतभवो वातस्त्रिदोषशमनो मतः वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपनः चामरो व
स्त्रसंभूतो मयूरो वेत्रजस्तथा एते दोषजितां वाताः स्निग्धाः हृद्याः सुपूजिताः दिवास्वापं न कुर्वीत यतोऽ
सौ स्यात्कफावहः ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिध्यते उक्तेनोहि दिवास्वापो निसं येषां शरीरि
णि वातादयः प्रकुप्यंति तेषामस्वपतां दिवा व्यायामप्रमदाध्वक्लांतेन रतामदक्लांतानतीसारिणः शू
लश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान् क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धान्रर
साजीर्णिनो रात्रौ जागरितान्नरान्निरशनान्कामं दिवा स्वापयेत् दिवा वा यदि वा रात्रौ निद्रा ऽ
पत्रोऽक्षरप्रश्लेषः सात्मीकृता तु यैः न तेषां स्वपतां दोषो जाग्रतां चोपजायते स्वपतां दिवा जाग्रतां रात्रौ भोजनानंतरं नि
द्रा वातं हरति पित्तहृत् कफं करोति वपुषः पुष्टिं सौख्यं तनोति हि शयनं पित्तनाशाय वातनाशाय म

द्दिनं वमनं कफनाशाय ज्वरनाशाय लंघनं आसीनं घूर्णितं यत्तु नाभिच्छेदि नरूक्षणं अपरान
थ दृष्टोऽन्नस्य संस्थापने हेतुमाह शब्दान् स्पर्शांश्च रूपाणि रसान् गंधांश्च मनःप्रियान् भुक्तवान
पि सेवेत तेनान्नं साधु तिष्ठति उदरे इति शेषः अन्नस्योदरेऽस्थितिहेतुमाह अस्य दुःस्पर्शस्तथा
रूपं रसो गंधो जुगुप्सितः भुक्तमप्रयतं चान्नमतिहास्यं च वामयेत् अप्रयतमपवित्रं अन्यदपि
वर्ज्जनीयमाह शयनं चासनं शौति न भजेन्न द्रवाधिकं नाग्न्यातपौ न प्लवनं न यानं नापि वाहनं
प्लवनं बाहुभ्यां जलप्रतरणं यानं मार्गे चलनं वाहनं अश्वादि व्यायामं च व्यवायं च धावनं यानमे
व च युद्धं गीतं च पाठं च ~~मुहुः~~ मुहूर्तं भुक्तवान् स त्यजेत् परिवर्जनकार्यं अजीर्णस्य हेतुमाह अत्यम्बुपा
नात् विषमासनाच्च संधारणात् स्वप्नविपर्ययात् कालेपि सात्म्यं लघु चापि भुक्तमन्नं न सम्यक् परि
पाकमेति ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन प्रद्वेषयुक्तेन च सेव्यमानमन्नं न
सम्यक् परिपाकमेति संधारणात् अधोवातमलमूत्रादीनां अधःसनलक्षणमाह अजीर्णे भुज्यते

चूर्णेनान्वितं प्रथमतो भुक्तं पर्णं ४

षायं कफपित्तनुत् मोहनं दीपनं रुच्यमास्यवैरस्यनाशनं पूगं स्याद्दृढमध्यं यत् स्विन्नं वा पित्तदोषनुत् सरसं गुर्वभिष्य
न्दि तद्वह्निवस्तिनाशनं नागवल्ल्या गुणाः खदिरः कफपित्तघ्नः चूर्णं वातबलासनुत् संयोगतस्त्रिदोषघ्नं सौमन
स्यं करोति च मुखवैशद्यसौगंध्यकांतिसौष्ठवकारकं आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता तस्मादग्रं त
था मूलं मध्यं पर्णस्य वर्जयेत् पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः चूर्णपत्रं हरत्यायुः शिरा बुद्धिवि
नाशिनी आद्यं विषोपमं पीकं द्वितीयं भेदि दुर्जरं तृतीयं न तु पातव्यं सुधातुल्यं रसायनं तांबूलं नातिसे
वेत न विरिक्तो बुभुक्षितः देहदृक्केशदंताग्निश्रोत्रवर्णबलक्षयः शोषः पित्तानिलासृक्स्यादति तांबूल
भक्षणात् तांबूलं नैव सेवेत क्षीरं पीत्वा हि मानवः पांडुत्वं दंतरोगं च नेत्ररोगं तथैव च करोति मुखशोषं
च तांबूलमितिभक्षितं तांबूलं नहितं दंतदुर्बलेक्षणरोगिणां विषमूर्छामदार्त्तानां क्षयिनां रक्तपित्तिनां अ
कोशात् पदं गच्छेत् शनैः स्तेनं तु जायते अन्नसंघातशैथिल्यं ग्रीवाजानुकटीसुखं भुक्तोपविशतस्तुंदं शर
यानस्य तु पुष्टता आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः चंक्रममाणस्य पदशतं शनैर्गच्छतः श्वासा
न् स्तो समुत्तानः स्तान् द्विः पार्श्वे तु दक्षिणे ततस्ततो द्विगुणान्वामे पश्चात्स्वप्याद्यथासुखं वामदिशायामन

भावप्र०
६२

नक्करणं नेत्र्यमायुष्यं पादरोगहृत् सुखप्रचारमोजस्यं वृष्यंच परिकीर्तितं पादाभ्यामनुपानत्कं
सदा चंक्रमणं नृणां अनारोग्यमनायुष्यमिंद्रियघ्नमदृष्टिदं छत्रस्य धारणं वर्षातपवातरजोपहं
हिमघ्नं हितमक्ष्णोश्च मांगल्यमपि कीर्तितं सहोत्साहं बलस्थैर्यधैर्यवीर्यविवर्द्धनं अवष्टं
भकरं चापि भयघ्नं दण्डधारणं ऊर्ध्वाछादनसंयुक्ता शिविका सर्ववल्लभा अस्यामारोहणं
नृणां त्रिदोषशमकं मतं वातश्लेष्मगदार्त्तानामहिता भ्रमकृन्नरिः पित्तानिलाकरो हस्ती लक्ष्म्यायुः
पुष्टिवर्द्धनः घोटकारोहणं वातपित्ताग्निश्रमकृन्मतं मेदोवर्णकफघ्नंच हितं तु बलिनां परं अश्व
पःस्वेदमूर्च्छासकृत् पित्तहृत् छत्रं लघु माक्षमान्दाहं विवर्णतां कुर्यादेतान्स्थायायाव्यपोहति वर्हिवर्हव्यात्रिमा
वल्यानिद्रालस्यविधायिनी भयापहा मोहकरी कुहतिः कफवातला कुहतिः कुहिरा इति लोके अग्निः
वातकफस्तंभशीतवेपथुनाशनः आमाभिष्यंदशमनो रक्तपित्तप्रकोपनः सद्यश्लेष्मकरो धूमोने
त्रयोरहितोभृशं॥

शिव
६२

शिरोमोरवक्कस्त्रापि वातंपित्तंप्रकोपयेत् अथाचारः मैत्रीं सद्भिरसद्भिश्च कुर्यात्सत्सु तु सर्वथा सं
सर्गसाधुभिः कुर्यादसत्संगं परित्यजेत् सत्सु तु सर्वथा सज्जनेषु मनोवाक्कर्मभिः सेवेत् देवभू
देवद्रव्यवेदान्नपातिथीन् विमुखान्नार्थिनः कुर्यान्नावमन्येत कानपि गुरूणां संनिधौ तिष्ठेत्स
दैवविनयान्वितः पादप्रसारणादीनि तत्रनैव समाचरेत् अपकारपरेऽपि स्यादुपकारपरः पुमा
न् आत्मवत्सकलान्पश्येत् वैरिणो दूरतो वसेत् नकिंचिदात्मनः शत्रुं नात्मनः कस्यचिद्रिपुं
प्रकाशयेन्नापमानं नच निस्नेहतां प्रभोः नात्मानमुदके पश्येन्न नग्नः प्रविशेज्जलं तथानाज्ञा
तगांभीर्ये न हिंस्रप्राणिसेवितं कालेहितं मितं सत्यं संवादं मधुरं वदेत् भुंजीत मधुरंप्रायःस्नि (मकरादिसेवितंजलं न विशेत्)
ग्धं कालेहितं मितं नरात्रौ दधि भुंजीत नचनिल्लवणं तथा नामुद्गसूपं नाक्षौद्रं नचाप्यघृत
शर्करं जनस्याशयमालक्ष्य यो यथा परितुष्यति तं तथैवानुवर्तेत पराराधनपंडितः नैकः सुखी
नसर्वत्र विश्रब्धो नच शंकितः नोद्यमाद्विरमेत्[illegible]त् क्वापि हेता क्लीब्ये तफले नेतु

भावप्र०
६४

॥

हेतैः फूत्कारेताकुत्कृमे फूत्कृलेधनादौ वेगं न धारयेत् किंचिन्मन्ये वेगान्विधारयेत् नपीड
येदिंद्रियाणि न चैतान्यतिलालयेत् वर्षातपादिषु छत्री दंडी रात्र्यटवीषु च सोपानत्
कस्तानुरक्षेत् विचरेद्युगमात्रदृक् अग्रतो हस्तचतुष्टयमात्रां भूमिं पश्यन् नदीन्तरे मिता॰२
न बाहुभ्या नाग्निस्कंधमभिव्रजेत् संदिग्धनावं वृक्षं च नारोहेत् दुष्टयानकं दुष्टगज
घोटकादि नासेवेत मुखं छत्कुर्यात्सभायां सुविचक्षणः कासं हासं तथोद्गारं जृंभणं
क्षवथुं तथा नासिकां न विकुष्णीयान्नासितोत्कटकः क्वचित् नोर्ध्वजानुश्चिरं तिष्ठेन्
नखैर्न लिखेद्भुवं संमार्जनीरजो नैव देहे दध्यात्कदाचन न नखेन तृणं छिंद्यान्नोछि
ष्टो ब्राह्मणं स्पृशेत् नोपरक्तं न चोद्यंतं नास्तयांतं दिवाकरं सर्वथा न समीक्षेत न जलेप्र
तिबिंबितं नेक्षेत सततं तस्य क्षयं दीप्तामेधाप्रियाणि च पौरंदरं धनुर्नैव दर्शयेत्कमपिक

शि.व.
६४

मितंक्षोर्षः स्वंभोजनं अन्नकाले भुक्त्वा ६

यत्तु तदध्यशनमुच्यते तन्निरिवारयन्नाह प्राग्भुक्ते त्वनलमंदे द्विरन्नं न समाहरेत् अस्यायमर्थः प्रात
र्भुक्तेऽजीर्णे सति अन्नस्यैव पुनर्न भुंजीतेत्यर्थः रात्रौ पुनस्तथाविध सति भुंजीतैव यत्त आह सुश्रुत एव
प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यतीति पूर्वभुक्ते विदग्धेऽन्ने भुंजानो हंति पावकं अस्यायमर्थः
पूर्वभुक्ते रात्रिभुक्तेऽन्ने विदग्धे किंचित्पक्वे किंचिदपक्वे प्रातर्भुंजानः पावकं हंतीत्यर्थः यत्तश्चा
ह सायमाशे त्वजीर्णे तु प्रातर्भुक्ते विशेषमभिति शायमाशाजीर्णेऽपि जनो पादमात्र भवेद्यदि प्रातर
जीर्णशंका तदाभयां नागरसैंधवाभ्यां विचूर्णितां शीतजलेन भुक्त्वा भुंजीत शंकितो मितमन्नका क्षौ॰५
ले आयुःक्षयभयाद्विद्वान्नातिसेवेत कामिनीं अवशो यदि सेवेत तदा ग्रीष्मवसंतयोः अवशः
अजितेन्द्रियः स्त्रीस्पर्शा (स्थितिः) वर्णकफस्थौल्यसौकुमार्यसुखप्रदा अरूक्षा वर्णकफस्थौल्यसौकुमार्य
विनाशनः यत्तु च क्रमनं नातिदेहपीडाकरं भवेत् तदायुर्बलमेधाग्निप्रदमिंद्रियबोधनं उ
ष्णीषकांतिकृत्केश्यं रजोवातकफापहं लघुतत्वस्य सेनेयस्मा कुरुपित्ताक्षिरोगकृत उपा

भावप्र०
६५

कुर्य्याद्दवश्याद्यो निर्लेकप्नूं तमोभयावहं मेहद्दिशोतु जननं भवेत् पित्तहृत्कफकृत्कामव
र्द्धनं त्वामकृच्चतत् रात्रौ भोजनं कुर्य्यात् प्रथमप्रहरान्तरे किंचिदूनं समश्नीयात् दुर्जरं तत्र वर्जये
त् शरीरे जायते नित्यं देहिनां सुरतस्पृहा अव्यवायात् मेहमेदोवृद्धिः शिथिलताऽतनोः बालेति गीयते ना
री यावद्वर्षाणि षोडश ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधिः तदूर्द्ध्वमधिरूढा स्यात् पंचाशद्वत्सर
रावधिः वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता अधिरूढा प्रौढा निदाघशरदोर्बाला हिता विषयिणे
मता तरुणी शीतसमये प्रौढा वर्षावसंतयोः नित्यं बालासेव्यमाना नित्यं वर्द्धयते बलं तरुणी ह्रासये ५८
च्छक्तिं प्रौढोत्पादयते जरां सद्योमांसं नवं चान्नं बालास्त्री क्षीरभोजनं घृतमुष्णोदकं स्नानं स
द्यः प्राणकराणि षट् पूतिमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि प्रभाते मैथुनं निद्रा सद्यः प्राण
हराणि षट् प्राणशक्तिबलकारी बालार्कः कन्यार्कः वृद्धोपि तरुणीं गत्वा तरुणत्वमवाप्नुयात्
वयोधिकां स्त्रियं गत्वा तरुणः स्थविरायते न्यायसंक्रान्तो अमन्दजरा वपुर्वर्णबलान्विताः स्थिरोपचित शिव
६५

मांसाश्च भवंति स्त्रीषु संयताः सेवेत कामतः कामं बलाद्यर्जितस्तो हिमे प्रकामं तु निषेवेत मैथुनं शिशिरागमे
वसंतशरदोः पक्षाद्वर्षानिदाघयोः सुश्रुतस्तु त्रिभिः त्रिभिरहोभिर्हि समेयात्प्रमदां नरः सर्वेष्वृ
तुषु घर्मेषु पक्षात्पक्षाद्व्रजे बुधः समेयात् समागच्छेत् घर्म्मे ग्रीष्मे शीते रात्रौ दिवा ग्रीष्मे वसंतेतु
दिवानिशि वर्षासु वारिदध्वाने शरत्सु सरसः स्मरः नोपेयात् पुरुषो नारीं संध्ययोर्न च पर्वसु गो
सर्गेऽर्द्धरात्रे च तथा मध्यंदिनेपि च विहारं भार्य्यया कुर्य्यात् देशे तिशय संवृते रम्ये श्लाघ्यांग
नागारे सुगंधे सुखमारुते देशे गुरुजनासन्ने विरतोतिप्रपाकेर अभ्यवहाहेतु वत्ननेवरस्मे
तन स्नातः चंदनलिप्तांगः सुगंधः सुमनोन्वितः भुक्तवृष्यः सुवसनः सुवेषः समलंकृतः तांबूलवदनः
पत्न्यामनुरक्तोऽधिकस्मरः पुत्रार्थी पुरुषो नारीमुपेयाद्रुचने शुभे प्रहर्षिताद्यतिः वृत्रहान्सव्यया
गोपि पासितः बालो वृद्धोऽन्यवेगार्तस्त्यजे द्रोगी च मैथुनं रोगी मैथुनं सेवत् क्षयरोगयुक्तः भार्य्यां रूपगु
णोपेतां तुल्यशीलां कुलोद्भवां अभिकामाभिकामान्तु हृष्टा हृष्टामलंकृतां सेवेत प्रमदां युक्त्या वाजी
करणबृंहितः रजस्वलामकामां च मलिनामप्रियां तथा वर्णवृद्धां तथा व्याधिप्रपीडितां हीनांगीं

भावप्र०
६६

गर्भिणीं दुःखं योनिरोगसमन्वितां सगोत्रां गुरुपत्नीं च तथा प्रव्रजितामपि नाभिगच्छेत् पुमान्नारीं भू-
रि वै गुणपशङ्कया रजःस्वलां गतवत्तो नरस्या संयतात्मनः दृष्ट्यायुस्तेजसां हानिरधर्मश्च ततो भ-
वेत् लिङ्गिनीं गुरुपत्नीं च सगोत्रामथ पर्व्वसु वृद्धां च संध्ययोश्चापि गच्छतो जीवनक्षयः लिङ्गिनी
प्रव्रजिता नारी गर्भिण्या गर्भपीडा स्याद्व्याधितायां बलक्षयः हीनाङ्गीं मलिनां द्वेष्यां वृद्धामां वंध्या-
म संस्पृते देशे गच्छेन्नारीं ततः स्त्रीणां ग्लानं मनो भवेत् गर्भिणी गर्भवासदिवसाद्द्वितीये मासि
गर्भस्थिते इति निश्चये यथोक्तनक्षत्रादिलाभाभावे वा तृतीयेपि मासि पुंसवने कृते नाभिगच्छे-
त् ~~यतः पुंसवनानन्तरं~~ स्त्राहुर्व्यासः ततस्तु जेन्नदीस्नानं देवखातोदकं तथा भर्तुः शय्यां मतापस्
तथैवामिषभोजनं ~~स्त्रन्यच~~ आमिषस्याशनं यत्नात्प्रमदा परिवर्जयेत् देवारामनदीयानं प्र-
कोष्ठुद्बरस्य वेत्ति क्षुधितः क्षुध्यापि तस्य मध्याह्ने तृषितो बलः स्थितस्यत्तानिशुक्रस्यकायोः
कौपं च विंदाति व्याधितस्य रुजापीडा मृदुर्धर्मस्य च जायते प्रत्यूषश्चार्द्धरात्रे च वातपित्तप्रकु- शिव ६६

गायं नता उवेत् केशान् ९
स्थानीर

कच्चित् नेच्छेद्बलवतां युद्धं न भारं शिरसा वहेत् नात्र नैनोदयेत् केशान् हस्तेन धुनुयात्
न्न च नगच्छेत पूज्ययोर्मध्ये दंपत्योरंतरेण च रिपोरन्नं न भुंजीत गणिकान्नमपि क्वचित्
जामिनीर प्रतिभूर्नैभवेत् क्वापि न च साक्षी क्वचिद्भवेत् स्वाङ्गीन्न धारयेद्ज्ञातु च्युतं दूरात्परित्यजेत्
विश्वासं नाचरेत्स्त्रीणां ताः स्वतंत्राश्च नाचरेत् रक्षणीयाः सदा यत्नाद्यौवने तु विशेष-
तः न भिन्नेशयने स्वप्यान्नाने कविवरेपि च नैकेदेवालये नैव रात्रौ तरुतलेपि च एवंदि-
नानि गमयेत्सदाचारपरः सदा ततो रात्रिप्रयुक्तानि कुर्यात्कर्माणि मानवः इत्याचारंस
मासेन भावितं यः समाचरेत् सविंद्यादायुरारोग्यं प्रीतिं धर्मं धनं यशः ~~अथ संध्यायां~~
~~निषिद्धानि कर्म्माण्याह~~ एतानि पंचकर्माणि संध्यायां वर्जयेद्बुधः आहारं मैथुनं निद्रां सं-
पाठं गतिमध्वनि भोजनाज्जायते व्याधिर्मैथुनाद्गर्भवैकृतं निद्रया निःस्वता पाठादायुर्हा-
नि गतेर्भयम् ~~अथ रात्रिचर्या~~ ज्योत्स्ना शीता स्मरानंदप्रदा तृट्पित्तदाहहृत् ततो हीनैर्गुणैः

वलंधिः

माव॰प्र॰
६८

भसः प्रसृतीरष्टौ रवावनुदिते पिबेत् इति सलिलस्यात्र पर्युषितस्य ग्रहणं भोजनवचनानुरोधात्
अर्शः शोथग्रहण्यार्त्तिज्वरजठरजराकोष्टमेदोविकारामूत्राघातास्रपित्तश्रवणगलशिरःश्रोणि॰
शूलाक्षिरोगाः ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जंतोस्तांस्तानभ्यासयोगादपहरति पयः पीतमं
ते निशायाः विगतघननिशीथे प्रातरुत्थाय नित्यं पिबति खलु नरो यो घ्राणरंध्रेण वारि स भवति मतिपूर्ण॰
श्चक्षुषा तार्क्ष्यतुल्यो वलिपलितविहीनः सर्वरोगैर्विमुक्तः निशीथोऽत्र निशांधकारः पातव्यं नासया नीरं प्रसृ
तित्रयमात्रया व्यंगवलीपलितघ्नं पीनसवैस्वर्यकासशोथहरं रजनीक्षये मुनस्यं रसायनं दृष्टिप्र
सादजननं स्नेहपीते क्षते शुद्धे वा ध्माने स्तिमितोदरे हिक्कायां कफवातोत्थे व्याधौ तद्वारि वारयेत्
तद्वारि नासापेयं अथर्तुचर्या चयकोपसमा यस्मिन् दोषाणां संभवन्ति हि ऋतुषट्कं तदाख्यातं रवेः समाद्रिः
राशिषु संक्रमात् ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृण्मिथुनकर्कटौ सिंहकन्ये स्मृता वर्षा तुलावृश्चि॰
कौ शरत् धनुर्ग्राहौ च हेमंतौ वसंतः कुंभमीनकौ मेषवृषयो रवेः संक्रांतौ एवं मिथुनकर्कटादिष्वपि

शिव
६८

उत्तरायणमादानं मध्यदक्षिणं बले दक्षिणायनमाख्यातो विसर्गोत्रिबलीशशी॰

१ अन्ये तु शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः माघादिमासयुग्मैः स्युः ऋतवः षट् क्रमादमी गंगा
४ या दक्षिणे देशे वृष्टेर्बहुलभावतः उभौ मुनिभिराख्यातौ प्रावृड्वर्षाभिधावृतू उत्तरायणमाद्या॰
द्यैस्तैः परैः दक्षिणायनं आदानमुष्णं बलहरं ततोन्यद्बलदं हिमं हेमंतः शीतलः स्निग्धः स्वादुजठ
रवह्निकृत् शिशिरः शीतलोतीव रूक्षो वाताग्निवर्द्धनः हेमंतः स्वादुप्रायेण द्रव्येषु स्वादुरसः॰
जनकः एवमन्यत्रापि बोधव्यं वसंतो मधुरः स्निग्धः श्लेष्मवृद्धिकरः स्मृतः ग्रीष्मो रूक्षोऽतिकटु
कः पित्तकृत्कफनाशनः वर्षाः शीता विदाहिन्यो वह्निमांद्यानिलप्रदाः शरदुष्णा पित्तकर्त्री न्यूनम
ध्यबलावहा चयप्रकोपोपशमा वायोर्ग्रीष्मादिषु त्रिषु वर्षादिषु च पित्तस्य श्लेष्मणः शिशिरा
दिषु चीयते लघुरूक्षाभिरौषधीभिः समीरणः तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति
तद्विधो रूक्षो लघुश्च तद्विधे तु स्नेहलघौ च अद्भिरम्लविपाकाभिरौषधीभिश्च तादृशं पित्तं याति
चयं कोपं न तु कालस्य शैत्यतः तादृशं अम्लविपाकं चीयते स्निग्धशीताभिरुदकौषधिभिः कफः तुल्ये॰

तद्विधः लघुरूक्षपदार्थः॥ तद्विधे देहे पि वायोः कोपं न याति कस्मात् कालस्यौष्ण्यात् कालस्य प्रधानत्वात् दोषो न कुप्यतरति २४

भावप्र०
६८

पिकालेदेहत्वात्स्कन्नत्वान्नप्रकुप्यति तुल्येपिकालेस्निग्धेशीतलेन देहेस्कन्नत्वात् देहेशुष्कत्वात् हिमे
यातिसंमपित्तं वायुःश्लेष्मा च चीयते सवायुःशिशिरेकोपं यासुर्येपतत्तेकफः हेमन्तेसंचितःश्लेष्माशिशिर
शिरेलतिचीयते शीतस्निग्धगुरुद्रव्यैः शैत्यात्स्कन्नोनकुप्यति स्कन्नः कठिनीभूतः इतिकालस्य
भावेपमातारादिवशात्पुनः चयादीन्यांति सर्वोपि दोषाः कालेविशेषतः चयकोपशमाः पूर्वा
न्हे वसंतस्य लिंगं मध्याह्ने ग्रीष्मस्य अपराह्णे प्रावृषः प्रदोषो वार्षिकं शारदमर्द्धरात्रे प्रत्यु
षसि हैमंतमुपलक्षयेत् एवमहोरात्रमपि वर्षमिव शीतोष्ण वर्षादोषोपचय प्रकोपोपशमैः
जानीयादिति सुश्रुतः सर्वोपि दोषाः कालेविशेषतः चयकोपशमान्दोषा विहाराहारसेवनैः स
मानैर्यांति कालेपि विपरीतैर्विपर्ययं दोषाविहाराहारसेवनैः समानैः तुल्यैः ऋतुचर्यादियो
ग्यैरिति यावत् विपर्ययंकालेवैपरीत्यं चयलक्षणमाहतुसुश्रुतः स्वस्थानस्थस्य दोषस्य वृद्धिः
स्यात्तल्लक्षकोष्ठता पितावभासिता वह्निमंदता चांगगौरवं स्वालस्यं चयहेतौ तुद्वेषश्च चयलक्ष

शिव
६८

ष्यतः तीर्थ्यंगान्नावयोर्नैव कुर्वयोर्नैतथैवच उपदेशस्तथा वायोः कोपः शुक्रसुखक्षयः
उच्चारिते मूत्रिते च रेतसश्च विधारणे उत्ताने च भवेच्छीघ्रं शुक्राश्मर्य्यास्तु संभवः सर्वमेतत्तु जे
तस्माद्यतो लोकद्वयाहितं शुक्रेतूपस्थितं मोहान्न संधार्यं विशेषतः स्नानं सशर्करं क्षीरं भक्ष्य
मैक्षवसंस्कृतं वातो मांसरसः स्वप्नो व्यवायांते हिताक्रमी शूलकासज्वरश्वासकार्श्यपांडुमय
क्षयाः अतिव्यवायात् जायंते रोगाश्चाक्षेपकादयः रात्रौ जागरणं रूक्षं कफदोषविकारजित् र
निद्रा तु सेविता काले धातुसाम्यमतंद्रितां पुष्टिं वर्णं बलोत्साहं वह्निदीप्तिं करोति हि योलेपिश
यनसमये मधुमिश्रं बीजपूरदलचूर्णं सद्य उद्गारवातप्रसरनिरोधात्सुखं स्वपिति सवितुरुदय
काले प्रसृतीः सलिलस्य पिबेद्यः रोगजरापरिमुक्तो जीवेद्वत्सरशतं साग्रं स्वस्य जलपानस्यो
पक्रमकालो रात्रेश्चतुर्थप्रहरस्य प्रवेशः तथा च भोजः पिबति पर्युषितं जलमन्वहं तिमिरिणीचरमप्रह
रेयदि एतज्जलपानकालमर्यादा सूर्योदयात् इति संनिहितप्राक्कालः तथा च तंत्रांतरे

प्राप्नुयात्। दिवापदमेवं निशापदं च चंद्रः कर्पूरः इक्षवः शालयो मुद्गाः शारोमक्वथितं पयः शरद्येतानि प
थ्यानि प्रदोषे चेंदुरश्मयः प्रातर्भोजनमम्लमिष्टलवणं नभ्यंग धर्मश्रमान् गोधूमेक्षवशालि
माषपिष्टितविष्टंनवान्नं तिलान् कस्तूरीम्बरकुंकुमागुरुयुतामुष्णां च शौचे जलं। स्निग्धं स्त्रीवु
सुखं गुरूष्णवसनं सेवेत हेमंतके तुल्यौ पीनपयोधरौ च तरुतमुक्तै तैलं सुखोष्णं जलं द्विस्थिमो
जनमोषधीमयमहो हेमंतकालोदितं शिशिरे शीतमधिकं रौक्ष्यं चादानकालजं विशेषतो नरैस्तत्र
हेमंतस्य मतो विधिः क्वाथितं स्नमथ्यामयं च मधुना व्यायाममुद्वर्तनं संसेवेत मधौ कफघ्नकवलं
शल्यं पलं जांगलं गोधूमान्बहुवर्षशालिसहितान्मुद्गान्यवान्षष्टिकां ल्लेपं चंदनकुंकुमाग
गुरुकृतं रूक्षं कटूष्णं लघु शिष्टमम्लं दधि स्निग्धं दिवास्वप्नं च दुर्जरं प्रवेश्याय मपि प्राज्ञो रोसर
वसंते परिवर्जयेत् स्वादु स्निग्धहिमं लघु द्रवमयं द्रव्यं सैरेलां सितां सक्तुक्षीर दशांगुला उर्वीरुकं र
निशितया शालिं रसं मांजनं शीतांशुं शयनं दिवा मलयजं शीतं पयः पानकं सेवेतां च दिने स

कार्यो हेमंतको पि विधिः

जन्मांतरकृतं पापं व्याधिरूपेण बाधते तच्छांतिरौषधैर्दानैर्जपहोमसुरार्चनैः ५ ×

जेत्स्वकटुकं तीक्ष्णाम्लं घर्मश्रमान् ऋतुष्वेषु एतेषु विधिमिवर्तेत नरः दोषान्तु कुप्तान्केवल
भवेत्सदा च न ॥ पूर्वे तु प्राप्तसंतान भावी नो विधिमाचरेत् ऋतौ लक्षणसंयोगाद्वृत्तुसंधिर्यतो
भवेत् ॥ इति ऋतुः ॥ ० इति श्रीमिश्रलटकनतनय श्रीमन्मिश्रभावविरचिते भावप्रकाशे दिनादिच
र्याप्रकरणं चतुर्थं ४ ० अथ व्याधेर्लक्षणं तत्र वाग्भटः रोगस्तु दोषवैषम्यं दोषसाम्यमरोग
ता रोगा दुःखप्रदातारो ज्वरप्रभृतयो हि ते नरो दिनादिचर्यामिर्यो न वर्तेत नियमशः स एव लभते रोगं
ततः पथ्यं समाचरेत् ते च स्वाभाविकाः केचित् केचिदागंतवः स्मृताः मानसाः केचिदाख्याताः कथिताः
केपि कायिकाः तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः क्षुत्पिपासा सुप्तिजरा मृत्यु प्रभृतयः अथवा
स्वस्वभावादुत्पन्ने जाताः स्वाभाविकाः सहजा इत्यावत् ते च जन्मांधत्वादयः आगंतवोऽभिघाता
दिजनिताः अथवा जन्मोत्तरभाविनः मानसाः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यवि
षादेर्ष्यासूयामात्सर्यप्रभृतयः अथवा उन्मादापस्मारमूर्छाभ्रमतमः संन्यासप्रभृतयः कायिकाः वि

पांडुरोगप्रभृतयः कर्मजाः कथिताः केचिद्दोषजाः संति चापरे कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृ
ताः तत्र कर्मजा व्याधयः यस्मात्कारणेन दुःष्कर्म प्रबलं केवलं भोगनाश्यं प्रायश्चित्तनाश्यं वा ततो जा
ताः न तु दुष्टकृतादिदोषेण जनिताः तत्र यथा यथाशास्त्रं तु निर्णीता यथा व्याधिचिकित्सिताः न श
मं यांति ये रोगास्ते ज्ञेयाः कर्मजा बुधैः दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः ननु मिथ्या
हारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत एव ततो दोषजेष्वपि प्राक्तनं दुष्कर्मैव कारणं त
त्कथं दोषजा इति उच्यते दोषजेष्वपि वस्तुतः स्वादिकारणं दुःकर्म वर्त्तत एव किंतु तत्र मिथ्या
हारविहारदूषिता दोषा हेतवो दृश्यंते इति दोषजा इत्युच्यत इति समाधिः कर्मदोषोद्भवाः स्व
ल्पदोषा गरीयांसस्ते ज्ञेयाः कर्मदोषजाः अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेपि व्याधेर्गरीयस्त्वं
तत्कर्मक्षयादेव क्षीणं भवति दोषास्तु स्वल्पा अपि निदानत्वेन प्रोक्ता दृश्यंत एवेति दोषाणामकारण
तामन्यत इति कर्मदोषोद्भवाः कर्मक्षयात्कर्मकृता दोषजाः स्वस्वभेषजैः कर्मदोषोद्भवा यांति कर्म
दोषक्षयात्क्षयं दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणं दुष्कर्म तज्जेषजार्थं द्रव्यक्षयादिज

एं संचयोपहृता दोषा लभंते नोन्नतिं गतिं ते तूत्तरासु गतिषु भवंति बलवत्तराः वर्षासु प्रबलो वायुस्तस्मै
स्निग्धादयस्त्रयः रसाः सेव्या विशेषेण पवनस्योपशांतये स्निग्धादयस्त्रयः मधुराम्ललवणाः भवेद्वर्षासु व
पुषः क्लिन्नत्वं यद्विशेषतः तत्क्लेदशांतये सेव्यास्तिक्ताद्यादयस्त्रयः कट्वादयस्त्रयः कटुतिक्तकषायाः
स्वेदनेमर्द्दनं सेवेद्दध्युष्णं जांगलामिषं गोधूमाः शालयो माषाः जलं कौपं जलं छत्रं नभजेत्पूर्वप
वनं वह्निं घर्म्मं हिमं श्रमं नदीनीरं दिवास्वापं रूक्षं निद्रां च मैथुनं सर्पिः स्वादुकषायतिक्तकर दिव ४
सायशीतलं पललघुक्षीरं स्वच्छसितेक्षवः पटुरसः स्वल्पं पलं जांगलं गोधूमा यवमुद्गशालि
सतिताकादेयमंशूदकं चंद्रः कंदनमिंदुरादिरजनौ मात्यंपयो निर्मलः विश्रामः सुहृदंगनेषु
मधुरावाचः सरः क्रीडनं पित्तानां च विरेचनं च बलवत्तोयुक्तं शिरोमोक्षणं एतान्यत्र घनावसानं
समये पथ्यानि मुंचेद्दधि व्यायामाम्लकटूष्णतीक्ष्णदिवसस्वप्नं हिमं चातपं अंशूदकलक्षणमा
ह दिवारविकरैर्जुष्टं निशिशीतकरांशुभिः ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहं अत्र च समग्रदिवस

क्रियाभिर्जायंते शरीरे धातवः समाः साचिकित्सा विकाराणां कर्मतद्भिषजांमतं याह्युदीर्णं समयतिनान्यं
व्याधिंकरोतिच साक्रियानतुव्याधिंहरत्यन्यमुदीरयेत् क्रियाचात्र चिकित्सा तथाचामरसिंहः आरंभो
निःकृतिःशीक्षापूजनं संप्रधारणं उपायःकर्मचेष्टाच चिकित्साचनवक्रियाइति अथचिकित्साविध्यु धातुसाम्यक्रियाक्रि यात्नभवति २
पदेशः ज्ञातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतयामयः वह्निशत्रुविषैस्तुल्यः स्वल्पोपिविकरोत्यसौ रो
गमादौ परीक्षेत ततोऽनंतरमौषधं ततःकर्मभिषक्पश्चात् ज्ञानपूर्वंसमाचरेत् अथमर्थः भिषक्
आदौ रोगंपरीक्षेत् विचारयेत् ततोनंतरमौषधंविचारयेत् ततः पश्चाद्द्रव्याण्यपि विचार्यानंतरं ज्ञा
नपूर्वंसावधानेनात्ववद्दया कर्मचिकित्सामौषधदानादिरूपंसमाचरेदित्यर्थः रोगाज्ञानेचिकित्सा
करणेदोषमाह यस्तुरोगमविज्ञाय कर्माण्यारभतेभिषक् अप्यौषधविधानज्ञः तस्यासिद्धिर्यदृच्छया
स्यैरतयासिद्धिर्भवति नापिभवतीत्यर्थः अन्यञ्च औषधंकेवलंकर्तुं योजानातिनात्वामयं वैद्यकर्म
सचेत्कुर्यात् वधमर्हति राजतः रोगज्ञानेभेषजाज्ञाने चिकित्साकरणेदोषमाह यस्तुकेवलरोगज्ञो
भेषजेष्वविचक्षणः तंवैद्यंप्राप्यरोगीस्याद्यथानौर्नाविकंविना नाविकंकर्णधारंविनायथानौः शिव ७१

त्रिक्ष्येत २

संकटेपतति तथासरोगीत्यर्थः अन्यञ्च यस्तुकेवलशास्त्रज्ञः क्रियास्वकुशलोभिषक् समुह्यत्यातुरंप्रा प्रा १
प्य प्राप्यभीरुरिवाहवम् रोगौषधयोर्ज्ञानेगुणमाह यस्तुरोगविशेषज्ञः सर्वभैषज्यकोविदः दे
शकालविभागज्ञः तस्यसिद्धिर्नसंशयः आदावेतोरुजांज्ञाने प्रयतेतचिकित्सकः भेषजानांवि
चिकित्सां ४ धानेन ततःकुर्याच्चिकित्सितं चिकित्सितमित्यत्रभावेक्तः विकाराणामकुशलोनजिह्रीयात्
कदाचन नहिसर्वविकाराणां नामतोस्तिध्रुवास्थितिः नजिह्रीयात् नलज्जेत् ध्रुवानिय त्रिप्रमेत २
ता नास्तिरोगोविना दोषैर्यस्मात्तस्माच्चिकित्सकः अनुक्तमपिदोषाणां लिंगैर्व्याधिमुपा
चरेत् येनकुर्वंत्यसाध्यानां चिकित्सांतेभिषग्वराः अतोवैद्यैःश्रमःकार्यः साध्यासाध्यपरीक्षणे
रोगज्ञानोपायोऽन्यत्रवक्ष्यते शीतेशीतप्रतीकारमुष्णेतूष्णनिवारणं कृत्वाकुर्यात्क्रियांप्राप्तांक्रि
तसृजेत २ याकालंनहापयेत् अप्राप्तेचक्रियाकाले प्राप्तेवानक्रियाकृता क्रियाहीनातिरिक्ताच साध्ये
ष्वपिनसिध्यति अथमर्थः कालेचिकित्साचरेत् अप्राप्ते अनागते याक्रियाचिकित्सा यथाज्वरे
स१

कृतासानसिध्यति १

जीर्णता मप्राप्ते तरुणे एव कषायदानं क्रिया न सिध्यति याक्रिया चिकित्सावसरे प्राप्ते न कृता अर्थात्
पश्चात् कृता यथा दाहे कथंचित् शांते पश्चात् शीतलानुलेपनादिक्रिया यथा वा विषे सद्य एव क्रि
यानकृता पश्चात् विषे शरीरे प्रविष्टे क्रिया न सिध्यति तथा हि नातिरिक्ता च क्रिया साध्ये व्यपि न सिध्यति ॥
अतिरिक्तां हीनां च क्रियां वर्जयन्नातुर ॥ विकारे ऽल्पे महत्कर्म क्रियालघ्वीगरीयसि द्वयमेतदकौशल्यं कौ
शल्यं युक्तकर्मता क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् पूर्वस्यां शांतवेगायां न क्रियासंकरो हितः ॥
भिन्नरूपाभिस्तु क्रियाभिः सांकर्यमपि न दोषाय यतश्चात् क्रियाभिस्तुल्यरूपाभिर्न क्रियासंकरो हितः ता
भिस्तु भिन्नरूपाभिः सांकर्यं नैव दुःष्यति अत एवोक्तं लंघनं वालुकास्वेदो नस्यं निष्ठीवनं तथा अवले
होंजनं चापि प्राक् प्रयोज्यं त्रिदोषजे ज्वरे इति शेषः नचैकांते नं संदिष्टे शास्त्रे निविशते वुधः स्वयमप्य निर्दिष्टे२
त्र भिषजा तर्कणीया चिकित्सिता यतश्चात् उत्पद्यते च सा वस्था दोषकालवलं प्रति यस्यां कार्यमकार्यं देश२
स्यात् कर्मकार्यं विवर्जितं स्यात् कर्मकार्यं कर्तव्यं भवतीत्यर्थः अथ चिकित्सायाः फलमाह क्वचिदर्थः क्वचि

तु१ कर्तव्यं६

अश्रियं१

त्तिदुःखभोगेन कटुतिक्तकषायाद्यौषधभक्षणादिजनितदुःखभोगेन च क्षयं यांति शेषाऽद्दशा१
हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यांतीत्यर्थः साध्या याप्याश्च असाध्याश्च व्याधयस्त्रिविधाः स्मृताः
सुखसाध्यः कृच्छ्रसाध्यो द्विविधः साध्य उच्यते याप्यलक्षणमाह यापनीयं तु तं विद्यात् क्रियाधारय सोमयति१
त्यहिर्यं क्रियायां तु निवृत्तायां सद्य एव विनश्यति प्राप्ता क्रिया धारयते सुखिनं याप्यमातुरं१
प्रपतिष्यदिवागारं स्तंभोयत्नेन योजितः साध्या याप्यत्वमायांति याप्याश्चासाध्यतां तथा घ्नंति
प्राणान्न साध्यास्तु नराणामक्रियावतां अक्रियावतां चिकित्सारहितानां अथोपद्रवस्य लक्षण
माह रोगारंभकदोषस्य प्रकोपादुपजायते योऽन्यो विकारः स बुधैरुपद्रव इहोदितः अथारिष्टलक्षण१
माह रोगिणो मरणं यस्माद् अवश्यंभावि दृश्यते तल्लक्षणमरिष्टस्यादृष्टं व्यापि तदुच्यते अथ चिकित्सालक्ष
णमाह याक्रिया व्याधिहरिणी सा चिकित्सा निगद्यते दोषधातुमलानां च साम्यकृत् सैव रोगहृत् या१
साम्यकृत् सैव रोगहृत् क्रियात्र कर्म व्याधिहरीयते ऽनया इति व्याधिहरिणी करणे घ्युक् तथा च याभिः

~~भावनं~~ ७३ पितकः अन्यश्च आयुष्मान् सत्ववान् साध्यो द्रव्यवान् मित्रवानपि चिकित्स्यो भिषजा रोगी वैद्यवा
क्यकृदास्तिकः आयुर्वेदे अस्तिमतिर्यस्य स आस्तिकः अथाचिकित्स्यः चण्डः साहसिको भीरुः कृ
कृतघ्नो व्यग्र एव च शोकाकुलो मुमूर्षुश्च विहीनः करणैस्तथा वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च
शंकितः भिषजामभिधेयास्तु नोपक्रम्या भिषग्विधाः एतानुपचरन्वैद्यो बहून्दोषानवाप्नुयात् चं
क्रो ४५ डोऽत्यंतकोपशीलः साहसिकः अविचारकारी भीरुर्भयशीलः कृतघ्नो वैद्यकृतोपकारलोपकः व्यग्रो
व्याकुलचित्तः विहीनः करणैः नेत्रादीन्द्रियशक्तिरहितः वैरी न चिकित्स्यः कदाचिद्द्रोहोद्रेके
ऽपवादभयात् वैद्यविदग्धो वैद्यधूर्तः तथा च सुश्रुते सन्न सिध्यति वैद्यस्तु ग्रहेयस्य न पूज्य
ते शंकितो वैद्यविश्वासरहितः भिषजामभिधेयाः वैद्यवचनाभिधायिनः भिषग्विधा वैद्यतुल्या ए
ते नोपक्रम्याः न चिकित्स्याः अथ दूतलक्षणं यश्चिकित्सकमानेतुं याति दूतः स कथ्यते स च यादृक्
समुचितस्तादृगत्र निगद्यते दूताः सुजातयोऽव्यंगा पटवो निर्मलाम्बराः सुखिनोऽश्वव्रषारूढाश्च शिव ७३

आयुर्वेदे कृताभ्यासः सर्वत्र प्रियदर्शनः उक्तिहेतुसमायुक्तः एवं वैद्यो विधीयते १ क्रोधपारुष्यमात्सर्यमायालस्यादिवर्जितं जितेन्द्रियं क्षमावन्तं शीलशौच
दयान्वितं कुलीनं धार्मिकं स्निग्धं सुरूपं सत्यसंस्थितं चतुर्धर्ममशठं स्निग्धमकं कृतज्ञं प्रियदर्शनं मेधाविनमविश्रान्तमनुरक्तं हितैषिणं पटुप्रगल्भं
निपुणं दक्षमालस्यवर्जितं ॥ चरकाचार्यवाक्यं ॥ ५४
अपुष्पफलैर्युताः सुजातयस्तुच्छायाश्च सजीवदिशि संगताः भिषजं समये प्राप्ताः रोगिणः सुखदेतवे स
जातयः रोगिणः समानजातयः यस्यां प्राणमरुद्वाति सा नाडी जीवसंज्ञिता अथ दूतस्य जातायां शकुन
विचारः वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते न ~~शुभं~~ शुभं सौम्यशकुनं प्रदीप्तं तु सुखावहं प्र
दीप्तमशुभं दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येत् तथा च रिक्तहस्तो न पश्येत राजानं भिषजं गुरुं दे
वं संपुत्रकं मित्रं फलेन फलमादिशेत् अथ वैद्यलक्षणं चिकित्सां कुरुते यस्तु स चिकित्सक उ
च्यते स च यादृक् समीचीनः तादृगत्र निगद्यते तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृती लघुह
स्तः शुचिः शूरः सज्जोपस्कारभेषजः प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः सत्यधर्म रोगं प्रति उत्पन्नमतिः ४
परो यश्च वैद्य ईदृक् प्रशस्यते दृष्टकर्मा दृष्टा परेण कृता चिकित्सा येन सः स्वयंकृती स्वयं
चिकित्साकर्मकुशलः लघुहस्तः सिद्धिमद्धस्तः अथ निषिद्धो वैद्यः कुचेलः कर्कशः स्तब्धो ग्रा
मीणः स्वयमागतः पंच वैद्या न पूज्यन्ते धन्वंतरिसमा अपि कर्कशः अप्रियवादी स्तब्धः साभिमा

भावप्र०

नः ग्रामीणः व्यवहारचतुरः अथ वैद्यस्य कर्माण्याह व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः एतत्
वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः अस्यायमर्थः व्याधेः सम्यक् परिचयो वेदनायाः शांतिकरणं वैद्य
स्य कर्म न तु वैद्य आयुषः प्रभुरित्यर्थः अपरे त्वेवं व्याचक्षते व्याधेस्तत्त्वतः परिचयो वेदनायाः शांतिक
रणं च एतदेव वैद्यस्य कर्म वैद्यत्वं न किंतु वैद्य आयुषः प्रभुः आगंतुकमृत्युशतहरणात् तथा च
सुश्रुते धन्वंतरिः तत्रैकः कालसंयुक्तः शेषास्त्वागंतवः स्मृताः एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते॥ अथर्व
अथर्वाणः अथर्ववेदेनाथर्ववेतुल्याः मृत्युनेकोत्तरशतं प्रचक्षते तत्रैको मृत्युः कालकृतः काल आयुषो ते श
रीरिणमवश्यं संहरती सर्वैरुपायैर्निवारयितुमशक्यः सर्वप्राणिनो व्यापयतो तं संहरति यतस्त्वाह लिंग
पुराणे कार्तिकेयं प्रति महादेवः ममापि ग्रसते कालः कुतः पुत्र रसायनं स्थितिः तेन कालेन संयुक्तः संहाराय
नियुक्तः सोवश्यंभावी शेषाः शतं मृत्यवः आगंतवः आगंतुरूपहेतुजन्याः कार्यकारणयोरभेदोपचा
रात् आगंतवो हतको यथा विषभक्षणमज्जीर्णे ऽऽ मृत्युमपि कं भोजनं च दुर्देशजजलपाने तथातिब
लवैरिव्याघ्रवनमहिषमत्तमातंगादिभिर्युद्धं दंदशूकेन क्रीडनं मृत्युरचरक्षा स्यात्रोहणं वातुर्भ्यो महा शिव ७४

कर्मः कुत्रचिन्मैत्री कुत्रचिद्यशः कर्माभ्यासः कुत्रचिच्चेति चिकित्सा नास्ति निष्फला आयुर्वेदोदितां युक्तिं कुर
र्वाणां वर्तिता श्च ये पुण्यायुर्वृद्धिसंयुक्ताः नीरोगाश्च भवंति ते नैव कुर्वीत लोभेन चिकित्सां पुण्यवि
क्रयं ईश्वराणां वसुमतां लिप्सेतार्थं तु वृत्तये चिकित्सितं शरीरं यो न निःक्रीणाति दुर्मतिः स य
त्करोति सुकृतं तत्फलं भिषगश्नुते न देशो मनुजैर्हीनो न मनुष्या निरामयाः ततः सर्वत्र वैद्या
नां सुसिद्ध एव वृत्तयः अथ चिकित्सायाश्चत्वार्यंगानि रोगिदूतो भिषग्दीर्घमायुर्द्रव्यं तु सेवकः स
दौषधं चिकित्साया ह्यंगानि बुधा जगुः तत्र रोगिणो लक्षणमाह रोगो यस्यास्ति रोगी स स चिकित्स्य
स्तु तादृशः यादृशश्चाचिकित्स्योपि वक्ष्यमाणो निशम्यतां तत्र चिकित्स्यः द्विजप्रकृतिवर्णाभ्यां यु
तः सत्त्वादिसंयुतः चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेंद्रियः स त्वं व्यसनाभ्युदयक्रियादिषु वि
ह्वलता करं तेन युक्तः चक्षुष्मा इति "चक्षुरुपलक्षितो नान्येनापींद्रियेण" चिकित्स्यः रोगान्वा च

संयतः

...नचक्षुष

भावप्र०
७५

मंत्रौषधहुतिदानेन मृत्युहेतुम्पो निषिद्धचितोरम्पोन्नपतिं निवारयति ततश्चागंतुमृत्युरेवो निवारयितुं शक्या
न तु वर्ष्यभाविनः अथायुर्विचारः भिषगादौ परीक्षेत रुग्नस्यायुः प्रयत्नतः यतश्चायुषि विज्ञाते चिकि
त्सा सफला भवेत् तत्र दीर्घायुषो लक्षणानि सौम्या दृष्टिर्भवेत् यस्य श्रोत्रं वक्रं तथैव च स्याद्दुर्गंधं विजा
नाति स साध्यो नात्र संशयः पाणिपादौ च यस्योष्णौ तस्य स्यात् रोगभवेत् जिह्वा सुकोमला यस्य स रोगी न विन
श्यति स्वेदहीनो ज्वरो यस्य श्वासो नासिकया सरेत् कंठश्च कफहीनः स्यात् स रोगी जीवति ध्रुवं यस्य नि
द्रा सुखेन स्यात् शरीरः शैशैरैः सौख्यं भवेत् इंद्रियाणि प्रसन्नानि स रोगी नैव नश्यति अथ स्वल्पायु
शरीरशीलयोर्यस्य षो लक्षणानि शैशीरं शीतलं यस्य प्रकृतेर्विकृतिर्भवेत् तदरिष्टं समासेन व्यासतश्च निबोधमे अन्योन्यं ति
ह्ि: विविधान् शब्दान् विपरीतं श्रृणोति वा न श्रृणोति च यो कस्मात् तं वदंति गतायुषं यस्तु ष्णमिव उष्ण
ह्णाति शीतमुष्णं च शीतवत् उष्णगात्रोऽतिमात्रं यो भ्रशं शीतेन कंपते तमपि गतायुषं वदंती ह्यन्यथाः
मलमूत्रवायुत्सर्गा प्रहारं नैव जानाति यो गच्छेद्दस्य थापि वा पांशुनेवावकीर्णानि यश्च गात्राणि मन्यते वर्णान्यथा वा शिव
प्रहारं१ ७५

अन्यरस प्रधानद्रव्यभक्षणे रसान्नारं जानाति १

पंक्तयप रा ज्योत्स्ना यस्य गात्रेभ्यः भवति तु स्नातानुलिप्तं यं वापि भजंते नीलमाक्षिकाः विपरीतेन गृह्णाति रसान्
यश्चोपयोजितान् यो वा रसान्नासंवेत्ति तं गतायुः प्रचक्षते सुगंधं वेत्ति दुर्गंधं दुर्गंधं च सुगंधवत् गृह्ण
ति यो न्यथा गंधं शांते दीपे निरामयः रात्रौ स्फुर्यं ज्वलंतं वा दिवा वा चंद्रवर्चसं दिवा ज्योतींषि यश्चापि ज्वलि
तानीव पश्यति दिवा वा चंद्रवर्चसं सूर्यं भिषग्न्ययः ज्योतींषि नक्षत्राणि विद्युत्वतो सिताभ्रेघान् गगने
निर्घने घनान् विमानयानप्रासादैर्यश्च संकुलमंबरं यश्चानिलं मूर्तिमंतं अंतरिक्षं च लोकते धूमनी भूतक्रीडाफल
हारवासोभिरावृतां यश्च मेदिनीं प्रदीप्तमिव यो लोकं यो वा प्लुतमिवांभसा भूमिमष्टापदाकारं लेखाभिर्यं काकाद्यवमालर्थ
भ्रुवादीनि४ श्च पश्यति यो न पश्यति ऋक्षाणि यश्च देवीमरुंधतीं ध्रुवमाकाशगंगां च तं वदंति गतायुषं आदर्शभु
ति घर्मे वा छायां यश्च न पश्यति पश्येत्यकांगहीनां वा विकृतां वान्यसत्वजां श्वकाककंकगृध्राणां
प्रेतानां यक्षरक्षसां ज्ञातुरो लभते मृत्युं स्वस्थो व्याधिमवाप्नुयात् ह्रीश्रियौ नश्यतो यस्य तेजओजःस्मृ
तिः प्रभा अकस्मायं युजं ते वा स परासुरसंशयः प्रभात्र प्रतिभा यस्या धरोष्ठः पतितः क्षिप्तश्चोर्द्धं तथोत्तरः उर्द्ध्वोष्ठः१

प्राएरट्टितः१

भावप्र० ७६

उभौ वा जांबवकाभासौ दुर्लभं तस्य जीवनं आरक्ता दशना यस्य श्यावा वा स्युः पतंति वा खंजनप्रतिमा वापि तं
गतायुषमादिशेत् रूक्षा तथानुलिप्ता च जिह्वा स्तब्धा च यस्य वै कर्कशा वा भवेद्यस्य सोऽचिराद्धि जहा
त्यसून् कुटिला स्फुटिता वापि शुष्का वा यस्य नासिका अवस्फूर्जति भग्ना वा स न जीवति मानवः अव-
स्फूर्जति श्वासवेगेन नासिका शब्दं करोतीत्यर्थः संक्षिप्ते विषमे स्तब्धे रक्ते स्रस्ते च लोचने स्यातां च प्रस्रुते य
स्य स गतायुर्नरो ध्रुवं केशाः सीमंतिनो यस्य संक्षिप्ते विनते भ्रुवौ लुनंति चाक्षिपक्ष्माणि सोऽचिराद्या
ति मृत्यवे लुनंति पतंति नाहरत्यन्नमास्यं स्यं न धारयति यः शिरः एकाग्रदृष्टिर्मूढात्मा स सद्यः प्राणा
न्समुंचति उत्थाप्यमानो बहुशः संमोहाद्यो पतत्यपि बलवान् दुर्बलो वापि तं पक्वं भिषगादिशेत् निद्रा
निरंतरं यस्य यो जागर्ति निरंतरं मुह्येद्वा वक्तुकामस्तु प्रत्याख्येयः स जानता उत्तरोष्ठं च यो लिह्यादुत्का
रं शब्दं करोति यः प्रेतैर्वा भाषते सार्धं प्रेतरूपं तमादिशेत् उत्कारा नुसा पादादि विक्षेपान् रोमभ्यः स रोमकूपेभ्यो
यस्य रक्तं प्रवर्तते पुरुषस्य विषार्तस्य स सद्यो जीवितं त्यजेत् सम्यक् चिकित्स्यमानस्य विकारो यो विर-
वर्तते प्रक्षीणबलमांसस्य लक्षणं स्याद्गतायुषः ॥

शिव ७६

तरंगिणीतरणे नौकाविनाशनो दुर्गमार्गगमने निमित्तादिरागंतुहेतुजातमस्य को दुर्निमित्तमाविभा वा
नो बलवत्वादायुषि सत्यपि मारयंति यथा मलिन दीपिका तैलवर्तिका च सत्स्वपि विद्यमानेषु वात्यादी
पं नाशयति तथा च यथा स सत्यपि तैलादौ दीपं निर्वापयेन्मरुत् एवमायुष्यहीनेऽपि हिंस्युरागंतवः ॥
किंतु आगंतुनिमित्तानि निवारयद्भिस्तेनिवारयितुं शक्यते यत आह सुश्रुते धन्वंतरिः दोषागंतुनिमित्ते-
भ्यो रसमंत्रविशारदौ रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ अयमर्थः वैद्यपुरोहितौ वैद्यमंत्रिणौ नृ-
पतिं यत्नाद्रक्षेतां कुतः दोषागंतुनिमित्तेभ्यः दोषाणि निषिद्धाहारविहारदूषिता वातपित्तकफरोगो-
त्पादकाः आगंतवः निषिद्धाहारविहारा अतिबलवैरिविग्रहादयः ते निमित्तानि येषां तेभ्यः शतमृत्युभ्यः
ननु वैद्यपुरोहितौ कथं शतमृत्यून् निवारयितुं शक्तौ तत्राह यतस्तौ रसमंत्रविशारदौ प्रथमं वैद्यो दिनच-
र्या रात्रिचर्या ऋतुचर्योक्ताहारविहाराभ्यां वातपित्तकफधातुमलान् समानेव रक्षति ततो रस
हेत्याद्रसैर्मृत्युंजयादिभिः निषिद्धाहारविहारदूषितदोषजनितान् विकारान्नम्लहेतून् अपहरति ५

॥ शुभ रत्नेन एकांते प्रभाते मंत्रयुक्तितः ॥२॥ संग्राह्य मौषधं सिद्ध्येनो चेद्व्रतकाद्यवत् ॥५॥ इदं सिद्ध मूलानां विधिमंत्रश्च कथ्यते ॥ ॐ नमस्तेऽमृतसंभूते बलवीर्यविवर्द्धिनी
॥ बलमायुश्च मे देहि पापं मे जहि दूरतः ॥२॥ येन त्वां खनते ब्रह्मा येन त्वां खनते इन्द्रो येन केशवः ॥ तेनाहं खनयिष्यामि मंत्रपूतेन पाणिना ॥३॥ येन त्वां खनते ब्रह्मा येन त्वां खनते
मा०प्र० ॥ मंत्रः ॥ येन इंद्रो यवरुण स्तेन त्वामुपचक्रमे तत् ॥४॥ मा उत्पद्यते मा निपते मा ते जोऽन्यच्चान्यत्र त्वैव तिष्ठ कल्याणि मम कार्यकरी भव ॥ मम कार्ये कृते [illegible] सिद्धे ततः स्व
७७

पिकरतत्यक्ता यतश्चात् तावत्प्रतिक्रियाकार्य्या यावदुच्छ्वसिति मानवः कदाचिद्दैवयोगेन दृष्टारिष्टो
ऽपि जीवति इतीतु यस्यासाध्यत्वं संदिग्धं तं प्रत्युक्तं येषां त्वसाध्यता शास्त्रोक्तानुभवेन च विनिश्चिता ते
पुनर्न चिकित्स्याः यत उक्तं सद्वैद्यैः स्तेन ये साध्या नारभंते चिकित्सितुं इति अथ द्रव्यं सर्वं द्रव्यम
पेक्ष्यं ते रोगिप्रभृतयो यतः विना वित्तं न भेषज्यं चिकित्सा गृहं तेऽपनं अथ परिचारकस्य लक्षणं
स्निग्धो जुगुप्सुर्बलवान् युक्तो व्याधितरक्षणे वैद्यवाक्यकृदश्रांतो युज्यते परिचारकः स्निग्धः प्रीतियुक्तः
अजुगुप्सुः अनिंदकः अथ भेषजस्य लक्षणमाह वैद्यो व्याधिं हरेद्येन तद्द्रव्यं प्रोक्तमौषधं तद्यादृङ्मामवश्यं
स्याद्योगमृताद्दृशांबुवे तत्रौषधिग्रहणे परिभाषा शार्ङ्गधरात् प्रशस्तदेशसंजातं प्रशस्तेऽह्नि चोद्धृतं अ
ल्पमात्रं बहुगुणं गंधवर्णरसान्वितं दोषघ्नमग्लानिकरमविकारि विपर्यये समीक्ष्यकाले दत्तं च भे
षजं स्याद्गुणावहं आग्नेयाविंध्यशैलाद्याः सौम्यो हिमगिरिर्मतः अतस्तदोषधानि स्युरनुरूपाणि
हेतुभिः आग्नेयाश्चाधिकांशेन तेजःसौम्यः अधिकसोमांशाः ओषधय एवौषधानि अत्र स्वार्थे

[illegible]

नि०व
७७

म०१ नि२

॥४ अनेन मंत्रेण सर्वौषधिमभिमंत्र्य भुंजीत शेषः १

निक॰ ला: २

भूतप्रेतपिशाचाश्च रक्षांसि विविधानि च मरणाभिमुखं जंतुमुपसर्पंति नित्यशः तानि भेषजवीर्याणि
प्रतिघ्नंति जिघांसया तस्मान्मोघाः क्रियास्सर्वाः भवंत्येव गतायुषः दानधर्मे येनास्तिक्याद्दुराचाराद्गु
रुशास्त्राभिलंघिनः स्वधर्मज्ञातिः क्रियाश्च ते भवंति गतायुषः नन्वायुषि सति चिकित्सायाः साफ
ल्यमुक्तं आयुश्चेदस्ति तदा तदेव जीवनहेतुः किं चिकित्साविधानेन तत्रोच्यते आयुषि सति
चिकित्सायाः फलं वेदनानिग्रहः उक्तंच आयुष्मान्पुरुषो जीवेत्सम्यग्भेषजं विना भेषजेन
पुनर्जीवेत्स एव हि निरामयः किंच आयुषि सत्यपि रोगी चिकित्सां विनोत्थातुं न शक्नोति यतश्चा
तुरनरः सत्यप्यायुषि नोपायं विनोत्थातुं क्षमो रुजी दर्शितश्चात्र दृष्टांतः पंकलग्नो महागजः किंच १
चिकित्सां विना आयुष्मानप्यवसीदति किंच दुःखं प्राप्नोति यतश्चातुरस्यैव सति चायुषि न दुःस्यात्स
मर्त्यश्चाचिकित्सितः यथा सत्यपि तैलादौ दीपो निर्वाति वायुना अत एवोक्तं साध्यानामप्यसाध्यतां १
यान्त्यागम्य स्वसाध्यतां घ्नंति प्राणानसाध्यास्तु नराणामक्रियावतामिति चिकित्सायाः सत्यायुषो

दमयेश्चे

शा·कः वालंफलंतुविल्वस्यपक्वमारग्वधस्यच अंगेऽनुक्तेजटाग्राह्यानागेऽनुक्तेविदलंसमं पात्रेऽनुक्तेमृदस्यात्
७८ कालेऽनुक्तेत्वहर्मुखंनवान्येवहियोज्यानिद्रव्याण्यखिलकर्मसु विनाविडंगकृष्णाभ्यांगुडधान्याज्यमा
क्षिकैः धान्यमन्नं पुराणंतुप्रशस्तंस्यात्तांवूलंकांजिकंतथा शुष्कंनवीनंद्रव्यंतुयोज्यंसकलकर्म
सु आर्द्रंतुद्विगुणंयुंज्यादेषसर्वत्रनिश्चयः गुडूचीकुटजोवासाकूष्मांडश्चशतावरी अश्वगंधासह
चरोशतपुष्पाप्रसारिणी प्रयोक्तव्याःसदैवार्द्राद्विगुणानैवकारयेत् सहचरःकुरंटकः पीतपुष्पकट
सैला वासानिंबवपयेलकेतकवलाकूष्मांडकेंद्रीवरीवर्षाभूकुटजाश्वकंदसहितासापूतिगंधामृता
जटामासी मांसीनागवलाकुरंटकपुरोहिंग्वार्द्रकंचेत्यवंगृह्णीयात्सरसाग्न्यम्लनिनपुनःकुर्यात्द्विभागानिच ऐंद्री
इंद्रवारुणी वरीशतावरी पूतिगंधागंधप्रसारिणी नागवलागुलसकरी कुरंटकःपीतपुष्प
कटसरैया पुरोगुग्गुलुः घृतंतैलंचपानीयंकषायंमंजनादिकं पल्काशीतीकृतंतत्तत्सर्वस्याद्वि
पोपमं अथद्रव्याणांपरीक्षा सूक्ष्मास्थिमांसलापथ्यासर्वकर्मणिपूजिता द्विर्तामसिनिमज्जेत्या ७८

भल्लातकचनयोत्तमा वाराहमूर्द्धवल्कंदोवाराहीकंदसंज्ञकः सोवर्चलंतुकाचाभंसैंधवंस्फटिकप्रभं सुव
र्णच्छविकंज्ञेयंस्वर्णमाक्षिकमुत्तमं ओढ्रपुष्पप्रतीकाशामनःशिलोत्तमामता श्रेष्ठंशिलाजतुज्ञेयंय
प्रतानेन द्वि॰२ त्क्षिप्तंनवीजीयते तोयपूर्णेकांस्यपात्रेप्रभातेनविवर्द्धते कर्पूरस्तुवरःस्निग्धःएलासूक्ष्मफला
वरा श्वेतचंदनमत्यंतंसुगंधिगुरुपूजितं रक्तचंदनमत्यंतंलोहितंतुवरंमतं काकतुण्डनिभःस्नि
ग्धोगुरुश्श्रेष्ठोऽगुरुर्मतः सुगंधिलघुरूक्षंचसुरदारुवरंमतं सरलंस्निग्धमत्यंतंसुगंधिचगुणावहं
अतिपीताप्रशस्तातुज्ञेयादारुनिशाबुधैः जातीफलंगुरुस्निग्धंसमंशुभ्रेतरत्वचं मृद्वीकासोत्तमा
ज्ञेयायास्याद्गोस्तनसंनिभा करमर्दकफलाकारामध्यमासाप्रकीर्तिता टीका गोस्तनसन्निभामुन
क्का दाखइतिलोके करमर्दकफलाकारा करौंदीदाखइतिलोके खंडंतुविमलंश्रेष्ठंचंद्रकांति
समप्रभं गव्यान्यशरद्भवंस्वच्छंगंधेमधुवरंमतं अथसामान्यलोहितानि शालीनांलोहितःशालीः
षष्टिकेषुचषष्टिका क्षुद्रकधान्येष्वपियवोगोधूमःप्रवरोमतः शिंबीधान्येवरोमुद्गोमसूरश्चाढकी

भा·क· तथा रसेषु मधुरः श्रेष्ठो लवणेषु च सैंधवः दाडिमामलकं द्राक्षा खर्जूरं च परूषकं राजादनं मातुलुंगं फ
७८ लवर्गेषु प्रशस्यते टीका परूषकं फालसा इति लोके राजादनं खिरनी इति लोके मातुलुंगं बिजोरा
इति लोके पत्रशाकेषु वास्तूकं जीवंती पोतिका वरा पटोलं फलशाकेषु कंदशाकेषु सूरणं एणः कु
रंगो हरिणो जंघालेषु प्रशस्यते पक्षिणां तित्तिरिर्लावो वरो मत्स्येषु रोहितः हरिणस्ताम्रवर्णः स्यादेणः
कृष्णतमो मतः कुरंगस्ताम्रवद्धूम्रो हरिणा इति को महान् उष्ट्रेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोभवं
तैलेषु तिलजं तैलमिक्षवेषु सिता मता अथ स्वभावादहितानि शमीषु माषा ग्रीष्मे तैलं लवणेष्वौषरं
त्यजेत् फलेषु लकुचं शाकेषु सार्षपं न हितं मतं गोमांसं ग्राम्यमांसेषु न हितं माहिषी च वसा मेषीपयः
कुसुंभस्य तैलं स्यात् पंक्व फाणितं इक्षुरसः परिपक्वो योर्ध्वघनः फाणितं तद्धि छोआराव इति लोके अ
थ संयोगविरुद्धानि मत्स्यमानूपमांसं च गुडमधुयुक्तं विवर्जयेत् कपोतं सार्षपस्नेहभर्जितं परिवर्जये
त् मत्स्यान् निक्षोर्विकारेण तथा क्षौद्रेण वर्जयेत् सक्तून् मांसपयोयुक्तान् उष्णैर्दधि विवर्जयेत्क्षौद्रैर्न । ७८

विरुद्धमपि चाहारं विद्यात् हरविषोपमं ॥ तद्दोषाय भिषक् स्वात्यो सोजनावसरे न्नपे ॥१॥ कालक्रमेण सद्दोषा विरुद्धाहारसेवनं नितुं तिमानवं तस्माद्धितं क्रमशनं सजेत ॥२४
॥ व्याधिभिं द्रियदौर्बल्यं मरणं वा प्रयच्छति विरुद्धमशनं तस्माद्वर्जयेदात्मवान्नरः ॥३॥ २४

ण अनुरूपाणि सदृशानि अन्येष्वपि प्ररोहंति वनेषूपवनेषु च गृह्णीयात्तानि सुमनाः शुचिः प्रातः सु
वासरे आदित्यसन्मुखो मौनी नमस्कृत्य शिवं हृदि साधारणधराजं गृह्णीयादुत्तराश्रितं साधार
णधराजं च सम्भूतमिमं वन्यं उत्तराश्रितं तस्मादुत्तरदिग्भवं वल्मीककुत्सितानूपश्मशानोषरमार्ग
जाः जंतुवह्निहिमव्याप्ता नौषध्यः कार्यसाधकाः शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधं विरेक
वमनार्थं तु वसंतांते समाहरेत् वसंतमध्ये समाहरेत् संगृह्णीयात् अतिस्थूलजटायास्तु तासां ग्रा
ह्यास्त्वचो ध्रुवं गृह्णीयात् सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् अन्यच्च येषां महांति मूलानि काष्ठ
गर्भाणि यानि तु तेषां तु वल्कलं ग्राह्यं ह्रस्वमूलानि सर्वशः न्यग्रोधादेस्त्वचो ग्राह्याः सारः स्याद्बीज
कादितः तालीसादेस्तु पत्राणि फलं स्यात्त्रिफलादितः क्वचिन्मूलं क्वचित्स्कंदः क्वचित्पत्रं क्व
चित्फलं क्वचित्पुष्पं क्वचित्सर्वं क्वचित्क्षारः क्वचित्त्वचा चित्रकं सूरणं निंबो वासा च त्रिफला क
मात् धातकी कंटकारी च खदिरः क्षीरपादपाः क्वचिन्निंबस्य गृह्णीयात् पत्राणि वल्कलमपि ।

भा० प्र०
८०

ते अर्कपर्णादिपयसोऽप्यभावेतत्क्षीरमतः पौष्कराभावतःकुष्ठंतथालांगल्यभावतः स्थौणेयकस्यचाभावेनि(
घ्निर्द्दीयतेगदः वच्याभावेतुवैकांतमिक्षुकंरसदर्प्पणे चविकागजपिप्पल्योपिप्पलीमूलवन्मते गदंकु
ष्ठं अभावेसोमराज्यास्तुप्रपुन्नाटफलंमतं यदिनस्याद्दारुनिशातदादेयानिशाबुधैः सोमराजीवाकु
ची प्रपुंनाटफलं चक्रमर्दफलं रसांजनस्याभावेतुसम्यक्दार्वीप्रयुज्यते सौराष्ट्र्याभावतोदेयास्फु
टिकातद्गुणाजनैः सोराष्ट्री सौरवीमाटी इतिलोके स्फटिकाफटकरीतिलोके तालीसपत्रकाभावेस्व
र्णतालीप्रशस्यते भार्ङ्यभावेतुतालीसंकंटकारीजटाथवा रुचकाभावतोदद्याल्लवणंपांशुपूर्वकं अ
भावेमधुयष्ट्यास्तुधातकीचप्रयोजयेत रुचकं चोहारइतिलोके पांशुलवणं खारीअथवारेहइ
तिलोके अम्लवेतसकाभावेचुक्रंदातव्यमिष्यते प्राह्मायदिनलभ्येतप्रदेयंकाश्मरीफलं तयो
रभावेकुसुमंमधूकस्यमतंबुधैः लवंगकुसुमंदेयंनखस्याभावतःपुनः कस्तूर्य्यभावेकंकोलं
क्षेपणीयंविदुर्बुधाः कंकोलस्याप्यभावेतुजातीपुष्पंविदुर्बुधाः सुगंधमुस्तकंदेयंकर्पूराभाव ८०

तोबुधैः कर्पूराभावतोदेयंग्रंथिपर्णंविशेषतः कुंकुमाभावतोदद्यात्कुसुंभकुसुमंनवं श्रीखंडचं
दनाभावेकर्पूरंदेयमिष्यते अभावेत्वेतयोर्वैद्यःप्रक्षिपेद्रक्तचंदनं रक्तचंदनकाभावेऽनवोशीरंवि
दुर्बुधाः मुस्ताचातिविषाभावेशिवाभावेशिवामता अभावेनागपुष्पस्यपद्मकेशरमिष्यते मे
दाजीवककाकोलीऋद्धिवृद्धिद्वयेपिवासति वरीविदार्य्यश्वगंधावाराहीश्चक्रमात्क्षिपेत वरीशता
वरी वाराह्यश्वतथाभावेचर्म्मकारालुकामता वाराहीकंदसंज्ञस्तुपश्चिमेगृष्टिसंज्ञकः गेठी
तीइतिलोके वाराहीकंदएवान्यैश्चर्म्मकारालुकामता अनूपेसभवेद्देशेवाराहइवलोमवान्
भल्लातकासहत्वेतुरक्तचंदनमिष्यते भल्लातकाभावतस्थित्रकंनलभ्येत्तोरभावतः सुवर्णाभावतो
देयोमाक्षिकंप्रक्षिपेद्बुधः श्वेतंतुमाक्षिकंज्ञेयंबुधैरजतवत्तुवं माक्षिकस्याप्यभावेतुप्रदद्या
त्स्वर्णगैरिकंसुवर्णमथवारौप्यंमृतंयत्रनलभ्यते तत्रलोहेनकर्म्माणिनिषकुर्य्याद्भिषग्वराः
कांताभावेतीक्ष्णलोहंयोजयेद्वैद्यसत्तमः अभावेमौक्तिकस्यापिमुक्ताशुक्तिंप्रजोजयेत म(

तत्र रसं ईद्रियग्राह्यो रसः ॥ द्रव्याश्रयो गुणाः ॥ कायाग्निपाकजो विशिष्टो गुणो वीर्य्यं ॥ जठराग्निद्रव्यैः पाकोत्तरभावी रसो विपाकः ॥ द्रव्यस्य सा तस्या प्रभावाः ॥ ९४
स्वादुः स्वात्मधुरे ॥ अम्लः अम्ले ॥ पटुस्तु लवणे ॥ कटुः कटुके ॥ राजिकेति ॥ तिक्तं ॥ तुवरितं कषाय ॥ तेन द्रव्यस्य द्रव्यधर्म्मा इत्यर्थः ॥ नन्वद्रव्यस्यापि सत्वात् तस्य महत्वापत्तिरितिचार्च्यं
तस्य क्रियागुणयोगेन द्रव्यस्यात् ॥ व ॰ स ॰ क्षरणात् क्षारो नाम सो रस इत्यादि ॰ तत्सत्वरितस्य लवण एवांतरभावो लवणवर्गा यावत् ॥ ७४

मा.प्र. धुयत्र न लभ्यंते तत्र जीर्णगुडो मतः मत्स्यंड्यभावतो दद्युर्भिषजः सितशर्करां असंभवे सितायास्तु वुधैः
८१ खंडं प्रयुज्यते क्षीराभावे रसो मौद्गो मासूरो वा प्रदीयते अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च योऽप्य
मेकतराभावे परं वैद्येन जानता रसवीर्य्यविपाकाद्यैः समं द्रव्यं विविच्य च युज्यात् तद्विधमन्यच्च
द्रव्याणां तु रसादिवित् योगे यत्प्रधानं स्यात् तस्य प्रतिनिधिर्मतः यत्तु प्रधानं तस्यापि सदृशं नैव
गृह्यते व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत् अनुक्तमपि युक्तं यत् योजयेत्तद्रसादिवित् द्र
व्यगतं पदार्थपंचकमाह द्रव्ये रसो गुणो वीर्य्यं विपाकः शक्तिरेव च पदार्थाः पंचतिष्ठंति स्वं
स्वं कुर्वंति कर्म्म च तत्र रसाः तत्र वाग्भटः रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः षड्द्र
व्यमाश्रितास्ते च यथापूर्वं बलावहाः ऊषणः कटुः तत्राद्या मारुतं घ्नंति त्रयस्तिक्तादयः कफं
कषायतिक्तमधुराः पित्तमन्ये च कुर्वते ये रसाः वातशमना भवंति यदि ते पुनः रौक्ष्यलाघवशैत्योत्पा
दिनस्ते हन्युः समीरणं ये रसाः पित्तशमनाः भवंति यदि ते पुनः रौक्ष्यलघुतासेवनते तत्क ८१

अन्ये ऊषणलवणाम्लाः वातपित्तकफान् कुर्वते यथाक्रमेण २

मो वुनाश्चोर्ध्वं पापसंकरान्वितं रंभाफलं त्यजेत्तक्रं दधिविल्वफलान्वितं दशाहमुषितं सर्पिः कांस्ये
मधुघृतं समं कृतान्नं च कषायं च पुनरुष्णीकृतं त्यजेत् एकत्र वकुमांसानि विरुध्यंते परस्परं मधुस
र्पिर्वसा तैलयानी पानियया तथा अथ गन्धे घृत्यग्रहणे संकेतः लवणं सैंधवं प्रोक्तं चंदनं रक्तचंदनं
चूर्णलेहासवस्नेहाः साध्याधवलचंदनैः कषायलेपयोः प्रायो युज्यते रक्तचंदनं अंतःसंमार्जनिक्रे
याष्टजमोदाजवानिका वहिःसंमार्जनिसेव विज्ञातमाजमोदिका पयः सर्पिः प्रयोगे तु गव्यमेव हि
गृह्यते सकृद्रसो गोमयजं लं मूत्रं गोमूत्रमुच्यते अथ प्रतिनिधिः चित्रकाभावतो दंती क्षारः शिखरि
जोऽथवा अभावे धन्वयासस्य प्रक्षेप्या तु दुरालभा शिखरी अपामार्गः तगरस्याप्यभावे तु कुष्ठं दद्या
द्भिषग्वरः मूर्व्वाभावे त्वचो ग्राह्या जिंगिनि प्रसव्या बुधैः अहिंसाया अभावे तु मानकंदः प्रकीर्तितः
अभावे लक्ष्मणायास्तु नीलकंठशिखा मता नीलकंठशिखा मयूरशिखा वकुलाभावतो देयं
कल्हारोत्पलपंकजं नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते जातिपुष्पं न यत्रास्ति लवंगं तत्र दीय

भा・प्र・
८२
वलघ्न आस्यजलदः कयोलगलदाहकृत् अतियुक्तस्य लवणस्य गुणाः सोऽतियुक्तो ह्रियाकास्त्रपिञ्ज
कोन्मत्ततार्तिकृत् वलीपलितखालित्यकुष्ठवीसर्प्पतृट्प्रदः कोठावरटीदंष्ट्राकृत्शोषवत् पलितं
केशशुक्लता खालित्यं शिरसि केशनाशः अथ कटुगुणाः कटुरुक्षश्चतीक्ष्णश्च विशदो वातपि
त्तकृत् श्लेष्महृल्लघुराग्नेयः कृमिकण्डुविषापहः स्तन्यस्तन्यहरश्चापि मेहस्थौल्यापकर्षकृत्
अस्रदीनासिकास्याद्विजिकाग्रेन्द्रेषकोमतः दीपनः पाचनो रुच्यो नाशिकाशोषणो नत्रां ले
दमेदो वसामज्जाक्षसन्मूत्रोपशोषणः शीतः प्रकाशको रूक्षो मेध्यो वर्चोविबंधकृत् आग्नेय्य
:अधिकाव्यंशः मेध्यो मेधायै हितः अतियुक्तस्य कटुरसस्य गुणाः सोऽतियुक्तो शुं तिदाहमु
खतालुशोषशोषकृत् कंठादिपीडा मूर्छा तिट्कंपदो वलशुक्रहृत् अथ तिक्तरसगुणाः ति
क्तः शीतः तृष्णामूर्छाज्वरपित्तकफान्जयेत् कृमिकुष्ठविषोत्क्लेदाहस्कगदापहः रुच्यः वमनादोपस्थितः २
स्वयमरोचिष्णुः कण्ठस्तन्यस्य शोधनः वातलोऽग्निकरो नाशशोषणो रूक्षणो लघुः स्वच्छः अन्ये ८२

षु वस्तुषु रुचिमुत्पादयति स्वयं अरोचिष्णुः यथा निंवः स्वयं न रोच्यते अन्येषु वस्तुषु रुचिं करोति अति
युक्तस्य तिक्तस्य गुणाः सोऽतियुक्तः शिरःशूलमन्यास्तंभश्रमार्त्तिकृत् कंपमूर्छातृषाकारी वलशु
स्तादोषमंसपल्लीकर ए२ क्रक्षयप्रदः अथ कषायगुणाः कषायो रोपणो ग्राही स्तंभनः शोधनस्तथा लेखनः पीडनः सौम्यः (
शोषणो वातकोपनः कफशोणितपित्तघ्नो रूक्षः शीतो लघुर्मतः त्वक्प्रसादनआमस्य स्तंभनो वि
शदो मतः जिह्वायां जाड्यकृत्कण्ठस्रोतसां च विबंधकृत् रोपणः व्रणस्य स्तंभनो गाढत्वं शोध
नो व्रणस्य लेखनो व्रणाद्युत्सन्नमांसस्य शोषणो व्रणमेहादीनां पीडनो हृदयस्य वातकाश्लिष्टो
म्यः सौम्यादुत्पन्नः अतियुक्तस्य कषायस्य गुणाः सोऽतियुक्तो ग्रहाध्मानहृत्पीडाक्षेपणादिकृत्
मधुरादीनामपरोपि विशेषाः मधुरं श्लेष्मलं सर्वं मृते शालेः पुरातनात् मुद्गान्गोधूमतः क्षौद्रात्सि (
तायाजांगलामिषात् अम्लं पित्तकरं प्रायो विनाधात्रीं च दाडिमीं लवणं प्रायशो दृष्टिने त्रयोः सैं
धवं विना प्रायः कटु तथा तिक्तमवृष्यं वातकोपनं शुंठीकृष्णारसोनानि पटोलममृतां विना च

भा·प्र· रूक्षोऽपि पिप्पली नागरं वृष्यं कटु चाप्युच्यते प्रायशः स्तंभनं प्रोक्तं कषायमभयां विना सामान्येनात्र
८३ निर्दिष्टा गुणाः षड्रससंभवाः रसानां योगतस्तस्मादन्य देव गुणोदयः संयोगाक्षिपतां याति सममाज्येन मा
क्षिकं अमृतत्वं विषं याति सर्प्पदृष्टस्य वै यथा। अथ गुणाः लघुर्गुरुस्तथा स्निग्धो रूक्षस्तीक्ष्ण इति क्रमात्
नभोभूवारिवातानां वन्हेरेते गुणाः स्मृताः अथ लघ्वादिगुणवतां गुणाः लघुपथ्यं परं प्रोक्तं कफघ्नं शी(
घ्रपाकि च लघुद्रव्यं एवं गुर्वादि तथा चोक्तं गुर्वादयो गुणाद्रव्ये पृथिव्यादौ रसाश्रये रसेषु व्यपदिश्यं
ते साहचर्य्योपचारतः गुरु वातहरं पुष्टिश्लेष्मकृच्चिरपाकि च स्निग्धं वातहरं श्लेष्मकारि वृष्यं बलावहं
रूक्षं समीरणकरं परं कफहरं मतं तीक्ष्णं पित्तकरं प्रायो लेखनं कफवातहृत् सुश्रुते तु गुणाः एते
विंशतिस्तान्त्रु वेश्मणु गुरुर्लघुः स्निग्धरूक्षौ तीक्ष्णः श्लक्ष्णः स्थिरः सरः पिच्छिलो विशदः शीतउ
ष्णश्च मृदुकर्कशौ स्थूलः सूक्ष्मो द्रवः शुष्कश्चाशुर्मंदः स्मृता गुणाः तत्र गुरुलघुस्निग्धरूक्षतीक्ष्णागु
णा उक्ता एव श्लक्ष्णः स्नेहं विनापि स्पर्शकठिनोऽपि हि चिक्कणः स्थिरो वातमलस्तंभी सरस्तेषां प्रवर्त्तते पि ८३

र्मकारिणः ये रसाः श्लेष्मशमना भवंति पदिष्टेषु वै स्नेहगौरवशैत्यानि नन्वे हन्युः कफं सदा तत्र म
धुररसस्य गुणाः मधुरो हि रसः शीतो धातुस्तन्यबलप्रदः चक्षुष्यो वातपित्तघ्नः कुर्य्यात्स्थौल्यमलक्र
मीन् बालवृद्धक्षतक्षीणवर्णकेशेंद्रियौजसां प्रशस्तो बृंहणः कंठ्यो गुरुः संधानकृन्मतः विषघ्न संधिमेलनेहितः
ः पिच्छलश्चापि स्निग्धः प्रीत्यायुषो र्हितः अथातियुक्तस्य मधुररसस्य गुणाः सोतियुक्तो ज्वरश्वा
सगलगण्डार्बुदक्रिमीन् स्थौल्याग्निमांद्यमेहांश्च कुर्य्यान्मेदःकफामयान् अथाम्लस्य गुणाः
रसोऽम्लः पाचनो रुच्यः पित्तश्लेष्मप्रदो लघुः लेखितोष्णो वहिः शीतः क्लेदनः पवनापहः स्निग्ध(
स्तीक्ष्णः सरः शुक्रविबंधानाहहृत् शिहा हर्षणो रोमदंतानाम् क्षिप्रं विनिकोचनः लेखितो लेखनः
वहिः शीतः स्पर्शे शीतः विनिकोचनः संकोचनः अथातियुक्तस्याम्लस्य गुणाः सोतियुक्तो(
भ्रमं कुर्य्यात्तिडुदाह तिमिरज्वरान् कण्डूपाण्डुत्ववीसर्प्पशोथविस्फोटकुष्ठकृत् अथ लवण
स्य गुणाः लवणः शोधनो रुच्यः पाचनः कफपित्तदः पुंस्त्ववातहरः कायशैथिल्यमृदुकारकः

छिलस्तंतुलोवल्पः संधानः श्लेष्मलोगुरुः ॥ संधानोऽम्मस्य क्लेदच्छेदकरः ख्यातो विशदो व्रणरोपणः शी
तस्तु ल्हादनः स्तंभनो मूर्छातृट्स्वेददाहनुत उष्णोऽभवति शीतस्य विपरीतश्च पाचनः ल्हादनः सुखजन
कः स्तंभाति प्रवृत्त्यादीनां स्तंभनः मूर्छातृट्स्वेददाहघ्नश्च पाचनो व्रणादीनां मृदुकर्कशौ प्रसिद्धौ स्थू
लः स्थौल्यकरो देहे स्रोतसामवरोधकृत देहस्य सूक्ष्मछिद्रेषु विशेद्यत्सूक्ष्ममुच्यते द्रवः क्लेदका
रो व्यापी शुष्कस्तद्विपरीतकः आशुराशुकरो देहे धावत्यंभसि तैलवत मन्दः सकलकार्येषु शि
थिलोऽल्पोपिकथ्यते अथ गुणप्रस्तावाद्दीपनादयो गुणाः सलक्षणाः लिख्यते पचेन्नामं वह्निकृ
४ सौम् द्दीपनं तद्यथा मिसिः वह्निकृद्वह्निदीप्तिकृत ननु यद्वह्निं करोति प्रदीपयति तदामं कथं न
पचेदित्याशंकायामुच्यते दीपनं द्रव्यं तावत्तं वह्निं प्रदीपयति यथाग्नेर्भोक्तुमिच्छामुत्पादयति
न त्वामं पक्तुं क्षमः यथा सूक्ष्मदीपाग्निरुद्योतं करोति न तु रहत्स्थालीस्थान तण्डुलान् ओदनं क
र्तुं क्षमः पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनं नागकेशरवद्विद्याच्चित्रो दीपनपाचनः ननु

शा॰प्र॰ यद्वह्निं न दीपयति तदामं कथं पचतीत्याशंकायामाह पाचनं वह्निदीप्तिमकुर्वाणमप्यामं पचति यथा
८४ स्थाधानीस्थो ज्ञारसमूहोऽन्नं पचति न तु दीपवत्सर्वतः प्रदीपयतीति न शोधयति यद्दोषान्समान्नोदीरय
त्यपि समीकरोति संवृक्तो न शामनं तद्यथामृता यद्द्रव्यं दोषान्न शोधयति नोर्ध्वाधोमार्गाभ्यां पातयति समा
न्दोषान्नोदीरयति न वर्द्धयति शमनं च तत् कृत्वा पाकं मलानां यद्भित्वा बंधमधो नयेत् तच्चानुलोमनं ज्ञेयं
यथा प्रोक्ता हरीतकी मलानां अपक्वा। नं वातपित्तश्लेष्मणां बंधं वायुबंधं भित्वाऽधो नयेत् मलान्य
धः पातयति पक्तव्यं यदपक्वं श्लिष्टं कोष्ठे मलादिकं नयत्यधः स्रंसनं तद्यथा स्यात्कृतमालकः अमलतास
मलादिकं आदिशब्दात्कफपित्ते कृतमालः धनवहेर इति लोके मलादिकमबद्धं यद्बद्धं वा पिंडितं मलैः
भित्वाधः पातयति तद्भेदनं कटुकी यथा अबद्धं शिथिलं बद्धं गाढं मलैः दोषैः तच्चापि वातैः वक्रत्व
माधिक्यबोधनार्थं तैः पिंडितं गुटिकीकृतं विपक्वं यदपक्वं वा मलादि द्रवतां नयेत् रेचयत्यपि तज्ज्ञेयं
रेचनं त्रिवृता यथा। रेचयत्यपि अधः पातयति त्रिवृता पनिलर अपक्वं पित्तश्लेष्माणं च यमूर्द्ध्वं नयेत ८४

यत् वमनं तद्धि विज्ञेयं मदनस्य फलं यथा। ऊर्द्ध्वं नयेत् मुखमार्गेण बहिः कुर्य्यात् मदनस्य फलं मदन
फलं स्यान्नाद्बहिर्नयेदूर्द्ध्वमधो वा मलसंचयं देहे संशोधनं तत्स्याद्देवदालीफलं यथा। देवदाली सौमैत्रा वंदल २
इति च दीपनं पाचनं यत्स्यादुष्णत्वाद्द्रवशोषकं ग्राहि तच्च यथा शुंठीजीरकं गजपिप्पली रोह्यातत्रैष्या
त्कषायत्वाल्लघुपाकोंस्तु यन्नवेत् वातकृत्स्तंभनं तत्स्याद्यथा वत्सकटुंटुकौ वातकृत् प्रतिलोमत्वात्।
कृत स्तंभनं अधोगतिमलादीनां वत्सक कोरैत्र्या टुंटुकसोनापाठा श्लिष्टान्कफादिकान्दोषान्
मूलपतिपक्वलात् छेदनं तद्यथा क्षाराः मरिचानि शिलाजतु क्षारायवक्षारादयः धातून्मलान्वा देह
स्य विशोध्योल्लेखयेच्च यत् लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः उल्लेखयेत् कृशीकुर्यात् लेख
नं कृशीकारकं क्षौद्रं मधु यवा इन्द्रयवाः यस्माच्छुक्राद्भवेत् स्त्रीषु हर्षो वाजीकरं हितत् यथाश्व
गंधा मुशलीशार्करा च शतावरी हर्षो रितु मुत्साहः यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं हि तदुच्यते यथा
नागबलाद्याः स्युर्वीजं च कपिकच्छुरं दुग्धं माषाश्च भल्लातफलमज्जा यलानि च एतानि जनकानि

च१

शा.प्र. स्युःरेचकानिरेतसः जनकानि प्रभावात् शुक्रमुत्पादकानि स्त्रीस्मरणकीर्त्तनदर्शनसंभाषणाच्छीघ्रमे
८५ वरसाद्युत्पादनपूर्वकं शुक्रं जनयंति रेचकानि आधिक्यात्प्रवर्त्तयंति च प्रवर्त्तिनी स्त्री शुक्रस्य रेचनं
बृहतीफलं जातीफलं स्तंभनं स्यात्कालिंगं क्षयकारि च स्त्रीस्मरणदर्शनसंभाषणकीर्त्तनस्पर्शनचुं
मैथुने:४ बनालिंगननिधुवनैः समस्तैर्व्यस्तैर्वा शुक्रस्य प्रवर्त्तिनी प्रवृत्तिकारिणी रेचनं बृहतीफलं बृहत्कंट
कारीफलमपि शुक्रस्य रेचनं प्रवर्त्तकं कालिंगं कलिंदफलं रसायनं तु तद्ज्ञेयं यज्जराव्याधिनाशनं
यथामृतारुदंती च गुग्गुलुश्च हरीतकी पूर्वं व्याप्याखिलं कायं ततः पाकं च गच्छति वेणपत्रसमं पत्रं
शीफा चैव तथाल्पिका शिशिरे जलविंदून्स्रवंतीति रुदंतिका व्यवायि तद्यथा भंगा फेनं चाहिस
मुद्भवं अन्यद्द्रव्यं पक्वे सद्गुणं करोति व्यवायि तु अपक्वमेव स्वगुणैः सकलशरीरं व्याप्य पाकं याति
अहिसमुद्भवं फेनं अफीम संधिबंधांस्तु शिथिलान्यत्करोति विकाषि तत् विशोष्योजश्च धातुभ्यो
यथाक्रमुककोद्रवो धातुभ्यः सकलशरीरस्थेभ्यो वीर्येभ्यः ओजतय धातुविशेषं विशोष्य क ८५

मुकंपूगंबुद्धिंलुंपतिपद्द्रव्यंमदकारितदुच्यते तमोगुणप्रधानंचयथामद्यंसुरादिकं मदकारि माद
कं व्यवायिच विकाशिस्यात् श्लेष्मच्छेदि मदावहं आग्नेयंजीवितहरंयोगवाहिविषंस्मृतं व्यवा
यिसकलकायगुणव्यापनपूर्वकपाकगमनशीलंविकाशि ओजःशोषणपूर्वकसंधिबंधशि
थिलीकरणशीलंमदावहं तमोगुणाधिक्येनबुद्धिविध्वंसकंआग्नेयं अधिकाग्न्यंशं योगवा
~~तादयः पैच्छिल्याद्गौरवाद्द्रव्यंरुध्वारसवहाःशिराः धत्तेयद्गौरवंतत्स्यादभिष्यंदियथादधिगो~~
हि संधिगुणग्राहकं विषंजद्रंपदृष्टांतोवत्सनाभशृंगकादिः निजवीर्येणयद्द्रव्यंस्रोतोभ्योदोषसं
चयं निरस्यतिप्रमाथिस्यात्तद्यथामरिचंवचा दोषावातादयः पैच्छिल्याद्गौरवाद्द्रव्यंरुध्वारसव
हाःशिराः धत्तेयद्गौरवंतत्स्यादभिष्यंदियथादधि गौरवंशरीरे विदाहिद्रव्यमुद्गारमम्लंकुर्यात्
तृष्णावर्षा हृदिदाहंचजनयेत्पाकंगच्छतितच्चिरात् गच्छतीतियोगवाहिद्रव्यंसंसर्गिवस्तुगुणान्
पदेमानंयथैतन्मधुजलतैलाज्यमूत्रलोहादि अथवीर्यंचरकस्त्वाहवीर्यंतुक्रियतेयेनयाक्रिया

 सावीर्य्यंक्रियतेकिंचित्सर्वावीर्य्ययुताहिताः तत्रवाग्भटः उष्णशीतगुणोत्कर्षात्तुधेवीर्य्यंद्विधास्मृतं य
 त्सर्वमग्निषोमीयंदृश्यतेभुवनत्रयं अथतद्गुणाः उष्णंवातकफौहन्यात्पित्तंतुतनुतेतरां शीतंवात
कफातंकान्कुरुतेपित्तहृत्परं अन्यच्च तत्रोष्णंभ्रमतृड्ग्लानिस्वेददाहाशुपाकृत् शमनंचवातकफ
योःकरोतिशिशिरंपुनः ह्लादनंजीवनंस्तंभंप्रसादंरक्तपित्तयोः अथविपाकाः जाठरेणाग्निनायो
गाद्यदुदेतिरसांतरं रसानांपरिणामांतेसविपाकइतिस्मृतः मिष्टःपटुश्चमधुरमम्लोम्लंपच्यतेरसः
कटुतिक्तकषायाणांपाकःस्यात्प्रायशःकटुः तथाचवाग्भटः त्रिधारसानांपाकःस्यात्स्वाद्वम्ल
भाकेन४ कटुकात्मकः प्रायःपंदेनव्रीहिः स्यात्स्वाद्वम्लविपाकतः शिवाकषायमधुरपाका शुंठीक
टुकामधुरपाकेत्यादि अथविपाकानांगुणाः श्लेष्मकृन्मधुरःपाकोवातपित्तहरोमतः अम्लस्तुकु
रुतेपित्तंवातश्लेष्मगदापहः कटुःकरोतिपवनंकफंपित्तंचनाशयेत् विशेषएवरसतोविपाकानां
निदर्शितः अथप्रभावः रसादिसाम्येयत्कर्मविशिष्टंतत्प्रभावजं दंतीरसाद्यैस्तुल्यापिचि

त्रकस्य विरेचनी मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनं प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः
समापि कुरुते दोषत्रयस्य विनाशनं क्वचित्तु केवलं द्रव्यं कर्म कुर्यात्प्रभावतः ज्वरं हंति शिरोबद्धा
सहदेवीजटा यथा तथा नानौषधियोगेषु फलं प्रतिस्वभाव एवाश्रयणीयो न तु तत्र रसादिरूपहेतुर्वे
विचारितुंयोग्यानि ४ चारः कर्त्तव्यः यत आह सुश्रुतः अमीमांस्यान्यचिंत्यानि प्रसिद्धानि स्वभावतः आगमेनोपयोज्या
निशेषज्ञानि विचक्षणैः प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः नौषधीर्हेतुभिर्विद्वान्परीक्षेत क
दाचन विरुद्धगुणसंयोगे भूयसाल्पं हि जीयति रसं विपाकस्तौ वीर्यं प्रभावस्तान्यपोहति इतिर
सगुणवीर्यविपाकप्रभावानां स्वरूपानभिधाय कुत्र द्रव्ये के रसादयः संतीति बोधयितुं तत्र द्रव्य
गतान्रसगुणवीर्यविपाकप्रभावानाह तत्र प्रथमं हरीतक्या उत्पत्तिनामलक्षणगुणानाह
दक्षप्रजापतिं स्वस्थमश्विनौ वाक्यमूचतुः कुतो हरीतकी जाता तस्यास्तु कति जातयः रसाः कति
समाख्याताः कति चोपरसाः स्मृताः नामानि कति चोक्तानि किं वा तासां च लक्षणं के च वर्णगु

भा.प्र.
८७ णः केचकाचकुत्रप्रयुज्यते केनद्रव्येणसंयुक्ताकांश्चरोगान्व्यपोहति प्रश्नमेनंतंयथाप्रष्टंभगवन्वक्तु
मर्हसि अश्विनोर्वचनंश्रुत्वादक्षोवचनमब्रवीत् दक्षोवाच पपातविंदुर्मेदिन्यांशक्रस्यपिबतोऽमृतं ततो
दिव्यासमुत्पन्नासप्तजातिर्हरीतकी हरीतक्यभयापथ्याकायस्थापूतनामृता हैमवत्यव्यथाचापिचेत
कीश्रेयसीशिवा वयस्थाविजयाचापिजीवंतीरोहिणीतिच॥ विजयारोहिणीचैवपूतनाचाभयामृता
जीवंतीचेतकीचेतिपथ्यायाःसप्तजातयः॥ अलावुवृत्ताविजयावृत्तासारोहिणीस्मृतः पूतनास्थिम
तीसूक्ष्माकथितामांसलामृतापंचरेखाभयाप्रोक्ताजीवंतीस्वर्णवर्णिनी त्रिरेखाचेतकीज्ञेयासप्ताना
मियमाकृतिः विजयासर्वरोगेषुरोहिणीव्रणरोहिणी प्रलेपेपूतनायोज्याशोधनार्थेऽमृताहिता अ
क्षिरोगेऽभयाशस्ताजीवंतीसर्वरोगहृत् चूर्णार्थेचेतकीशस्तायथायुक्तंप्रयोजयेत् चेतकीद्विविधाप्रो
श्रा२ क्ताश्वेताकृष्णाश्चवर्णतः षडंगुलायताशुक्लाकृष्णात्वेकांगुलास्मृता काचिदास्वादमात्रेणकाचिद्गंधे
नभेदयेत् काचित्स्पर्शेनदृष्ट्यान्याचतुर्धाभेदयेच्छिवा चेतकीपादपच्छायामुपसर्प्यंतियेनराः ति२ ८७

२:

द्यं तेतत्क्षणादेव पश्युपक्षिमृगादयः चेतकीं विधृता हस्ते यावत्तिष्ठति देहिनः तावद्भिद्येत वेगैस्तु प्रभावान्नात्र
संशयः नृपाणां सुकुमाराणां कृशानां भेषजद्विषां चेतकी परमा शस्ता हिता सुखविरेचनी सप्तानामपि
जातीनां प्रधाना विजया स्मृता सुखप्रयोगा सुलभा सर्वरोगेषु शस्यते हरीतकी पंचरसाऽलवणा तुवरा
परं रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायिनी चक्षुष्या लघुरायुष्या बृंहणी चानुलोमनी श्वासकास
प्रमेहार्शः कुष्ठशोथोदरकृमीन् वैस्वर्य्यग्रहणीरोगविबंधाविषमज्वरान् गुल्माध्मानव्रणच्छर्दिहि
क्काकंठहृदामयान् कामलां शूलमानाहं प्लीहानं च यकृत्तथा अश्मरीं मूत्रकृच्छ्रं च मूत्राघातं च नाश त्रा ५
येत् स्वादुतिक्तकषायत्वात्पित्तकफहृत्तु सा कटुतिक्तकषायत्वादम्लत्वाद्वातहृच्छिवा पित्तकृ
त्कटुकाम्लत्वाद्वातकृन्न कथं शिवा प्रभावाद्दोषहंतृत्वं सिद्धं यत्तत्प्रकाश्यते हेतुभिः शिष्यबोधार्थं न
पूर्वं क्रियतेऽधुना कर्म्मान्यत्वं गुणैः साम्यं दृष्टमाश्रयभेदतः यतस्ततो नेति चिंत्यं धात्रीलकुचयोर्यथा
पथ्यायामज्जनि स्वादुः स्नायावम्लो व्यवस्थितः वृंते तिक्तस्त्वचि कटुरस्थिस्थस्तुवरो रसः नवा स्निग्धघ

कर्मसमूह २ ८५२

॥ श्रीकेतुल्यगुणान्न स सैंधवयुतां मेघावने छांवरे तुल्यं शर्करया शरद्विमलया सुंठ्या तुषारागमे ॥ पिप्पल्या शिशिरे वसंतसमये क्षौद्रेण संयुज्य तां
राजन्भुंक्ष्व हरीतकीमिव गदा नश्यंतु ते शत्रवः ॥१॥२४

 नावृत्ता गुर्वी क्षिप्ता च यांभसि निमज्जेत्सा सुप्रशस्ता कथितातिगुणा च सा नवादिगुणयुक्तत्वं तथैकत्राधिक
 र्षता हरीतक्याः फले यत्र द्वयं तच्छ्रेष्ठमुच्यते चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी स्विन्ना संग्राहिणी सेदिता२
पथ्या भृष्टा प्रोक्ता त्रिदोषनुत उन्मीलिनी बुद्धिबलेंद्रियाणां निर्मूलिनी पित्तकफानिलानां विस्रंसिनी
पिष्ट४ मूत्रशकृन्मलानां हरीतकी स्यात्सहभोजनेन अन्नपानकृतान्दोषान्वातपित्तकफोद्भवान हरीतकी हरत्या
शु भुक्तस्योपरि योजिता लवणेन कफं हंति पित्तं हंति सशर्करा घृतेन वातजान्रोगान्सर्वरोगान्गुडान्विता
सिंधूत्थशर्कराशुंठीकणामधुगुडैः क्रमात वर्षादिष्वभया प्राश्या रसायनगुणैषिणा अध्वातिखिन्नो ब
लवर्जितश्च रूक्षः कृशो लंघनकर्षितश्च पित्ताधिको गर्भवती च नारी विमुक्तरक्तस्त्वभयां न खादेत नव
ज्वरी विदिः अथ विभीतकस्य नामानि गुणाश्च विभीतकस्त्रिलिंगः स्यादक्षः कर्षफलस्तुसः कलिद्रुमोभू
तवासस्तथा कलियुगालयः विभीतकं स्वादुपाकं कषायं कफपित्तनुत उष्णवीर्यं हिमस्पर्शं भेदनं कास
नाशनं रूक्षं नेत्रहितं केश्यं कृमिवैस्वर्यनाशनं विभीतमज्जा तृट्छर्दिकफवातहरो लघुः कषायो मद

रूक्षा तथा धात्रीमज्जापि तद्गुणा अथामलक्यानामगुणाः त्रिष्वामलकमाख्यातं धात्री तिष्यफलामृता हरी
तकीसमं धात्रीफलं किंतु विशेषतः रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनं हंति वातं तदम्लत्वात्पित्तं माधुर्य
शैत्यतः कफं रूक्षकषायत्वात्फलं धात्र्यास्त्रिदोषजित् यस्य यस्य फलस्येह वीर्यं भवति यादृशं तस्य
तस्यैव वीर्येण मज्जानमपि निर्दिशेत् अथ त्रिफलालक्षणनामगुणाश्च पथ्याविभीतधात्रीणां फलैः
स्यात्त्रिफलासमैः फलत्रिकं च त्रिफला सा वरा च प्रकीर्तिता त्रिफला कफपित्तघ्नी मेहकुष्ठहरी सरा
चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी अथ शुंठीनामानि गुणाश्च शुंठी विश्वा च विश्वं च नागरं वि
श्वभेषजं ऊषणं कटुभद्रं च शृंगवेरं महौषधं शुंठी रुच्यामवातघ्नी पाचनी कटुका लघुः स्निग्धोष्णा
मधुरा पाके कफवातविबंधनुत् वृष्या स्वर्या वमिश्वासशूलकासहृदामयान् हंति श्लीपदशोफार्शो
नाहोदरमारुतान् आग्नेयगुणभूयिष्ठं तोयांशं परिशोषयेत् संगृह्णाति मलं तत्तु ग्राहि शुंठ्यादिकं यथा
अत्राह कश्चित् विबंधभेदनी या तु सा कथं ग्राहिणी भवेत् सिद्धांतमाह उ शक्तिर्विबंधभेदे स्याद्यतो न मल

भा॰प्र॰
८९

पातने अथार्द्रकस्यनामानिगुणाश्च आर्द्रकंशृंगवेरंस्यात्कटुभद्रंतथार्द्रिका आर्द्रिकाभेदिनीगुर्वीतीक्ष्णो
ष्णादीपिनीतथा कटुकामधुरापाकेरूक्षावातकफापहा येगुणाःकथिताःशुंठ्यास्तेपिसंत्यार्द्रकेगु-
णाः भोजनाग्रेसदापथ्यंलवणार्द्रकभक्षणं अग्निसंदीपनंरुच्यंजिह्वाकंठविशोधनं कुष्ठेपांड्वामये
कृच्छ्रेरक्तपित्तेव्रणेज्वरे दाहेनिदाघशरदोर्नैवपूजितमार्द्रकं पिप्पलीनामगुणाश्च पिप्पलीमागधीकृ
ष्णावैदेहीचपलाकणा उपकुल्योषणाशौंडीकोलास्यात्तीक्ष्णतंडुला पिप्पलीदीपनीवृष्यास्वादुपा-
कारसायिनी अनुष्णाकटुकास्निग्धावातश्लेष्महरीलघुः पित्तलारेचिनीहंतिश्वासकासोदरज्वरा
न् कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाममारुतान् आर्द्राकफप्रदास्निग्धाशीतलामधुरागुरुः पित्तप्रशम
नीसातुशुष्कापित्तप्रकोपिनी पिप्पलीमधुसंयुक्तामेदःकफविनाशिनी श्वासकासज्वरहरीवृष्या-
मेधाग्निवर्द्धनी जीर्णज्वरेऽग्निमांद्येचशस्यतेगुडपिप्पली कासाजीर्णारुचिश्वासहृत्पांडुकृमिरोग
नुत् द्विगुणःपिप्पलीचूर्णात्गुडोत्रभिषजांमतः अथमरिचस्यनामगुणाः मरिचंवल्लिजंकृष्ण ८९

मूषणंधर्मपत्तनं मरिचंकटुकंतीक्ष्णंदीपनंकफवातजित् उष्णंपित्तकरंरूक्षंश्वासशूलक्रिमीन्हरेत्त
दार्द्रंमधुरंपाकेनात्युष्णंकटुकंगुरुंकिंचित्तीक्ष्णगुणंश्लेष्मप्रकोपिस्यादपित्तलं अथत्रिकटुनोलक्षणना
मगुणाः विश्वोपकुल्यामरिचंत्रयंत्रिकटुकथ्यते कटुत्रिकंतुत्रिकटुत्र्यूषणंव्योषमुच्यते त्र्यूषणंदीप
नंहंतिश्वासकासत्वगामयान् गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् अथपिप्पलीमूलनामगु
णाश्च ग्रंथिकंपिप्पलीमूलमूषणंचटकाशिरः दीपनंपिप्पलीमूलंकटूष्णंपाचनंलघु रूक्षंपित्तक
रंभेदीकफवातोदरापहं आनाहप्लीहगुल्मघ्नंकृमिश्वासक्षयापहं अथचतुरूषणस्यलक्षणगुणाः
त्र्यूषणंसकणामूलंकथितंचतुरूषणं व्योषस्येवगुणाःप्रोक्ताअधिकाश्चतुरूषणे चव्यनामगु
णाश्च भवेच्चव्यंतुचविकाकथितासातथोषणा कणामूलगुणंचव्यंविशेषाद्गुदजापहं चव्यं
तुचविकाचाथविवग्राजंतुकलल: चविकावकुतिक्कोलादीपनीपाचनीलघुःकफपित्तहराचैव
किंचिद्वातप्रकोपिणी जायतेदक्षिणेदेशेसाचाहेतिप्रकीर्तिता निर्गुंडीपत्रवत्पर्णपराक्षीयाहि

भा·प्र·
९० मागता पचनेशोषरुचिकरीविशेषान्मेदनाशिनी अथगजपिप्पल्यानामगुणाश्च चविकायाःफलं
प्राज्ञैःकथितागजपिप्पली कपिवल्लीकोलवल्लीश्रेयसीवसरश्चसा गजकृष्णाकटुर्वातश्लेष्म
नुतवन्हिवर्द्धिनी उष्णानिहंत्यतीसारश्वासकंठामयक्रमीन् अथचित्रकनामगुणाः चित्रकोऽन
लनामाचपाठीव्यालस्तथोषणः चित्रकःकटुकःपाकेवन्हिकृत्पाचनोलघुः रूक्षोष्णग्रहणीकुष्ठशो(
थार्शःकृमिकासनुत् वातश्लेष्महरोग्राहीवातार्शःश्लेष्मपित्तनुत् अथपंचकोलस्यलक्षणगुणाः
पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः पंचभिःकोलमात्रंयत्पंचकोलंतदुच्यते पंचकोलंरसेपा
केकटुकंरुचिकृन्मतं तीक्ष्णोष्णंपाचनंश्रेष्ठंदीपनंकफवातनुत् गुल्मप्लीहोदरानाहशूलघ्नंपि
त्तकोपनं अथषडूषणस्यलक्षणगुणाः पंचकोलंसमरिचंषडूषणमुदाहृतं पंचकोलगुणंत
त्तुरूक्षंविषापहं अथयवानीनामगुणाः यवानिकोग्रगंधाचब्रह्मदर्भाजमोदिका सैवोक्तादीप्य
कोदीप्यातथास्याद्यवसाह्वया यवानीपाचनीरुच्यातीक्ष्णोष्णाकटुकालघुः दीपनीचतथातिक्ता ९०

पित्तलाशुक्रशूलहृत् वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत् अथद्वितीययवानीनामगुणाः पवानीय
जवानीस्याच्चोहारोजंतुनाशनः चोहारस्तुगुणैःप्रोक्तो विशेषात्कृमिनाशनः अथाजमोदानामगुणाः
अजमोदाखराश्वाचमयूरोदीप्यकस्तथा तथाब्रह्मकुशाप्रोक्ताकारवीलोचमस्तकः अजमोदाकटु
स्तीक्ष्णादीपनीकफवातनुत् उष्णाविदाहिनीहृद्या वृष्याबलकरीलघुः नेत्रामयकृमिच्छर्दिहिध्मा
वस्तिरुजोहरेत् अथखुरासानीयवानीगुणाः पारसीकयवानीतुयवानीसदृशागुणैः विशेषात्पाचनी
रूक्षाग्राहिणीमादिनीगुरुः शुक्लजीरककृष्णजीरककलौंजीएषांनामगुणाः जीरकोजरणोऽजाजीकणा
स्याद्दीर्घजीरकः कृष्णजीरःसुगंधिश्चतथैवोद्गारशोधनः कालाजाजीतुसुखवीकालिकाचोपकालि
का पृथ्वीकाकारवीपृथ्वीपृथुःकृष्णोपकुंचिका उपकुंचीचकुंचीचबृहज्जीरकइत्यपि जीरकत्रि
तयंरूक्षंकटूष्णंदीपनंलघु संग्राहिपित्तलंमेध्यंगर्भाशयविशुद्धिकृत् ज्वरघ्नंपाचनंवृष्यंबल्यंरुच्यंक
फापहं चक्षुष्यंपवनाध्मानगुल्मच्छर्द्यतिसारनुत् अथधान्याकनामगुणाः धन्याकंधान्यकंधान्यंधानाधा

भा·प्र· नेयकंतथा कुनटीधेनुकाछत्राकुस्तुंवरवितुन्नकं। धान्याकंतुवरंस्निग्धमवृष्यंमूत्रलंलघु तिक्तंकटूष्ण
५१ वीर्यंचदीपनंपाचनंस्मृतम ज्वरघ्नंरोचनंग्राहिस्वादुपाकोत्रिदोषनुत तृष्णादाहवमिश्वासकासकार्श्यकृमिप्रणु
त् आर्द्रंतुतद्गुणंस्वादुविशेषात्पित्तनाशनं अथसोवाशौफतयोर्नामानिगुणाश्च शतपुष्पाशताव्हाचमधु
राकारवीमिसिः अतिछत्रासिताछत्रासंहिताछत्रिकापिच छत्राशालेयशालीनौमिश्रेयामधुरामिसिः
शतपुष्पालघुस्तीक्ष्णापित्तकृद्दीपनीकटुः उष्णाज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत मिश्रेयातद्गुणाप्रो
क्ताविशेषाद्योनिशूलनुत अग्निमांद्यहरीहृद्याबद्धविट्कृमिशुक्रहृत रूक्षोष्णापाचनीकासवमिश्लेष्मा
निलान्हरेत् अथमेथीवनमेथीतयोर्गुणाः मिश्रेयामिश्रि[illegible]याल्लानौशालीशीतशिवामता मेथिकावा
तघ्नामनीश्लेष्मघ्नीज्वरनाशिनी ततःस्वल्पगुणावन्यावाजिनांसातुपूजिता अथचंद्रसूरस्यगुणाः चंद्रसूरं चंसुरइतिलोके२
हितंहिक्कावातश्लेष्मातिसारिणां असृग्वातगदद्वेषीबलपुष्टिविवर्द्धनं अथचारिदाना· मेथिकाचंद्रसू
रंचकालाजाजीयवानिका एतच्चतुष्टयंयुक्तंचतुर्बीजमितिस्मृतं तच्चूर्णंभक्षितंनित्यंनिहंतिपवनामयान ५१

अजीर्णंशूलमाध्मानंपार्श्वशूलंकटिव्यथां अथहिंगुगुणाः सहस्रवेधिजतुकंबाल्हिकंहिंगुरामठंहिंगूष्णंपा
चनंरुच्यंतीक्ष्णंवातबलासनुत शूलगुल्मोदरानाहकृमिघ्नंपित्तवर्द्धनं अथवचानामगुणाः वचोग्रगंधाषड्
ग्रंथागोलोमीशतपर्विका क्षुद्रपर्णीचमंगल्याजटिलोग्राचलोमसा वचोग्रगंधाकटुकातिक्तोष्णावांतिवन्हि
कृत विबंधध्मानशूलघ्नीशकृन्मूत्रविशोधिनी अपस्मारकफोन्मादभूतजंत्वनिलान्हरेत अथखु
रासानीवच पारसीकवचाशुक्लाप्रोक्ताहैमवतीतिसा हैमवत्युदितातद्वद्वलंहंतिविशेषतः अथमहा
भरीवचायस्यालोकेकुलिंजनइतिनामांतरं सुगंधाप्युग्रगंधाचविशेषात्कफकासनुत सुस्वरत्वक
रीरुच्याहृत्कंठमुखशोधिनी अथरासुगंधाःस्थूलग्रंथिःतथाःलोकेमहाभरइतिनाम स्थूलग्रंथिःसु
गंधास्याततोहीनगुणास्मता अथचोवचिनीगुणाः दीपांतरवचाकद्वीतिक्तोष्णावन्हिदीप्तिकृत विबंधा
ध्मानशूलघ्नीशकृन्मूत्रविशोधिनी वातव्याधीनपस्मारमुन्मादंतनुवेदनां व्यपोहतिविशेषेणफिरं
गामयनाशिनी अथहैचेरच्यंतन्नाध्येप्रथमंफलंमतस्यसदृशंविश्रगंधंद्वितीयमश्वस्यफलस्यसदृशंमतस्य

भा॰प्र॰ गंधंतयोर्नामानिगुणाश्च हपुषावपुषाविस्त्रपरात्वल्पफलीस्मृता मत्स्यगंधाप्लीहहंत्रीविषघ्नीध्वांक्षना
९२ शिनी हपुषादीपनीतिक्ताकटूष्णातुवरागुरुः पित्तोदरसमीरार्शोग्रहणीगुल्मशूलनुत् पराप्येतद्गुणाप्रो
क्तारूपभेदोद्वयोरपि अथवायुविडंगः पुंसिक्लीबेविडंगंस्यात्कृमिघ्नोजंतुनाशनः तंडुलश्चतथावेल्ल
ममोघाचित्रतंडुला विडंगंकटुतीक्ष्णोष्णंरूक्षंवह्निकरंलघुः शूलाध्मानोदरश्लेष्मकृमिवातविबंध
नुत् अथतुंबरुफलम् तुंबरुर्द्विविभेदोहिपश्चिमार्णवतीरजः पत्रैश्चवकुलाकारैःकलापसदृशो
ःफलैः तत्पुष्पंतुंबरुख्यातंकषायंकटुपाकिच वान्तमुष्णंमरिचवत् तुंबरुःसौरभःसौरोवनजः
सानुजोंधकः तुंबरुःप्रथितंतिक्तंकटुपाकेपितत्कटु रूक्षोष्णंदीपनंतीक्ष्णंरुच्यंलघुविदाहि
च वातश्लेष्माक्षिकर्णौष्ठशिरोरुग्गुदजकृमीन् कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणिनाशयेत् अथ
वंशरोचना स्याद्वंशरोचनावांसीतुगाक्षीरीतुगाशुभा त्वक्क्षीरीवंशजाशुभ्रावंशक्षीरीचवैणवी
वंशजावृंहणीवृष्याबल्यास्वाद्वीचशीतला तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः हरेत्कुष्ठं ९२

व्रणंपाण्डुकषायावातकृच्छ्रजित् अथसमुद्रफेननाम॰ समुद्रफेनःफेनश्चडिंडीरोब्धिकफस्तथा
समुद्रफेनश्चक्षुष्योलेखनःशीतलःसरः कषायोविषपित्तघ्नःकर्णरुक्कफहृल्लघुः अथाष्टक
वर्गस्यलक्षणगुणाः जीवकर्षभकौमेदेकाकोल्यौऋद्धिवृद्धिके अष्टवर्गोऽष्टभिर्द्रव्यैःकथित
श्चरकादिभिः अष्टवर्गोहिमःस्वादुर्बृंहणःशुक्रलोगुरुःभग्नसंधानकृत्तन्पबलासबलवर्द्धनः
वातपित्तास्रतृड्दाहज्वरमेहक्षयप्रणुत् अथजीवकर्षभकयोरुत्पत्तिलक्षणनामगुणाःजी
वकर्षभकौज्ञेयौहिमाद्रिशिखरोद्भवौ रसोनकंदवत्कंदौनिःसारौसूक्ष्मपत्रकौ जीवकःकूर्चका
कारोऋषभोवृषशृंगवत् जीवकोमधुरःशृंगोह्रस्वांगःकूर्चशीर्षकः ऋषभोवृषभोधीरोविषा
णीन्द्राक्षइत्यपि जीवकर्षभकौबल्यौशीतौशुक्रकफप्रदौ मधुरौपित्तदाहास्रकार्श्यवातक्षया
पहौ अथमेदामहामेदयोरुत्पत्तिलक्षणंनामगुणाः महामेदाभिधःकंदोमोरंगादौप्रजायते म
हामेदावनोमेदास्यादित्युक्तंमुनीश्वरैः शुक्लार्द्रकनिभःकंदोलताजातःसुपाण्डुरः महामेदाभिधो

भा·प्र· ज्ञेयोमेदालक्षणमुच्यते शुक्लकंदोनखछेद्योमेदोधातुमिवस्रवेत् यःसमेदेतिविज्ञेयोजिज्ञासतत्परे
८२ र्बुधैः शाल्यपर्णीमणिच्छिद्रामेदामेदोभवध्वरा महामेदावसुछिद्रात्रिदंतीदेवतामणिः मेदोयुगंगुरुः
स्वादुःवृष्यंस्तन्यकफावहं बृंहणंशीतलंपित्तरक्तवातक्षयप्रणुत् अथकाकोलीक्षीरकाकोल्योरु
त्पत्तिनामगुणाः जायतेक्षीरकाकोलीमहामेदानिवस्थले यत्रस्यात्क्षीरकाकोलीकाकोलीतत्रजायते
पीवरीसदृशःकंदःसक्षीरःप्रियगंधवान् साप्रोक्ताक्षीरकाकोलीकाकोलीलिंगमुच्यते यथास्या
त्क्षीरकाकोलीकाकोल्यपितथाभवेत् एषाकिंचिद्भवेत्कृष्णाभेदोयमुभयोरपि काकोलीवायसो
लीचवीराकायस्थिकातथा साशुक्लाक्षीरकाकोलीवयस्थाःक्षीरवल्लिकाःकथिताक्षीरणीधीरा
क्षीरशुक्लापयस्विनी काकोलीयुगलंशीतंशुक्रलंमधुरंगुरु बृंहणंवातदाहास्रपित्तशोषज्वरा
पहं अथर्द्धिवृद्ध्योरुत्पत्तिलक्षणनामगुणाः ऋद्धिर्वृद्धिश्चकंदौद्वौभवतःकोशयामले श्वेतलोमा
न्वितःकंदोलताजातःसरंध्रकः सएवऋद्धिर्वृद्धिश्चभेदमप्येतयोर्ब्रुवे तूलग्रंथिसमाऋद्धिर्वामा ८२

वर्त्रफलात्वसा वृद्धिस्तु दक्षिणावर्त्रफला प्रोक्ता महर्षिभिः ऋद्धिर्योग्यं सिद्धिलक्ष्म्योर्वृद्धेरप्याह्वयाऽस्मे ऋ
द्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः प्राणैश्वर्यकरी मूर्छारक्तपित्तप्रणाशिनी वृद्धिर्गर्भप्रदा शीता वृं
हणी मधुरा स्मृता वृष्या पित्तास्रशमनी क्षतकासक्षयापहा राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः तस्मा
दस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् मुख्यसदृशः प्रतिनिधिः एतस्य प्रतिनिधिमाह मेदाजीवककाको
ली ऋद्धिद्वंद्वेऽपि चासति वरी विदार्यश्वगंधावाराहीश्च क्रमात् क्षिपेत् मेदामहामेदास्थाने शतावरीमूलं
जीवकर्षभकस्थाने विदारीमूलं काकोलीक्षीरकाकोलीस्थाने अश्वगंधामूलं ऋद्धिवृद्धिस्थाने वारा
हीकंदं गुणैस्तत्तुल्यं क्षिपेत् अथ यष्टीमधु जलयष्टीमधु यष्टीमधु तथा यष्टीमधुकं क्लीतकं तथा शो
थविषच्छर्दितृष्णाग्लानिक्षयापहा अथ कंबीला काम्पिल्लः कर्कशश्चंद्रो रक्तांगो रोचनोऽपि च का।
पिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् हंति रेची कटुर्मेहानाहविषाश्मनुत् अथ धन्व
हेरा आरग्वधो राजवृक्षः शंपाकश्चतुरंगुलः आरेवतो व्याधिघातकृतमालसुवर्णकाः कर्णिका

कंतका ॥ अन्यच्च शीतकं तंतुभवेत्तो येमधूलिका ॥ यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलकृत् ऐ ॥ सुस्निग्धा शुक्रला केश्या
स्वर्या पित्तानिलास्रजित् ॥ १८ ॥

उर्ध्वश्वासः २

भा॰प्र॰ रोदीर्घफलः स्वर्णांगः स्वर्णभूषणः आरग्वधो गुरुः स्वादुः शीतलः स्रंसनोत्तमः ज्वरहृद्रोगपित्तास्रवा।
६४ तोदावर्त्तशूलनुत् तत्फलं स्रंसनं रुच्यं कुष्ठपित्तकफापहं ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परं अथ
कटुकी कट्वी तु कटुका तिक्ता कृष्णभेदा कटंभरा अशोका मत्स्यशकला चक्रांगी शकुलादनी मत्स्य
पित्ता कांडरुहा रोहिणी कटुरोहिणी कटुकी कटुका पाके तिक्ता रूक्षा हिमा लघुः भेदिनी दीपनी हृ
द्या कफपित्तज्वरापहा प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत् अथ चिरायता किराततिक्तः।
कैरातः कटुतिक्तः किरातकः कांडतिक्तो नार्यतिक्तो भूनिंबो रामसेनकः किरातकोन्यो नैपालः
सोर्द्धतिक्तो ज्वरांतकः किरातः सारको रूक्षः शीतलस्तिक्तको लघुः सन्निपातज्वरश्वासकफपि
त्तास्रदाहनुत् कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् अथेंद्रयवनामगुणाः फलं कुटजबीजं तु
यवमिंद्रयवं तथा कलिंगं चापि कालिंगं तथा भद्रयवं स्मृतं इतिकेचिमरःप्राह कश्चिदिंद्रस्य ना।
मेवं भवेत्तदभिधायिकं फलानींद्रजवास्तस्य तथा भद्रयवा अपि इति धन्वंतरिः प्राह ऐंद्रयवं भिदो ६४

ग्रंसंग्राहिकटुष्णशीतलंज्वरातीसारकासार्त्तः कृमिवीसर्प्पकुष्टनुत दीपनंगुदकीलास्रवातास्रश्रमशूल
जित अथमदनफल मदनश्छर्द्दनः पिंडीराठः पिंडीतकस्तथा करहाटोमरुवकः शल्यकोविषपु
ष्पकः मदनोमधुरस्तिक्तोवीर्य्योष्णोलेखनोलघुः वांतिकृद्विद्रधिहरः प्रतिश्यायव्रणांतकः रूक्ष
ः कुष्टकफानाहशोफगुल्मव्रणापहः अथरास्ना रास्नायुक्तरसारस्यासुवहारसनारसा एला
पर्णीचसुरसासुगंधाश्रेयसीतथा रास्नामपाचनीतिक्तागुरूष्णाकफवातजित सोथश्वासमीरास्र
वातशूलोदरापहा कासज्वरविषाशीतिवातिकामयहिध्महृत अथरास्नाभेदनायइतिलोकेना
कुलीसुरसानागसुगंधागंधनाकुली नकुलेष्टाभुजंगाक्षीसर्प्पांगीविषनाशिनी नाकुलीतुवरा
तिक्ताकटुकोष्णाविनाशयेत भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान अथमाचिका पश्चि
मदेशेमोंआइतिलोकेप्रसिद्धोवृक्षविशेषः माचिकाप्रस्थिकाचष्टा तथांबांबालिकांबिका मयू
रविदलाकेशीसहस्राबालमूलिका माचिकाम्लारसेपाकेकषायाशीतलालघुः पक्वातीसार

मा.प्र. पित्तास्रकफकंडूमयापहा अथतेजवती तेजवल्कलइतिच तेजस्विनीतेजवतीतेजोह्वातेजनीतथा
९५ तेजस्विनीकफश्वासकासास्यामयवातहृत् पचन्युष्णाकटुस्तिक्तारुचिवन्हिप्रदीपिनी अथतुमजिनी
मालकांगुनीइतिच ज्योतिष्मतीस्यात्कटभीज्योतिष्काकंगुनीतिच पारावतपदीपण्यालताप्रोक्ताकु
कुंदनी ज्योतिष्मतीकटुस्तिक्तासराकफसमीरजित् अत्युष्णावामनीतीक्ष्णावन्हिबुद्धिस्मृतिप्रदा अ
थकुष्ठ कुष्ठंरोगाह्वयंवाप्यंपारिभद्रंतथोत्पलं कुष्ठमुष्णंकटुस्वादुशुक्रलंतिक्तलंलघुः हंतिवातास्रवीस
र्पकासकुष्टमरुत्कफान् अथकुष्ठभेदपुष्करमूल उक्तंपुष्करमूलंतुपोष्करंपुष्कराह्वयं पद्म
पत्रंत्वकाश्मीरंकुष्ठभेदमिदंजगुः पौष्करंकटुकंतिक्तमुष्णंवातकफज्वरान् हंतिशोथारुचिश्वासा
न्विशेषात्पार्श्वशूलनुत् अथचोक पट्टपर्णीहेमवतीहेमक्षीरीहिमावती हेमाह्वापीतदुग्धाचतत्
मूलंचोकमुच्यते हेमाह्वारेचनीतिक्ताभेदिन्युत्क्लेशकारिणी कृमिकण्डूविषानाहकफपित्तास्रकु
ष्ठनुत् अथकाकडाशृंगी शृंगीकर्कटशृंगीचस्यात्कुलीरविषाणिका अजशृंगीचवक्राचकर्कटाख्या ९५

चक्रीर्न्निता शृंगीकषायातिक्तोष्णाकफवातक्षयज्वरान श्वासोर्द्ध्ववाततृट्कासहिध्मारुचिवमीर्हरेत अथ
कायफलं कट्फलं सोमवल्कश्च कैडर्य्यः कुंभिकापि च श्रीपर्णिकाकुमुदिकाभद्राभद्रवतीति च कट्
ट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान हंति श्वासप्रमेहार्शः कासाकरागामयारुचीः अथ भार्गी
भार्गीभृगुभवापद्मीफंजीब्राह्मणयष्टिका ब्राह्मणीपंगारवल्लीखरदरशाकश्च हंजिका भार्गीरूक्षाकटु
स्तिग्धारुच्योष्णापाचनीलघुः दीपनीतुवरागुल्मरक्तमुन्नाशयेत्ध्रुवं शोथकासकफश्वासपीनस(
ज्वरमारुतान हाथाजोडीगुणाः पाषाणभेदकोश्मभेदो गिरिभित्भिन्नयाजनी अश्मभेदो हिमस्तिक्तः
कषायोबस्तिशोधनः भेदनोहंतिदोषार्शोगुल्मकृच्छ्राश्महृद्रुजः योनिरोगात्प्रमेहांश्चप्लीहशूलव्र
णानिच अथधावई धातकीधातपुष्पीचताम्रपुष्पीचकुंजरा सुभिक्षाबहुपुष्पीचवन्हिज्वालाचसा(
स्मृता धातकीकटुकाशीतामदकृत्तुवरालघुः तृष्णातीसारपित्तास्रविषकृमिविसर्पजित अथमं(
जिष्ठा मंजिष्ठाविकसाजंगीसमंगाकालमेषिका मंडूकपर्णीभंडीरीचंडीयोजनवल्लपिरसायन्यरु

भा·प्र· णाकालारक्तांगीरक्तयष्टिका भंडीवकीचगंडीरीमंजूषावस्त्ररंजिनी मंजिष्ठामधुरातिक्ताकषायास्वर
९६ वर्णकृत गुरुरुष्णाविषश्लेष्मशोथयोन्यक्षिकर्णरुक रक्तातिसारकुष्ठास्रविसर्पव्रणमेहनुत अथ।
कुसुंभं स्यात्कुसुंभंवन्हिशिखंवस्त्ररंजकमित्यपि कुसुंभंवातलंकृच्छ्ररक्तपित्तकफापहं अथला
क्षा लाक्षापलंकषालक्तोयवोवृक्षामयोजतु लाक्षावर्ण्याहिमाबल्यास्निग्धाचतुवरालघुः अनुष्णाक
फपित्तास्रहिक्काकासज्वरप्रणुत व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा अलक्तकोगुणैस्तद्वद्विशे
षाद्व्यंगनाशनः अथहलद हरिद्राकांचनीपीतानिशाख्यावरवर्णिनी कृमिघ्नाहलदीयोषित्प्रियाह
ट्टविलासिनी हरिद्राकटुकातिक्तारूक्षोष्णाकफपित्तनुत वर्ण्यात्वग्दोषमेहास्रशोथपांडुव्रणापहा अ
थवनहलदी अरण्यहलदीकंदःकुष्ठवातास्रनाशनः अथकर्पूरहलदी दार्वीभेदाम्रगंधाचसुर
नीदाहदारुच कर्पूरापद्मपत्रास्यात्सुरभिःसुरनायका आम्रगंधिर्हरिद्रायासाशीतावातलामता पि
त्तहृन्मधुरातिक्तासर्वकंडूविनाशिनी अथदारुहलदी दार्वीदारुहरिद्राचपर्जन्यापर्जनीतिच कटं ९६

भा॰प्र॰ रंलघु अथातिविषा विषात्वतिविषा विश्वा शृंगी प्रतिविषारुणा शुक्लकंदा चोपविषा भंगुरा घुणवल्लभा वि
८५ षासोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् कफपित्तातिसारामविषकासवमिक्रिमीन् अथ लोध्रः लोध्रपट्टि
कालोध्र लोध्रस्तिल्वस्तिरीटश्च शावरो गालवस्तथा द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः जीर्ण
पत्रो बृहत्पत्रः पट्टी लाक्षाप्रसादनः लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत् कषायो रक्तपित्तासृग्
ज्वरातीसारशोथहृत् अथ लशुनः लशुनस्तु रसोनः स्यादुग्रगंधो महौषधं अरिष्टो म्लेच्छकंदश्च यवनेष्टो र
सु र ८ सोनकः यदामृतं वैनतेयो जहार सुरसत्तमात् तदा ततोऽपतद्बिंदुः स रसोनोऽभवद्भुवि पंचभिश्च रसैर्युक्तो रसेनाम्ले
न वर्जितः तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः नाले कषा
य उद्दिष्टो नालाग्रे लवणः स्मृतः बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः रसोनो बृंहणो वृष्यः स्निग्धोष्णः पा
चनः सरः रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः भग्नसंधानकृत्कंठ्यो गुरुः पित्तास्रवृद्धिदः बल
वर्णकरो मेधाहितो नेत्र्यो रसायनः हृद्रोगजीर्णज्वरकुक्षिशूलविबंधगुल्मारुचिकासशोफान् दुर्नामकु ८५

स्प

ष्ठानलसादजंतुसमीरणश्वासकफांश्च हंति मद्यं मांसं तथाम्लं च हितं लशुनसेविनां व्यायाममातपं रोषमति
नीरं पयो गुडं रसोनमश्नन्पुरुषस्त्यजेदेतन्निरंतरं अथ पलांडु पलांडुर्यवनेष्टश्च दुर्गंधो मुखदूषणः पलांडु
स्तु गुणैर्ज्ञेयो रसोनसदृशो बुधैः स्वादुः पाके रसेऽनुष्णः कफकृन्नातिपित्तलः हरते केवलं वातं बलवीर्यकरो
गुरुः अथ भल्लातकः भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः तथैवाग्निमुखी भल्ली वीरवृक्षश्च शो
फकृत् भल्लातकफलं पक्वं स्वादुपाकरसं लघु कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनं मेध्यं वह्निक
रं हंति कफवातव्रणोदरं कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रिमीन् तन्मज्जा मधुरो वृष्यो बृंहणो वात
पित्तहा वृंतमारुष्करं स्वादु पित्तघ्नं केशरूपमग्निकृत् भल्लातकः कषायोष्णः शुक्रलो मधुरो लघुः वातश्लेष्मो
दरानाहकुष्ठार्शोग्रहणीगदान् हंति गुल्मज्वरश्वित्रवह्निमांद्यक्रिमिव्रणान् अथ भंगा भंगा गंजा मातुलानी ग्र
मादिनी विजया जया भंगा कफहरी तिक्ता ग्राहिणी पाचनी लघुः तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निव
र्द्धिनी अथ खसः तिलभेदः खसतिलः खाखसश्चापि स स्मृतः स्यात्खाखसफलोद्भूतं वल्कलं शीतलं लघु

ग्राहितिक्तकषायंचवातकृत्कफकासहृत् धातूनांशोषकंरूक्षंमदकृत्क्षाग्निवर्द्धनं मुकुमेहिकरंरुच्यं
सेवनात्पुंस्त्वनाशनं अथखसकीलस्यात्खाखसफलक्षीरमाफूकमहिफेनकं आफूकंशोषणंग्रा
हिश्लेष्मघ्नंवातपित्तलं तथाखसफलोद्भूतंवल्कलप्रायमित्यपि अथखाखसदानान्युच्यंतेखसबी
जानितेषांखसतिला अपि खसबीजानिबल्यानिवृष्याणिसुगुरूणिच जनयंतिकफंतानिशमयंतिस
मीरणं अथसैंधवः सैंधवोस्त्रीशीतशिवंमणिमंथंचसिंधुजं सैंधवंलवणंस्वादुदीपनंपाचनंलघु
स्निग्धंरुच्यंहिमंवृष्यंसूक्ष्मंनेत्र्यंत्रिदोषहृत् अथसांभरि साकंभरीयंकथितंगडाख्यंरोमकंतथा ग
डाख्यंलघुवातघ्नमत्युष्णंभेदिपित्तलं तीक्ष्णंव्यवायिसूक्ष्मंचाभिष्यंदिकटुपाकिच अथपांग पांगं
वुयत्तुलवणमक्षीवंवशिशिरंचवत् सासुकंमधुरंपाकेसतिक्तंमधुरंगुरु नात्युष्णंदीपनंभेदिसक्षारमवे
दाहिच श्लेष्मलंवातनुत्तिक्तमसूक्ष्मंनातिशीतलं अथविडलोन विडंपाकंचकृतकंतथाद्राविडमा
सुरं विडंसक्षारमूर्ध्वाधःकफवातानुलोमनं ऊर्ध्वंकफमधोवातंसंचारयेदित्यर्थः दीपनंलघुतीक्ष्णो ९८

कटेरीपीताचमन्येत्सैवपचंपचा सैवकालीयकःप्रोक्तस्तथाकालेयकोपिच पीतद्रुश्चहरिद्रुश्चपीतदारुश्चपी
तिका दार्वीनिशागुणाकिंतुनेत्रकर्णास्यरोगनुत् अथरसांजनं दार्वीक्वाथसमंक्षीरंपादंपक्त्वायदाघ
नंतदारसांजनंख्यातंनेत्रयोःपरमंहितं रसांजनंतार्क्ष्यशैलंरसगर्भंचतार्क्ष्यजं रसांजनंकटुश्लेष्मविष
नेत्रविकारनुत् उष्णंरसायनंतिक्तंछेदनंव्रणदोषहृत् अथवाकुची अवल्गुजोवाकुचीस्यात्सोम
राजीसुपर्णिका शशिलेखाकृष्णफलासोमापूतिफलीतिच सोमवल्लीकालमेषीकुष्ठघ्नीचप्रकीर्तिता
वाकुचीमधुरातिक्ताकटुपाकारसायनी विष्टंभघ्नीहिमारुच्यासरश्लेष्मास्रपित्तनुत् रूक्षाहृद्याश्वासकुष्ठ
मेहज्वरकृमिप्रणुत् तत्फलंपित्तलंकुष्ठकफानिलहरंकटु केश्यंत्वच्यंकृमिश्वासकासशोथामपां
डुनुत् अथपुंनाट चक्रमर्द्दःप्रपुंनाटोदद्रुघ्नोमेषलोचनः पद्माटःस्यादेडगजश्चक्रीपुन्नाटइत्यपि
चक्रमर्द्दोलघुस्वादूरूक्षःपित्तानिलापहः हृद्योहिमःकफश्वासकुष्ठकंडूकृमीन्हरेत् हंत्युष्णंतत्फलं
कुष्ठकंडूदद्रुविषानिलान् गुल्मकासकृमिश्वासनाशनंकटुकंस्मृतं वातरक्तापहंतस्यशाकंकफह

भा·प्र·
९९

सौभाग्यं टंकणं क्षारो धातुद्रावकमुच्यते टंकणं वह्निकृद्रूक्षं कफहृद्वातपित्तकृत् क्षारद्वयं स्वर्जिका याव
शूकश्च क्षारद्वयमुदाहृतं टंकणेन युतं तत्तु क्षारत्रयमुदीरितं मिलितं चोष्णगुणकृच्छोषाद्गुल्महृत्परं
पलाशवज्रिशिखरिचिंचार्कतिलनालजाः यावशूकः स्वर्जिका चेति क्षाराष्टकमुदाहृतं क्षारा एतेऽग्निना
तुल्या गुल्मशूलहरा भृशं अथ चुक्र चुक्रं सहस्रवेधिः स्याद्रसाम्लं चुल्कमित्यपि चुक्रमत्यम्लमुष्णं
च दीपनं पाचनं परं शूलगुल्मविबंधामवातश्लेष्महरं सरं वमितृष्णास्यवैरस्यहृत्पीडावह्निमांद्यहृत्
इति श्रीभावप्रकाशे हरीतक्यादिवर्गोऽयं प्रथमः १ अथ कर्पूरादिवर्गोऽभिधीयते तत्रादौ कर्पूरस्य
नामानि गुणांश्चाह पुंसि क्लीबे च कर्पूरो सिताभ्रो हिमवालुकः घनसारश्चंद्रनामा हिमनामापि सस्मृ
तः कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः दाहतृ
ष्णास्यवैरस्यमेदोदौर्गंध्यनाशनः कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः पक्वात्कर्पूरतः प्राहुरप
क्वं गुणवत्तरं अथ चीनिया कर्पूर चीनीकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः कुष्ठकंडूवमिहरस्त ९९

था तिक्तरसश्च सः अथ कस्तूरी मृगनाभिर्मृगमदः कथितः स सहस्रभित् कस्तूरिका च कस्तूरी वेदमुख्या
च सा स्मृता कामरूपोद्भवा कृष्णा नेपाली नीलवर्णयुक् काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता का
मरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत् काश्मीरदेशसंभूता कस्तूरी ह्यधमा मता कस्तूरिका कटुस्तिक्ता
क्षारोष्णा शुक्रला गुरुः कफवातविषच्छर्दिशीतदौर्गंध्यशोषहृत् अथ मुष्कदाना लताकस्तू
रिका तिक्ता स्वाद्वी वृष्या हिमा लघुः चक्षुष्या छेदनी श्लेष्मतृष्णावस्त्यास्यरोगहृत् अथ मोरसामाष
मेदश्याडी गंधमार्जारवीर्यं तु वीर्यकृत् कफवातहृत् कंडूकोठहरं नेत्र्यं सुगंधं स्वेददौर्गंध्यनुत् अथ चंद
नं श्रीखंडं चंदनं न स्त्री भद्रश्रीस्तैलपर्णिकः गंधसारो मलयजस्तथा चंद्रद्युतिश्च सः स्वादे तिक्तं कषेयं
छेदे रक्तं तनौ सितं ग्रंथिकोटरसंयुक्तं चंदनं श्रेष्ठमुच्यते चंदनं शीतलं रूक्षं तिक्तमाल्हादनं ल
घु श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् अथ पीतचंदनं कलंबकं च कालीयं पीताभं हरिचं
दनं हरिप्रियं कालसारं तथा कालानुसार्यकं कालीयकं रक्तगुणं विशेषाद्व्यंगनाशनं अथ रक्तचं

भा·प्र· दनं रक्तचंदनमाख्यातं रक्तांगं क्षुद्रचंदनं तिलपर्णी रक्तसारं तत्प्रवालफलं स्मृतं रक्तं शीतं गुरु स्वादु छर्दितृष्णा
१०० स्रपित्तहृत् तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहं अथ बकम पतंगं तु रक्तसारं सुरंगं रंजनं तथा। पट्टरंजकमा
ख्यातं पत्तुरं च कुचंदनं पतंगं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् हरिचंदनवद्वेद्यं विशेषाद्दाहनाशनं चंद
नानि तु सर्वाणि सदृशानि रसादिभिः गंधेन तु विशेषोस्ति पूर्वं श्रेष्ठतमं गुणैः अथ अगुरु कृष्णागरु अ
गुरु प्रवरं लोहं राजार्हं योगजं तथा वंशिकं कृमिजं चापि कृमिजग्धमनार्यकं अगुरूष्णं कटु त्वच्यं तिक्तं ती
क्ष्णं च पित्तलं लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति अगुरु
प्रभवः स्नेहः कृष्णागुरुसमः स्मृतः अथ देवदारु देवदारु स्मृतं दारु भद्रदार्विन्द्रदारु च मस्तदारु द्रुकि
लिमं किलिमं सुरभूरुहः देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च विबंधाध्मानशोथामतंद्राहिक्का
ज्वरास्रजित् प्रमेहपीनसश्लेष्मकासकंडूसमीरनुत् अथ धूपसरल सरलः पीतवृक्षः स्यात्तथा सुरभि
दारु च सरलो मधुरस्तिक्तः कटुपाकरसो लघुः स्निग्धोष्णः कर्णकंठाक्षिरोगरक्षोहरः स्मृतः कफा १००

लं रूक्षं सूक्ष्मं व्यवायि च विबंधानाहविष्टंभहृद्गौरवशूलनुत् अथ सौंचल सौवर्चलं स्याद्रुचकं मंथपाक्यं
च तन्मतं तिलकं कृष्णलवणं तत्कालं लवणं स्मृतं सुगंधं च तथा प्रोक्तं तत्सुगंधिकसंज्ञकमिति रुचकं
रोचकं भेदि दीपनं पाचनं परं सुस्नेहं वातनुन्नातिपित्तलं विशदं लघु उद्गारशुद्धिदं सूक्ष्मं विबंधानाहशूल
नुत् रेहंग्वाप्रभृति औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयं क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनं
अथ काचलवण काचं त्रिकूटपाकाद्यं लवणं काचसंभवं काचं दीपनमत्युग्रं रक्तपित्तविवर्द्धनं अथ च
णकलोनी चणकाम्लकमत्यम्लं दीपनं दंतहर्षणं लवणानुरसं रुच्यं शूलाजीर्णविबंधनुत् अथ क्षा
स्रकृमींश्चोष्णोऽग्निदीपनः कषायोमधुरस्तिक्तःकटुकोरूक्षकोलघुः अथकरहरिकरं
भीतिच कटभीस्वादुपुष्पश्चमधुरेणुःकटंभरः कटभीतुप्रमेहार्शोनाडीव्रणविषकृमीन हं
त्युष्णाकफकुष्ठघ्नीकटुरूक्षाचकीर्तिता तत्फलंतरुणंज्ञेयंविशेषात्कफशुक्रकृत अथ
मोषपलाशावत्पर्वतिरक्षः मोक्षस्तुमुष्ककोऽपिस्याज्झोलीढोगोलिहस्तथा क्षारश्रेष्ठःक्षारवृक्षो
द्विविधःश्वेतकृष्णकः मुष्ककःकटुकस्तिक्तोग्राह्युष्णःकफवातहृत विषमेदोगुल्मकंडव
स्त्रिरुक्कृमिशुक्रनुत अथजलसिरिसिटारोनइतिच शिरीषिकाहिंडिनिकाहुर्वलांवुशि १२७

लः कटरोविशदोव्रण्योमुखरोगकफास्रजित अथइरिमेददुर्गंधखदिरइतिच इरिमेदोविट्
खदिरःकालस्कंधोऽरिमेदकः इरिमेदःकषायोष्णोमुखदंतगदास्रजित हंतिकंडुविषश्लेष्मकृ
मिकुष्ठव्रणग्रहान अथरोहितक रोहितोलोहितोरोहीलोहाद्दाडिमपुष्पकः रोहितकःप्लीह
घातीरुच्योरक्तप्रसादनः अथवबूर वब्बूलकःकिरातःस्यात्किंकिरातःसपीतकः स(
श्रीमावब्बूलपर्याय एवकथितातज्ज्ञैराभाषट्पदमोदिनी वब्बूलःकफनुद्ग्राहीकुष्ठकृमिविषापहः अथारिष्टकः
रीठीइतिच अरिष्टकस्तुमांगल्यःकृष्णवर्णोऽर्थसाधनः रक्तबीजःपीतफेनःफेनिलोगर्भ(
पातनः अरिष्टकस्त्रिदोषघ्नोग्रहजिद्गर्भपातनः अथपतिजिआ पुत्रजीवोगर्भकरोयष्टीपुष्पो
ऽर्थसाधनः पुत्रजीवोगुरुर्वृष्योगर्भदःश्लेष्मवातकृत सृष्टमूत्रमलोरूक्षोहिमःस्वादुःकटुःप
डींगनर टुः अथइंगुद केवटीतिच इंगुदोगारवृक्षश्चतिक्तकस्तापसद्रुमः इंगुदःकुष्ठभूतादिग्रह(
व्रणविषकृमीन हंत्युष्णःश्वित्रशूलघ्नस्तिक्तकःकटुपाकवान अथजिंगिनी जिंगिनीफि सिं१

भा-प्र. कफपित्तप्रमेहनुत् असृग्दुष्टिहरं शीतं रुचिकृद्ग्राहि वातलं। आम्रं बालं कषायाम्लं रुच्यं मारुतपित्त
१२८ कृत् तरुणं तु तदत्यम्लं रूक्षं दोषत्रयास्रजित्। आम्रमामं त्वचा हीनमातपेऽतिविशोषितं आम्लस्वा अम्रमुल २
दु कषायं स्याद्भेदनं कफवातजित्। पक्वं तु मधुरं वृष्यं स्निग्धं गुरु बलप्रदं। गुरु वातहरं हृद्यं वर्ण्यं। गदरा आम ३
या ४ शीतमपित्तलं कषायानुरसं वह्निश्लेष्मशुक्रविवर्द्धनं। तदेव वृक्षसंपक्वं गुरु वातहरं परं मधुरा
म्लरसं किंचिद्भवेत्पित्तप्रकोपनम्। आम्रं कृत्रिमपक्वं यद्वेत्पित्तप्रणाशनं रसस्याम्लस्य हा
५ अन्यादिदेशस्थापितं नेस्तु माधुर्य्याच्च विशेषतः। चूषितं तत्परं रुच्यं बलवीर्य्यकरं लघु शीतलं शीघ्रपाकि स्याद्वा
तपित्तहरं सरं। तद्रसो गालितो बल्यो गुरुर्वातहरः सरः। आहृद्यस्तर्पणोऽतीव बृंहणः कफ
फ्रका ३ वर्द्धनः। तस्य खंडं गुरु परं रोचनं चिरपाकि च मधुरं बृंहणं बल्यं शीतलं वातनाशनं। वातपि
त्तहरं रुच्यं बृंहणं बलवर्द्धनं वृष्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलं। मंदानलत्वं विषमा।
ज्वरं रक्तामयं बद्धगुदोदरं च। आम्रातियोगो नयनामयं च करोति तस्मादतितानि नाद्यात्॥ १२८

एतदम्लाम्रविषयं मधुराम्रपरं न तु। मधुरस्य परं नेत्रहितत्वाद्गुणायतः। शुंठ्यंभसोऽनुपानं।
स्यात् आम्राणामतिभक्षणे जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च। अथाम्रवर्त्तस्य लक्षणं आ
म्रावर्त इति। पक्वस्य सहकारस्य पटे विस्तारितो रसः। घर्मशुष्को मुहुर्दत्त आम्रावर्तक इति स्मृतः।
आम्रावर्त्तस्तृषाछर्दिवातपित्तहरः सरः। रुच्यः सूर्य्यांशुभिः पाकाल्लघुश्च स हि कीर्तितः। अथ
कोइली आम्रबीजं कषायं स्याच्छर्दतीसारनाशनं। ईषदम्लं च मधुरं तथा हृदयदाहनुत्
अथ नवपल्लवं आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनं। अथाम्रातः आम्रातकं पीतनकं च आम्रप्रभेद: शीशीर ति५
मर्कटाम्रकपीतनः। आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्सरं। पक्वं तु तुवरं स्वादु रसपाके हि
मं स्मृतं तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टंभि बृंहणं गुरु बल्यं मरुत्पित्तक्षतदाहक्षयास्रजित्
आलफ्नादि २ अथ राजाम्र राजाम्रं टंकं आम्रातः कामाक्षो राजपुत्रकः। राजाम्रं तुवरं स्वादु विशदं शीतलं
गुरु ग्राहि रूक्षं विबंधघ्नं वातकृत् कफपित्तनुत्। अथ कोशाम्र कोशाम्र इति च कोशाम्रः क्षुद्रः चु

क्षुद्रः श्रामः अपक्वः यत् तत् क्षोशाम्रः १

भा॰ प्र॰ म्रः कृमिरहः सकोशाम्रकः कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः तत्फलं ग्राहि वातघ्नम
१२९ म्लोष्णं गुरु पित्तलं पक्वं तु दीपनं रुच्यं लघूष्णं कफवातनुत् अथ कटहर पनसः कंटकिफलः पनस
शोऽतिबृहत्फलः पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहं तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशं
बल्यं शुक्रप्रदं हंति रक्तपित्तक्षतक्षयान् आमं तदेव विष्टंभि वातलं तुवरं गुरु दाहकृन्मधुरं बल्यं
कफमेदोविवर्द्धनं पनसोद्भूतबीजानि वृष्याणि मधुराणि च गुरूणि बद्धवर्चांसि सृष्टमूत्राणि बद्धविड्वाति५
संवदेत् अन्यच्च मज्जा पनसजो वृष्यो वातपित्तकफापहः विशेषात्पनसं वर्ज्यं गुल्मिभिर्मंदव
ह्निभिः अथ बडहर लकुचं लिकुचं प्रायः एणशोलकुचो डहुरित्यपि आमं लकुचमुष्णं च गुरु विष्टंभकं त
था मधुरं च तथाम्लं च दोषत्रितयरक्तकृत् शुक्राग्निनाशनं चैव नेत्रयोरहितं स्मृतं सुपक्वं
तत्तु मधुरसाम्लं चानिलपित्तकृत् कफवह्निकरं रुच्यं वृष्यं विष्टंभकं च तत् अथ केरा कदली वा
रणबुसा रंभा मोचांशुमत्फला मोचाफलं स्वादु शीतं विष्टंभि कफकृद्गुरु स्निग्धं पित्तास्रतृड्दाह १२९

शोषिका त्रिदोषविषकुष्ठार्शोहरी वारिशिरीषिका अथ शमी शमी शक्तुफला तुंगा केशहंत्री
फला शिवा मंगल्या च तथा लक्ष्मीः शमीरस्त्वल्पिका स्मृता शमी तिक्ता कटुः शीता कषाया रे
चनी लघुः कंपकासश्रमश्वासकुष्ठार्शःकृमिजित्स्मृतं छतिवन सप्तपर्णो विशालत्वक्शार
दो विषमच्छदः सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजंतुजित् दीपनः श्वासगुल्मघ्नः स्निग्धोष्ण
स्तुवरः सरः अथ तिनिस तिरिचि तवि तिनिशः स्यंदनो नेमी रथद्रुर्वंजुलस्तथा तिनिशः
श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहजित् तुवरः श्वित्रदाहघ्नो वमिपांडुकृमिप्रणुत् अथ भूमिसह
भूमिसहो द्वारदा सर्वरदा भस्वरच्छदः भूमीसहस्तु शिशिरो रक्तपित्तप्रसादनः इति श्रीभा
वप्रकाशे वटादिवर्गः अथाम्रादिफलवर्गः तत्रादौ आम्रस्य नामानि गुणाश्च आम्रः प्रोक्तो
रसालश्च सहकार इतीरितः कामांगो मधुदूतश्च माकंदः पिकवल्लभः चूतः छीली येम
दिवशाखस्तु मन्मथालयः मधुव्रतप्रियश्चैव मतः स्वांताग्निनंदनः आम्रपुष्पमतीसारका

नीलपुखं२

भा·प्र·
१२०

मूत्रंमूत्रलंबल्यंकोष्टशुद्धिकरंगुरु स्निग्धंस्वादुतरंशीतंवृष्यंपित्तानिलापहं तेषुपक्वाम्लमधुरंसक्ता
स्वरसाङ्गवेत रक्तपित्तकरंतत्तुमूत्रकृच्छ्रकरंपरं अथलघुखीरा वालंनखीरा त्रिपुषंकंटकिफ
लंसुधावासःसुशीतलं त्रपुसंलघुनीलंचनवंतत्तृष्णमदाहजित स्वादुपित्तापहंशीतंरक्तपित्तह
रंपरं तत्पक्वमम्लमुष्णंस्यात्पित्तलंकफवातनुत तद्बीजंमूत्रलंशीतंरूक्षंपित्तास्रकृच्छ्रजित तत्त्वित्राग्रपक्कस्रित
अथसुपारी घोंटापूगीचपूगश्चगुवाकःक्रमुकोऽस्यतु फलंपूगीफलंप्रोक्तमुद्वेगंचतदीरितं पू
गंगुरुहिमंरूक्षंकषायंकफपित्तहृत मेहनंदीपनंरुच्यमास्यवैरस्यनाशनं आर्द्रंतुर्वनिष्यं ग्याती५
उस्येर्द्दसुपारी४ दिदृष्टिवन्हिहरंस्मृतं स्विन्नंदोषत्रयच्छेदिदृढमध्यंतदुत्तमं अथताड तालस्तुलेख्यपत्रःस्या
त्तृणराजोमहोन्नतः पक्वंतालफलंपित्तरक्तश्लेष्मविवर्द्धनं दुर्जरंबहुमूत्रंचतंद्राभिष्यंदिशु
क्रदं तालमज्जातुतरुणःकिंचिन्मदकरोलघुः श्लेष्मलोवातलःस्निग्धस्सस्नेहोमधुरःसरः
तालमज्जातालफलमज्जा तालजंतरुणंतोयमतीवमदकृन्मतं अम्लीभूतंस्तदातत्स्यात्पि १२०

यथापुष्पफलःतथाविल्वदन्यत्र वल्कलज
गपत्रादिविज्ञेयं॥५

त्रकृद्वातदोषनुत अथवेल विल्वःशांडिल्यशैलूषौमालूरश्रीफलावपि वालंविल्वफलंवि
ल्वकर्कटीविल्वपेशिका ग्राहिणीकफवातामशूलघ्नीविल्वपेशिका अन्यच्च वालंविल्वफ
लंग्राहीदीपनंपाचनंकटुः कषायोष्णंलघुस्निग्धंतिक्तंवातकफापहं पक्वंगुरुत्रिदोषंस्या
यतःप्रसिंतंतत्रकारतंकं रोति४०ग्रपाचनतावुकरो ति४ दुर्जरंपूतिमारुतं विदाहिविष्टंभकरंमधुरं वन्हिमांद्यकृत फलेषुपरिपक्वंयद्गुणवत्तदुदाह
तं विल्वादन्यत्रविज्ञेयंतथापुष्पफलःस्मृतः अथकथ्या कपित्थस्तुदधित्थःस्यात्तथापुष्प
फलःस्मृतः कपिप्रियोदधिफलस्तथादंतशठोऽपिच कपित्थमामंसंग्राहिकषायंलेषनंच
तत पक्वंगुरुतृषाहिक्काशमनंवातपित्तजित स्वाद्वम्लंतुवरंकंठशोधनंग्राहिदुर्जरं अथ
नारंगी नारंगोनागरंगःस्यात्त्वक्सुगंधोमुखप्रियः नारंगंमधुराम्लंस्याद्रोचनंवातनाशनं
अपरंत्वम्लंदुर्जरंवातहृत्सरं अथतेंदु तिंदुकःस्फूर्जकःकालस्कंधश्चासितकारकः स्यादा
मंतिंदुकंग्राहिवातलंकटुकंलघु पक्वंपित्तप्रमेहास्रश्लेष्मघ्नंमधुरंगुरु अथकुपीलुपस्यफ

कृच्यगेधौ२ दो२

भा·प्र·
१३१

लंकोचिलाइतिलोकेमकरंडुशब्धि तिंडुकः कथितोस्पंदः जलजोदीर्घपत्रकः कुपीलुः कुलकः
कालतिंडुकः कालपीलुकः काकेंडुर्विषतिंडुश्च तथामर्कटतिंडुकः कुपीलुः शीतलंतिक्तंवात
लंमदकृल्लघुः परंव्यथाहरंग्राहिकफपित्तास्रनाशनं अथफरेंद फरेंदः कथितोनंदोराजजं
बूर्महाफला तथासुरभिपत्राचमहाजंबूरपिस्मृतः राजजंबूफलंस्वादुविष्टंभिगुरुरोचनं अथजा
मुनवदीजामुनि क्षुद्रजंबूसूक्ष्मपत्रानादेयीजलजंबुका जंबूः संग्राहिरूक्षाचकफपित्तास्र
दाहनुत अथबेरि कुंसिव्विपांचककर्कंधुर्बदलीकोलमित्यपि फेनिलंकुवलंघोंटासोवीरंब
दरंचपत अजाप्रियाकुहाकोलिर्विषमोभयकंटकः तत्रबदरविशेषाणांलक्षणानियुणाश्च
पच्यमानंसुमधुरंसौवीरंबदरंमहत सौवीरंबदरंशीतंभेदनंगुरुशुक्रलं बृंहणंपित्तदाहास्र
क्षयतृष्णानिवारणं सोवीरात्लघुसंपक्वंमधुरंकोलमुच्यते कोलंतुबदरंग्राहिरुच्यमुलंच्चवातह
त कफपित्तकरंचापिगुरुसारकमीरितं कर्कंधुः क्षुद्रबदरंकथितंशर्वसूरिभिः अम्लंस्यात्तत्तु १३२

६१

तृष्णक्षयसमीरजित पक्वंस्वादुहिमंपाकेस्वादुरुष्यंचबृंहणं तृष्णग्लानिश्रमदाहक्षयमेहघ्नंरुचिमांसकृ
त माणिक्यमर्त्यामृतत्वंपकाद्याभेदाः कदल्यावहवोपिसंति उक्तागुणास्तेष्वधिकानवंतिनि
र्दोषतास्याल्लघुताचतेषां अथगुरुखीकुं भकुरइति चिर्भिटंधेनुदुग्धंचतथागोरक्षकर्कटी
कमलिया२ चिर्भिटंमधुरंरूक्षंगुरुपित्तकफापहं अपक्वंग्राहिविष्टंभिपक्वंतक्षंचपित्तलम् अथनारि
यर नारिकेरोदृढफलोलांगलीकूर्चशीर्षकः तुंगस्कंधफलश्चैवस्तृणराजःसदाफलः ना
रिकेरफलंशीतंदुर्जरंवस्तिशोधनं तदेवजीर्णगुरुपित्तकारिविदाहिविष्टंभिमतंभिषग्भिः प्राचीनं ५
तस्यांतः शीतलंहृद्यंदीपनंशुक्रलंलघु पिपासापित्तजित्स्वादुवस्तिशुद्धिकरंपरं नारिके
रस्यतालस्यखर्जूरस्यशिरांसितु कषायंस्निग्धमधुरंबृंहणानिगुरूणिच अथकलिंदा कलिं
दंक्षुद्रबीजंस्यात्कालिंदंचसुवर्तुलं कालिंदंग्राहिदृक्पित्तशुक्रहृच्छीतलंगुरु पक्वंतुसो
क्षंसक्षारंपित्तलंकफवातजित अथखरबूजा दशांगुलंतुखर्बूजंकथ्यंतेतद्गुणाश्रय ख

भा॰प्र॰
१२२

राकीव्याघ्रपादेऽपि विकंकतफलंपक्वंमधुरंसर्वदोषजित् अथकमलबीज पद्मबीजंतुपद्माक्षंगालोड्यं
पद्मकर्कटी पद्मबीजंहिमंस्वादुकषायंतिक्तकंगुरु विष्टंभिवृष्यंरूक्षंचगर्भसंस्थापकंपरं कफवातक
रंबल्यंग्राहिपित्तास्रदाहनुत् अथमखान मखान्नंपद्मबीजाभंपानीयफलमित्यपि मखान्नंपद्मबी
जस्यगुणैस्तुल्यंविनिर्दिशेत् अथसिंघार श्रृंगाटकंजलफलंत्रिकोणफलमित्यपि श्रृंगाटकंहिमं
स्वादुगुरुवृष्यंकषायकं ग्राहिशुक्रानिलश्लेष्मप्रदंपित्तास्रदाहनुत् अथबेरी अर्कंकुमुदबीजंतु कुमुद्वतीबीजं५
बुधैःकैरविणीफलं भवेत्कुमुद्वतीबीजंस्वादुरूक्षंहिमंगुरु अथमहुआवनमहुआ मधूको
गुडपुष्पःस्यान्मधुपुष्पोमधुस्रवः वानप्रस्थोमधुष्ठीलोजलजोत्रमधूलकः मधूकपुष्पंमधुरंशी
तलंगुरुबृंहणं बलशुक्रकरंप्रोक्तंवातपित्तविनाशनं फलंशीतंगुरुस्वादुशुक्रलंवातपित्तजित्
अहृद्यंहंतितृष्णास्रदाहश्वासक्षतक्षयान् अथफालसा परूषकंतुपरुषमल्पास्थिचपरापरं प
रूषकंकषायाम्लमामंपित्तकरंलघु तत्पक्वंमधुरंपाकेशीतंविष्टंभिबृंहणं हृद्यंतृट्पित्तदाहा १२२

फालसा२

सहतूत१

स्रज्वरक्षयसमीरहृत् अथतूद तूदस्तुलश्चपूगश्चक्रमुकोब्रह्मदारुचतूदंपक्वंगुरुःस्वादुहिमंपित्ता
निलापहं तदेवामंगुरुसरमम्लोष्णंरक्तपित्तकृत् अथदाडिम दाडिमःकरकोदंतबीजोलोहितपु
ष्पकः तत्फलंत्रिविधंस्वादुस्वाद्वम्लंकेवलाम्लकं तत्तुस्वादुत्रिदोषघ्नंतृड्दाहज्वरनाशनं हृत्कंठमु
खरोगघ्नंतर्पणंशुक्रलंलघुः कषायानुरसंग्राहिस्निग्धमेधाबलावहंस्वाद्वम्लंदीपनंरुच्यंकिंचित्पि
त्तकरंलघुः अम्लंतुपित्तजनकमम्लंवातकफापहं अथबकैआर बकुवारस्तुशीतःस्यादुद्दालो वकुलसेहर२६
बकुवारकः शेलुःश्लेष्मातकश्चापिपिच्छिलोभूतवृक्षकः बकुवारोविषस्फोटव्रणवीसर्पकुष्ठ
नुत् मधुरस्तुवरस्तिक्तःकेशरुच्यःकफपित्तहृत् फलमामंतुविष्टंभिरूक्षंपित्तकफास्रजित् तत्प
क्वंमधुरंस्निग्धंश्लेष्मलंशीतलंगुरु अथकतकआनिर्मलीइतिलोके पयःप्रसादिकतकःकं
तकंतुफलंचतत् कतकस्यफलंनेत्र्यंजलनिर्मलकारकं वातश्लेष्महरंशीतंमधुरंतुवरंगुरु
अथदाख द्राक्षास्वादुफलाप्रोक्तातथामधुरसापिच मृद्वीकाहारहूराचगोस्तनीचापिकीर्तिता द्रा

द्राक्षा१

भा·प्र· द्राक्षापक्वासरासीताचक्षुष्याबृंहणीगुरुः स्वादुपाकारसास्वर्य्यातुवरासृष्टमूत्रविट् कोष्ठमारुतकृद्वृष्या
१२२ कफपुष्टिरुचिप्रदा हंतितृष्णाज्वरश्वासवातवातास्रकामलाः कृच्छ्रास्रपित्तसंमोहदाहशोषम
दात्ययान् आमासाल्पगुणागुर्वीसैवाम्लारक्तपित्तकृत् वृष्यास्याद्गोस्तनीद्राक्षागुर्वीचकफपि
त्तनुत् गोस्तनीमुनक्काइतिलोके अबीजान्यास्वल्पतरागोस्तनीसदृशागुणैः द्राक्षापर्वतजाल
घ्वीसाम्लाश्लेष्माम्लपित्तकृत् द्राक्षापर्वतजायादृक्तादृशीकरमर्द्दिका अबीजाईषद्बीजाकि
सिमिसइतिलोके पर्वतजापहारीइतिलोके करमर्द्दिकाकरौंदीइतिलोके अथखर्जूरखर्जू
रीपिंडखर्जूरीछोहार भूमिखर्जूरिकास्वाद्वीदुरारोहामृदुच्छदा तथास्कंधफलाकाककर्कटी
स्वादुमस्तकापिंडखर्जूरिकात्वन्यासादेशेपश्चिमेभवेत् खर्जूरीगोस्तनाकारापराद्वीपादिहाग
ता जायतेपश्चिमेदेशेसाछोहारेतिकीर्त्तिता खर्जूरीत्रितयंशीतंमधुरंरसपाकयोः स्निग्धं
रुचिकरंहृद्यंक्षतक्षयहरंगुरु तर्पणंरक्तपित्तघ्नंपुष्टिविष्टंभिशुक्रदं कोष्ठमारुतकृद्बल्यंवान्त १२२

न्तवदरंकषायंमधुरंमनाक् स्निग्धंगुरुंचतिक्तंचवातपित्तापहंस्मृतं शुष्कंमेद्यम्भिकृत्सर्वंलघुतृष्णाक्ल
मास्रजित् अथलवलीहरफारेवरीइतिच सुगंधमूलालवलीपांडुःकोमलवल्कला लवलीफलमर्श
स्राश्रःकफपित्तहरंगुरु विशदंरोचनंरूक्षंस्वादम्लंतुवरंरसे अथकरौंदाकरौंदीकरमर्द्दःसुषेणःस्या
त्कृष्णपाकफलस्तथा तस्माल्लघुफलायातुसाज्ञेयाकरमर्द्दिका करमर्द्दद्वयंत्वाममम्लंगुरु
तृषाहरं उष्णंरुचिकरंप्रोक्तंरक्तपित्तकफप्रदं तत्पक्वंमधुरंरुच्यंलघुपित्तसमीरजित् अथप्रियाल
चिरौंजी प्रियालस्तुखरस्कंधश्चारोविकूलवल्कलः राजादनंतापसेष्टःसन्नकद्रुर्धनुःपटुः चारः
पित्तकफास्रघ्नस्तत्फलंमधुरंगुरुः स्निग्धंसरंमरुत्पित्तदाहज्वरतृषापहं प्रियालमज्जामधुरोवृ
ष्यःपित्तानिलापहः हृद्योतिदुर्जरःस्निग्धोविष्टंभीचामवर्द्धनः अथखिरिणी राजादनीफलं
क्षीरीरजन्याक्षीरिकापिच क्षीरिकायाःफलंवृष्यंबल्यंस्निग्धंहिमंगुरु तृष्णामूर्छामदभ्रांतिक्ष
यदोषत्रयास्रजित् अथकटाई विकंकतस्तुव्याघ्रपादोग्रंथिलःस्वादुकंटकः सएवयज्ञवृक्षश्चकं

भा·प्र· पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्तितः अक्षोटको ऽपि वाताद्सदृशः कफपित्तकृत् अथ विजो
१२४ रा बीजपूरो मातुलुंगो रुचकः फलपूरकः बीजपूरफलं स्वादु रसेऽम्लं दीपनं लघु रक्तपित्तहरं कंठजि
ह्वाहृदयशोधकं श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतं अथ विजौराभेद मधुकर्कटी बीजपूरो
ऽपरः प्रोक्तो मधुरो मधुकर्कटी मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः रक्तपित्तक्षयश्वास
कासहिक्काभ्रमापहा अथ जंबीरी द्वयं स्याज्जंबीरो दंतशठो जंभजंभीरजंभलाः जंबीरमुष्णं गुर्वा
म्लं वातश्लेष्मविबंधनुत् शूलकासकफोत्क्लेशछर्दितृष्णामदोषनुत् आस्यवैरस्यहृत्पीडावन्हि
मांद्यकृमीन्हरेत् स्वल्पजंबीरिका तद्वत्तृष्णाछर्दिनिवारिणी अथ निंबूकागदी निंबूस्त्री निंबु
कं क्लीबे निंबूकमपि कीर्तितं निंबूकमम्लं वातघ्नं दीपनं पाचनं लघु अन्यच्च निंबुकं कृमिस
मूहनाशनं तीक्ष्णमम्लमुदरग्रहापहं वातपित्तकफशूलिने हितं कष्टनष्टरुचिरोचनं परं
त्रिदोषवन्हिक्षयवातरोगनिपीडितानां विषविक्लानां मलग्रहे बद्धगुदे प्रदेयं विशूचिकायां १२४

पुनयो वदंति अथ मिष्टनिंबू मिष्टनिंबूफलं स्वादु गुरु मारुतपित्तनुत् गरोरगविषध्वंसी कफोत्
क्लेशिवरक्तहृत् शोषारुचितृषाछर्दिहरं बल्यं च बृंहणं अथ कमरख कर्मरंगं हिमं ग्राहि स्वा
द्वम्लं कफवातकृत् अथ अमिली अम्लिका चुक्रिकाम्लीका चुक्रं दंतशठापि च अम्ला च चिंचिका
चिंचा तिंतिडीका च तिंतिडी अम्लिकामा गुर्वी वातहरी पित्तकफास्रजित् पक्का तु दीपनी रूक्षा स
रोष्णा कफवातनुत् अथाम्लवेतसनिंबुआ स्यादम्लवेतसश्चुक्रः शतवेधी सहस्रभित् अ
म्लवेतसमत्यम्लं भेदनं लघु दीपनं हृद्रोगशूलगुल्मघ्नं पित्तलं लोहितं रूषणं रूक्षं विरामग्रहदो
षघ्नं प्लीहोदावर्तनाशनं हिक्कानाहरुचिश्वासकासाजीर्णवमिप्रणुत् कफवातमयध्वंसी
छागमांसद्रवत्वकृत् चिणकाम्लमुणं ज्ञेयं लोहसूच्यादिद्रवत्वकृत् अथ विषांबिलातिंतिनी
क वृक्षाम्ले तिंतिडीकं च चुक्रं स्यादम्लवृक्षकं वृक्षाम्लमाममम्लोष्णं वातघ्नं कफपित्तलं
पक्वं तु गुरु संग्राहि कटुकं तुवरं लघु अम्लोष्णं रोचनं रूक्षं दीपनं कफवातकृत् तृष्णाशो

भा·प्र· ग्रहणीगुल्मशूलहृद्रोगजंतुजित् अथचतुराम्लपंचाम्लयोर्लक्षणं अम्लवेतसवृक्षाम्लबृहज्जंबीरनिंबुकैः
१३५ चतुरम्लंहिपंचाम्लंबीजपूरयुतैर्भवेत् अथपरिभाषा फलेषुपरिपक्वंयद्गुणवत्तदुदाहृतं बिल्वादन्यत्रवि
ज्ञेयमामंतद्धिगुणाधिकं फलेषुसरसंयद्यद्गुणवत्तदुदाहृतं द्राक्षाबिल्वशिवादीनांफलंशुष्कंगु
णाधिकं फलंवृल्पगुणंसर्वंमज्जानमपिनिर्दिशेत् फलंहिमाग्निदुर्वातव्यालकीटादिदूषितं अका
लजंकुभूमिजंपाकातीतंनभक्षयेत् पाकातीतंपाकमतिक्रम्यसंस्थितम् इतिश्रीभावप्रकाशेफल
वर्गः अथधातूपधातुरसोपरसरत्नोपरत्नविषोपविषवर्गः तत्रादौधातवः तत्रधातूनांलक्ष
णंगुणाश्च वलीपलितखालित्यकार्श्यबल्यजरामयान् निवार्यदेहंदधतिनृणांतद्धातवोमताः
स्वर्णंरूप्यंतथाताम्रंरंगंयशदमेवच सीसंलोहंचसप्तैतेधातवोगिरिसंभवाः तत्रादौसुवर्णस्यो
त्पत्तिर्नामगुणाश्च पुरानिजाश्रमस्थानांसप्तर्षीणांजितात्मनां पत्नीर्विलोक्यलावण्यलक्ष्मी
संपन्नयौवनाः कंदर्पदर्पविध्वंसचेतसोजातवेदसः पतितंयद्धरापृष्ठेरेतस्तद्धेमतामगात् इति १३५

५१

वातकफापहं ज्वराग्निघातक्षुत्तृष्णाकासश्वासनिवारणं मदमूर्छामरुत्पित्तमद्योद्भूतगदांतकृत्
महतीस्यागुणैरल्पास्वल्पखर्जूरिकास्मृता खर्जूरीतरुतोयंतुमदपित्तकरंभवेत् वातश्लेष्महरंरु
च्यंदीपनंबलशुक्रनुत् अथपिंडखर्जूरीभेदस्सुलेमानी सुनेपालीतुमृदुलावलहीनफलाचसा सु
नेपालिश्रमभ्रांतिदाहमूर्छास्रपित्तहृत् अथवदाम वातादोवातवैरीस्यान्नेत्रोपमफलस्तथा
वातादस्तूष्णःसुस्निग्धोवातघ्नःशुक्रकृद्गुरुः वातादमज्जामधुरोवृष्यःपित्तानिलापहः स्निग्धोष्णक
फकृन्नेष्टोरक्तपित्तविकारिणां अथसेव मुष्टिप्रमाणंबदरंशीर्षंत्रिविवितिकाफलं सेवंसमी
रपित्तघ्नंबृंहणंकफकृद्गुरु रसेपाकेचमधुरंशिशिरंरुचिशुक्रकृत् अथामृतफलंयद्देदक यज्जीवनसामस्का
साहकाबिलप्रभृतिदेशेषुनाशपातीतिप्रसिद्धं अमृतफलंलघुवृष्यंसुस्वादुत्रीन्हरेद्दोषान्
देशेषुमुफलानांबकलंतद्धनतेलोकैः अथपीलु पीलुर्गुडफलंस्त्रंसीतथाशीतशिफोपिच पी
लुःश्लेष्मसमीरघ्नंपित्तलंभेदिगुल्मनुत् स्वादुतिक्तंचयत्पीलुतन्नात्युष्णंत्रिदोषनुत् अथअखरोट

नेः

मंत्रापि भवति तद्रसेंद्रस्य वेधनं स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकं तपनीयं कलधौतं गांगे
५२ यं भर्म कांचनं चामीकरं शातकुंभं तथा कार्तस्वरं चैव तत् जंबूनदं जातरूपं महारजतमित्यपि दा
हे रक्तं सितं छेदे निकषे कुंकुमप्रभं तारशुल्बोज्झितं स्निग्धं कोमलं गुरु हेम सत सतव्रतं तच्छ्वे
तं कठिनं रूक्षं विवर्णं समलं दलं दाहे छेदे सितं श्वेतं कषे त्याज्यं लघु स्फुटं दलं दोषनश्यतिलो॥
के स्फुटं यद्घनाहतं स्फुटति सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनं स्वादु तिक्तं च तुवरं पाके च
स्वादु पिच्छिलं पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदं हृद्यमायुष्कर कांतिवाग्विशुद्धिस्थिरत्व
कृत् विषक्षयद्वयोन्मादत्रिदोषज्वरशोषजित् बलं स वीर्यं हरते नराणां रोगव्रजं पोषयती॥
हकाये असौख्यकार्यं च सदा सुवर्णमशुद्धमेतन्मरणं च कुर्यात् असम्यङ्मारितं स्वर्णं बलं
वीर्यं विनाशयेत् करोति रोगान्मृत्युं च तद्धन्याद्यत्नतः सुधीः अथ स्वर्णस्योत्पत्तिनामलक्ष
णगुणा त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः निरीक्षयामास शिवः क्रोधेन परिपूरितः

त्रि

दक्षिणनेत्रात् २१

भा॰प्र॰ ततस्त्वल्कासमपतत्तस्यैकस्माद्विलोकनात् ततोरुद्रःसमभवद्वैश्वानरइवज्वलन् द्वितीयादपतन्नेत्रा

१३६ आदश्रुविंदुस्तुवामकात् तस्माद्रजतमुत्पन्नमुक्तकर्म्मसुयोजयेत् कृत्रिमंचभवेत्तद्धिवंगादेरसयोगतः

रूप्यंचेद्रजतंतारंचंद्रकांतिसितंशुभं गुरुस्निग्धंमृदुश्वेतंदाहछेदघनक्षमं स्वर्णाढ्यंचंद्रवत्स्वच्छंरूप्यं

नवगुणंशुभं कठिनंकृत्रिमंरूक्षंरक्तंपीतदलंलघुः दाहछेदघनैर्नष्टंरूप्यंदुष्टंप्रकीर्त्तितं रूप्यं

शीतंकषायाम्लंस्वादुपाकरसंसरंवयसस्थापनंस्निग्धंलेखनंवातपित्तजित् प्रमेहादिकरोगांश्च

नाशयत्यचिराद्ध्रुवं तारंशरीरस्यकरोतितापंविड्बंधनंपश्चतिशुक्रनाशनं वीर्यंबलंहंतितनो दुर्लिं २

श्चपुष्टिंमहागदान्पोषयतिप्यशुद्धं अथताम्रस्योत्पत्तिर्नामलक्षणगुणाः शुक्रंयत्कार्त्तिकेयस्य

पतितंधरणीतले तस्मात्ताम्रंसमुत्पन्नमिदमाहुःपुराविदः ताम्रमौदुंबरंशुल्वमुदुंबरमपिस्मृतं

रविप्रियंम्लेच्छमुखंसूर्यपर्य्यायनामकं जपाकुसुमसंकाशंस्निग्धंमृदुघनक्षमं लोहनागोज्झितं(सीसा २

ताम्रंमारणायप्रशस्यते कृष्णंरूक्षमतिस्तब्धंश्वेतंवापिघनासहं लोहनागयुतंचेतिशुल्वंदुष्टं १३६

भा-प्र- रंगगुणंज्ञेयंविशेषान्मेहनाशनं नागस्तुनागशततुल्यवलंददातिव्याधिंविनाशयतिजीवनमातनोति
१२७ वह्निंप्रदीपयतिकामबलंकरोतिमृत्युंचनाशयतिसंततसेवितःसः पाकेनहीनौकिलवंगनागौकु
ष्ठानिगुल्मांश्चतथातिकष्टान् पांडुप्रमेहानिलसादशोथभगंदरादीन्कुरुतःप्रयुक्तौ अथलोह
स्योत्पत्तिर्नामगुणाश्च पुरालोमिलदैत्यानांनिहतानांसुरैर्युधि उत्पन्नानिशरीरेभ्योलोहानिविवि
धानिच लोहोऽस्त्रीशस्त्रकंतीक्ष्णंपिंडंकालायसायसी गुरुतादृढतोत्क्लेदकश्मलंदाहकारि(
ता अश्मदोषसुदुर्गन्धोदोषाःसप्तायसस्यतु लोहंतिक्तंसरंशीतंमधुरंतुवरंगुरु रूक्षंवयस्यं
चक्षुष्यंलेखनंवातलंजयेत् कफंपित्तंगरंशूलंशोथार्शःप्लीहपांडुताःमेदोमेहकृमीन्कुष्ठंत
त्किट्टंतद्वदेवहि षंडत्वकुष्ठामयमृत्युदंस्याद्वेतद्धृद्रोगशूलौकुरुतेश्मरीञ्च नानारुजानांचतथा
प्रकोपंकरोतिहृल्लासमशुद्धलोहं जीवहारिमदकारिचायसंचेदशुद्धिमदसंस्कृतंध्रुवं यादवं
नकुरुतेशरीरकेदारुणांहृदिरुजांचयच्छति कूष्माण्डंतिलतैलंचमाषान्नंराजिकांतथा मद्य १२७

स्थोठाकीन९

मम्लरसंचैवत्यजेल्लोहस्यसेवकः तत्रसारलोहस्यलक्षणं योनादेतिलोके क्षमाभृच्छिखराकारा
न्भंगान्यम्लेनलेपिते लोहेस्युर्यत्रसूक्ष्माणितत्सारमभिधीयते लोहेसाराऽक्षयंहन्याद्ग्रहणीमतिसा
रकं अर्द्धसर्वांगजंवातंशूलंचपरिणामजम् छर्दिंचपीनसंपित्तंश्वासानाशुव्ययोहति अथका
न्तलोहस्यलक्षणं यत्पात्रेणैप्रसरतिजलेतैलबिंदुःप्रतप्तेहिंगुर्गन्धंत्यजतिचनिजंतिक्ततांनि
म्बकल्कः तप्तंदुग्धंभवतिशिखराकारकंनैतिभूमिंकृष्णाङ्गःस्यात्सजलचणकःकान्तलोहंत
दुक्तं गुल्मोदरार्शःशूलामममामवातंभगंदरं कामलाशोथकुष्ठानिक्षयंकांतमयोहति प्लीहा
नमम्लपित्तंचयकृच्चापिशिरोरुजं सर्वान्रोगान्विजयतेकांतलोहंनसंशयः बलवीर्यवपुः(
पुष्टिंकुरुतेऽग्निंविवर्द्धयेत् अथकीटं ध्मायमानस्यलोहस्यमलंमंडूरमुच्यते लोहसिंहानि
कांकिट्टीसिंहानंचनिगद्यते यल्लोहंयद्गुणंप्रोक्तंतत्किट्टमपितद्गुणम् अथोपधातवः स(
र्वोपधातवःस्वर्णमाक्षिकंतारमाक्षिकं तुत्थंकांस्यंचरीतिश्चसिंदूरंचशिलाजतुस्युपधात

कि द्रुत दश गुणं मुंडं मुंडात्तीक्ष्णं शतोन्मितं ॥ तीक्ष्णात्लाक्षगुणं कांतं सारं नात कुरुते गुणं॥१॥

स्वेडी१ बोला६

भा·प्र· वः गौणधातवः उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि संति किंतु ते गौणास्ते तत्तदंशाल्पभावतः तत्र सु
१२८ वर्णमाक्षिकं स्वर्णमाक्षिकमाख्यातं ताप्यजं धातुमाक्षिकं ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः
किंचित्सुवर्णसाहित्यात्स्वर्णमाक्षिकमीरितं उपधातुः सुवर्णस्य किंचित्स्वर्णगुणान्वितं तथाच कां
चनाभावे दीयते स्वर्णमाक्षिकं किंतु तस्यानुकल्पत्वात् किंचिदूनगुणास्ततः नकेवलं स्वर्णगुणा
वर्त्तंते स्वर्णमाक्षिके द्रव्यांतरस्य संसर्गात्संत्यन्येपि गुणा यतः सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसा
यनं चक्षुष्यं वस्तिरुक्कंडुपांडुमेहविषोदरं अर्शः शोथं विषं कंडूं त्रिदोषमपि नाशयेत् मंदान
लत्वं बलहानिं विष्टंभं नेत्ररोगदाहकुष्ठान् तथैव मालां व्रणपूर्वकां च करोति तापिंजमशु
द्धमेतत् अथ तारमाक्षिक तारमाक्षिकमन्यं तु तत्प्रवेद्रजतोपमं किंचिद्रजतसाहित्यात्तारमा
क्षिकमीरितं अनुकल्पतया तस्य ततो हीनगुणाः स्मृताः नकेवलं रूप्यगुणा वर्त्तंते तारमाक्षि
के द्रव्यांतरस्य संसर्गात्संत्यन्येपि गुणा यतः अथ तुत्थ तुत्थं वितुन्नकं चापि शिखिग्रीवं १२८

कीर्तितं तुत्थं कषायं मधुरं च तिक्तमम्लं च पाके कटु सारकं च पित्तापहं श्लेष्महरं च शीतं तत्रोपणं स्या
ल्लघु लेखनं च पांडूदरार्शोज्वरकासकुष्ठश्वासच्छयान्यपीनसमम्लपित्तं शोथं कृमिं शूलमपाकरोति
प्राहुः परे बृंहणमल्पमेतत् एको दोषो विषे ताम्रे त्वसम्यङ्मारितेऽष्टते दाहः स्वेदोऽरुचिर्मूर्च्छा क्लेदो रे
को वमिर्भ्रमः रेकः विरेकः अथ रंगस्य नामानि गुणाश्च रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि खु
रकं मिश्रकं चापि द्विविधं वंगमुच्यते उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतं रंगं लघु सरं रूक्षमुष्णं मे
हकफकृमीन् निहंति पांडुं सश्वासं चक्षुष्यं पित्तलं मनाक् सिंहो यथा हस्तिगणं निहंति तथैव वं
गोखिलमेहवर्गं देहस्य सौख्यं प्रबलेंद्रियत्वं नरस्य पुष्टिं विदधाति नूनं अथ यशदं यशदं रङ्ग
पित्तल२ सदृशं रीतिहेतुश्च तन्मतं यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् चक्षुष्यं परमं मेहान् पांडुं श्वा
सं च नाशयेत् अथ सीसस्योत्पत्तिर्नामानि गुणाश्च दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् वीर्यं जा
तस्ततो नागः सर्वरोगापहो नृणां सीसं वध्रं च वप्रं च योगेष्टं नागनामकं नागो भुजंगमस्त्वादि सीसं

मयूरकं तुत्थंताम्रोपधातुर्हिकिंचित्ताम्रेणतद्भवेत् किंचित्ताम्रगुणंतस्माद्वक्ष्यमाणगुणंचतत् तुत्थकं
कटुकंक्षारंकषायंवामकंलघु लेखनंभेदनंशीतंचक्षुष्यंकफपित्तहृत् विषाश्मकुष्टकंडुघ्नंखर्प
रंचापितद्गुणं अथकांस्य ताम्रत्रपुजमाख्यातंकांस्यंघोषंचकंसकं उपधातुर्भवेत्कांस्यंद्वयोस्त(
पीतरि४ रणिरंगयोः कांसस्यतुगुणाज्ञेयाःस्वयोनिसदृशाजनैः संयोगजप्रभावेनतस्यान्येपिगुणाःस्मृताः
कांस्यंकषायंतिक्तोष्णंलेखनंविशदंसरं गुरुनेत्रहितंरूक्षंकफपित्तहरंपरं अथपीतरिकां
चपीतरि पित्तलंत्वारकूटंस्यादारौरीतिश्चकथ्यते राजरीतिर्ब्रह्मरीतिःकपिलापिंगलापिच
रीतिरप्युपधातुःस्यात्ताम्रस्ययशदस्यच पित्तलस्यगुणाःज्ञेयास्वयोनिसदृशाजनैः संयोगज
प्रभावेनतस्यान्येपिगुणाःस्मृताः रीतिकायुगलंरूक्षंतिक्तंचलवणंरसे शोधनंपांडुरोगघ्नंक
मिघ्नंनातिलेखनं अथसिंदूरः सिंदूरंरक्तरेणुश्चनागगर्भंचसीसजं सीसोपधातुःसिंदूरंगुणै
स्तत्सीसवन्मतं संयोगजप्रभावेनतस्याप्यन्येगुणाःस्मृताः सिंदूरमुष्णंवीसर्पकुष्टकंडूविषा

दू

भा॰प्र॰ पहं भग्नसंधानजननंव्रणशोधनरोपणं अथशिलाजतुनउत्पत्तिनामलक्षणं निदाघेधर्मसंतप्ता
१२९ धातुसारंधराधराः निर्यासवत्प्रमुंचंतितच्छिलाजतुकीर्त्तितं सौवर्णंराजतंताम्रमायसंतच्चतुर्विधं शि
लाजत्वद्रिजतुचशैलनिर्यासइत्यपि गैरेयमश्मजंचापिगिरिजंशैलधातुजं शिलाजंकटुतिक्तोष्णं
कटुपाकंरसायनं छेदियोगवहंहंतिकफमेदाश्मशर्कराः मूत्रकृच्छ्रंक्षयंश्वासंवातार्शांसिच
पांडुतां अपस्मारंतथोन्मादंशोथकुष्ठोदरकृमीन् सौवर्णंतुजपापुष्पवर्णंभवतितद्रसात्
मधुरंकटुतिक्तंचशीतलंकटुपाकिच राजतंपांडुरंशीतंकटुकंस्वादुपाकिच ताम्रंमयूर
कंठाभंतीक्ष्णमुष्णंचजायते लोहंजटायुपक्षाभंतत्तिक्तंलवणंभवेत् विपाकेकटुकंशीतं
सर्वश्रेष्ठमुदाहृतं अथरसः तत्ररसस्यनिरुक्तिः रसायनार्थिभिर्लोके:पारदोरस्यतेयतः
ततोरसइतिप्रोक्तःसचधातुरपिस्मृतः अथपारदस्योत्पत्तिर्लक्षणंगुणाश्च शिवांगात्प्रच्युतंरे
तःपतितंधरणीतले तद्देहसारजातत्वाच्छुक्लमच्छमभूच्चतत् क्षेत्रभेदेनविज्ञेयंशिववीर्यं १२९

भा·प्र· विबंमलंचेतिमुख्यादोषास्त्रयोरसे एतेकुर्वंतिसंतापंमृतिंमूर्छांनृणांक्रमात् अन्येपिकथितादो
१४० षास्तिस्रस्त्रिपरिदेयदि तयाण्येतेत्रयोदोषाहरणीयाविशेषतः संस्कारहीनंखलुसूतकंयः सेवते।
तस्यकरोतिबाधाम् देहस्यनाशंविदधातिनूनंकष्टांश्चरोगाञ्जनयेन्नराणां अथोपरसानांलक्षणं
गंधोहिंगुलमभ्रतालकशिलाःस्रोतोंजनंटंकणंराजावर्त्तकचुंबकौस्फटिकयाशंखःखटी
गैरिकं कासीसंरसकं(खपरिया)कपर्दसिकताबोलाश्चकंकुष्ठकंसौराष्ट्रीचमताअमीउपरसाःसूत मुरदारशंखः
स्यकिंचिद्गुणैः उपरसाःगौणरसाः हिंगुलस्यलक्षणं हिंगुलंदरदंम्लेच्छंहिंगुचूर्णंचपारदं दर
दस्त्रिविधःप्रोक्तश्चर्मारःशुकतुंडकः हंसपादस्तृतीयःस्याद्गुणवानुत्तरोत्तरं चर्मारःशुक्लवर्णःस्या
त्सपीतःशुकतुंडकः जपाकुसुमसंकाशोहंसपादोमहोत्तमः तिक्तंकषायंकटुहिंगुलंस्यान्ने
त्रामयघ्नंकफपित्तहारि हृल्लासकुष्ठज्वरकामलांश्चप्लीहामवातौचगरंनिहंति ऊर्द्धपात
नयुक्त्यावुडमरूयंत्रयाचितं हिंगुलंतस्यसूतंवुशुद्धमेवनशोधयेत् अथगंधकं श्वेतद्वी १४०

पेपुरादेव्याक्रीडंत्यारजसाप्लुतं दुकूलंतेनवस्त्रेणस्नातायाःक्षीरनीरधौ प्रसृतंयद्रजस्तस्माद्गं।
धकःसमजायत गंधकंगंधकश्चापिगंधपाषाणइत्यपि सौगंधकश्चकथितोवलिर्वलवसा।
पिच चतुर्द्धागंधकःप्रोक्तोरक्तःपीतःसितोऽसितः रक्तोहेमक्रियासूक्तःपीतश्चैवरसायने
व्रणादिलेपनेश्वेतःकृष्णःश्रेष्ठःसुदुर्लभः श्रेष्ठःहेमक्रियादिषुसर्वत्रप्रशस्ततरःगंधकःक
टुकःस्तिक्तोवीर्य्योष्णस्तुवरःसरः पित्तलःकटुकःपाकेकण्डूवीसर्प्पजंतुजित् हंतिकुष्टक्ष
यप्लीहकफवातान्रसायनः अशोधितोगंधकएषकुष्टंकरोतितापंविषमंशरीरे सौख्यंच
रूपंचवलंतथोजःशुक्रंनिहंत्येवकरोतिवास्रं अथाभ्रकं पुरावधायवृत्रस्यवज्रिणावज्रमु।
त्हृतं विस्फुलिंगास्ततस्तस्यगगनेपरिसर्पिताः तेनिपेतुर्घनाध्वानात्शिखरेषुमहीभृतां तेभ्य
एवसमुत्पन्नंतत्तद्गिरिषुचाभ्रकं तद्वज्रंवज्रजातत्वादभ्रमभ्ररवोद्भवात् गगनाच्चलितंयस्मा
द्गगनंचततोमतं विप्रक्षत्रियविट्शूद्रभेदात्तत्स्याच्चतुर्विधं क्रमेणैवसितंरक्तंपीतंकृष्णंचव

सेज्ञे१ मो२

भा.प्र. एतैः प्रशस्यते सितं तारे रक्तं तु रसायने पीतं हेमनि कृष्णं तु गदेषूत्तमयेपि च पीनाकं दर्दुरं ना
१४२ गं वज्रं चेति चतुर्विधं मुंचत्यग्नौ विनिक्षिप्तं पीनाकं दलसंचयं अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदा
यकं दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिं गोलकान्बहुशः कृत्वा तस्यान्मृत्युप्रदायकः नागं
तु नागवद्वह्नौ फूत्कारं परिमुंचति यद्भक्षितमवश्यं तु विदधाति भगंदरं वज्रं तु वज्रवत्तिष्ठेन्ना
तु२ ग्नौ विकृतिं व्रजेत् सर्वाभ्रेषु वरं वज्रं व्याधिवार्धक्यमृत्युजित् अभ्रमुत्तरशैलोत्थं बहुसत्वं गुणा
धिकं दक्षिणाद्रिभवं त्वल्पसत्वमल्पगुणप्रदं अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुवि
वर्द्धनं च हन्यात्त्रिदोषं व्रणमेहकुष्ठप्लीहोदरग्रंथिविषक्रिमींश्च रोगान्हंति दृढयति वपुर्वीर्य
वृद्धिं विधत्ते तारुण्याढ्यं रमयति शतं योषितां नित्यमेव दीर्घायुष्कान्जनयति सुतान् विक्रमैर्वा
जितुल्यान्मृत्योर्भीतिं हरति च सततं सेव्यमानं मृताभ्रं पीडां विधत्ते विविधां नराणां कुष्ठं क्षयं
पांडुगदं च शोथं हृत्पार्श्वपीडां च करोत्यशुद्धमभ्रं ह्यसिद्धं गुरुतापदं च अथ तालकस्य नामा १४१

चतुर्विधं श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत्क्रमात् ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः
स्वर्णादिकरोग२ श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने धातुवादे तु तत्पीतं खेगतौ कृष्णमेव च पारदो रसधातुश्च
रसेंद्रश्च महारसः चपलः शिववीर्यं च रसः सूतः शिवाह्वयः पारदः षड्रसः स्निग्धः त्रिदोषघ्नो
रसायनः योगवाही महावृष्यः सदा दृष्टिबलप्रदः सर्वामयहरः प्रोक्तो विशेषात्सर्वकुष्ठनु
त् स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्द्दनः रंजितः क्रामितश्चापि साक्षाद्देवो महेश्वरः मूर्छितो
हरति रुजं बंधनमनुभूय खेगतिं कुरुते अमरीकरोति हि मृतः कोन्यः करुणाकरः सूतात्
रसामृते यस्य रोगस्य यो योगस्तेनैव सह योजितः रसेंद्रो हरते रोगान्नरकुंजरवाजिनां मलं वि
षं वह्निगिरित्वं चापल्यं नैसर्गिकं दोषमुशंति पारदे उपाधिजौ द्वौ त्रपुनागयोगजौ दोषौ रसेंद्रे क
थितौ मुनीश्वरैः मलेन मूर्छा मरणं विषेन दाहोग्निना कष्टतरः शरीरे देहे च जाड्यं गिरिणास
दास्याच्चापल्यतो वीर्यहतिश्च पुंसां वंगेन कुष्ठं भुजगेन गंडो भवेदतो सोपरिशोधनीयः वह्नि

निगुणास्त्र हरतालंतुतालंस्यादालंतालकमित्यपि हरतालंद्विधाप्रोक्तंपत्राख्यंपिंडसंज्ञकं तयो
राद्यंगुणैःश्रेष्ठंततोहीनगुणंपरं स्वर्णवर्णंगुरुस्निग्धंसपत्रंचाभ्रपत्रवत् पत्राख्यंतालकंवि
द्यात्तद्गुणाढ्यंरसायनं निःपत्रंपिंडसदृशंस्वल्पसत्वंतथागुरु स्त्रीपुष्पहारकंस्वल्पगुणंत
त्पिंडतालकं हरितालंकटुस्निग्धंकषायोष्णंहरेद्विषं कंडूकुष्ठास्यरोगास्रकफपित्तकचं भि ४
व्रणान् हरतिचहरितालंचारुतांदेहजातंसृजतिचचकृतापभंगसंकोचपीडां वितरतिक
मुं.५ फवातौकुष्टरोगान्विदध्यादिदमशोधितमत्युग्रंमारितंचाप्यसम्यक् अथमनःशिला मनःशि
लामनोगुप्तामनोह्वानागजिह्विका नेपालीकुनटीगोलाशिलादिव्यौषधीस्मृता मनःशि
लागुरुर्वर्ण्यासरोह्यालेषनीकटुः तिक्तास्निग्धाविषश्वासकासभूतकफास्रनुत् मनः
शिलामंदबलंकरोतिजंतुंध्रुवंशोधनमंतरेण मलानुबंधंकिलमूत्ररोधंसशर्करंकृच्छ्रगदं
चकुर्य्यात् अथसुरमेसौवीरं अंजनंयामुनंचापिकापोतांजनमित्यपि तत्तुस्रोतोंजनंकृष्णं

[illegible]

नं१

भा·प्र· सौवीरंतत्तुपांडुरम् स्रोतोंजनंस्मृतंस्वादुचक्षुष्यंकफपित्तनुत् अथसोहागा टंकणोग्निकरोरूक्षः
१४२ कफघ्नोवातपित्तकृत् परसत्वातुनरुक्कः अथफटकरी स्फटीचस्फटिकाप्रोक्ताश्वेताशुभ्रा
चरंगदा दृढरंगारंगदृढारंगांगाचापिकथ्यते स्फटिकातुकषायोष्णावातपित्तकफव्रणान्
निहंतिश्वित्रवीसर्प्पान्योनिसंकोचकारिणी अथरेवटी राजावर्त्तःकटुस्तिक्तःशिशिरः
पित्तनाशनः राजावर्त्तःप्रमेहघ्नःछर्दिहिक्कानिवारणः अथचुंबक कांतलोहस्यभेदाःसुश्रु
वकाद्यः चुंबकःकांतपाषाणोऽयःकांतोलोहंकर्षकः चुंबकोलेखनःशीतोमेदोविष
गरापहः अथगेरूस्वर्णगेरू गेरिकंरक्तधातुश्चगैरेयंगिरिजंतथा सुवर्णगैरिकंत्वन्यत्त
तोरक्ततरंहितत् गैरिकंद्वितयंस्निग्धंमधुरंतुवरंहिमं चक्षुष्यंदाहपित्तास्रकफहिक्कावि
षापहः अथखरीगोरखरी खटिकाकठिनीचापि लेखनीचनिगद्यते खटीदाहास्रजि
च्छीतामधुराविषशोथजित् लेपादेतद्गुणाप्रोक्तावल्मीकमृत्तिकासमा खटीगोरखटीक्वेच १४२

मा॰प्र॰ दुर्गमर्न्नाशयविशुद्धिकृत् अथ कंकुष्ठस्योत्पत्तिलक्षणगुणाश्च हिमवत्पाददशिखरे कंकुष्ठमुप-
१४२ जायते हिमवतः प्रत्यंगपर्वतानां शिखरे तत्रैकं नलिकाख्यं स्यात्तदन्यद्रेणुकं स्मृतं पीताभं गुरु
संस्निग्धं श्रेष्ठं कंकुष्ठमादिमं श्यामं पीतं लघु स्निग्धं सत्वनेष्टं हि रेणुकं कंकुष्ठं काककुष्ठं चैव
रंगं कोलवालुकं कंकुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकं कृमिशोथोदराध्मानानाहशूलहक
फापहं अथ रत्नस्य निरुक्तिः धनार्थिनो नराः सर्वे रमंत्यस्मिन्नतीव यत् ततो रत्नमिति प्रो-
क्तं शब्दशास्त्रविशारदैः अथ रत्नस्य नामानि स्वरूपनिरूपणं च रत्नं क्लीबे मणिः पुंसि स्त्रि-
यामपि निगद्यते तत्तु पाषाणभेदोस्ति मुक्तादिषु तदुच्यते तथा चामरसिंहः रत्नं मणिर्द्वयोर
श्मजातौ मुक्तादिकेपि च अथ नामानि निरूपणं रत्नं गारुत्मकं पुष्परागो गोमेदसंज्ञकं
माणिक्यं वज्रकं नीलस्तथा वैडूर्यमित्यपि मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव व
ज्रहीरा गारुत्मकं पन्ना पद्मरागमाणिकः इंद्रनीलः नीला विबुधधर्मोत्तरेपि रत्नानि १४२

रूपाणि मुक्ताफलं हीरकं च वैडूर्यं पद्मरागकं पुष्परागं च गोमेदं नीलं गारुत्मकं तथा प्रवाल
युक्तान्येतानि महारत्नानि वै नव तत्र हीरकं हीरा इति लोके हीरकं पुंसि वज्रोऽस्त्री चंद्रो मणि-
वरश्च सः स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियो मतः पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मक-
श्च सः रसायने मतो विप्रः सिद्धिप्रस्सर्वप्रदायकः क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः परः वै-
श्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् शूद्रो नाशयते व्याधीन्वयःस्तंभं करोति सः पुंस्त्री
नपुंसकभेदेन ते लक्षणीया विलक्षणैः सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः पुरुषास्ते समा
ख्याता रेखाबिंदुविवर्जिताः रेखाबिंदुसमायुक्ताः षडस्रास्ते स्त्रियः स्मृताः षडस्राः षट्कोणा
ः त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया नपुंसकाः तेषु स्युः पुरुषाः श्रेष्ठा रसबंधनकारिणः स्त्रि
यः कुर्वंति कायस्य कांतिं स्त्रीणां सुखप्रदम् नपुंसकास्त्ववीर्याः स्युरकामाः सत्ववर्जिताः
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवाः क्लीवे प्रयोजयेत् सर्वेभ्यः सर्वदा देयाः पुरुषा वीर्यवर्द्ध

नाः अशुद्धंकुरुतेवज्रंकुष्ठंपार्श्वव्यथांतथा पांडुतांपंगुलत्वंचतस्माच्छुद्धंहिमारयेत् आयुः
पुष्टिंबलंवीर्यंवर्णंसौख्यंकरोतिच सेवितंसर्वरोगघ्नंमृतंवज्रंनसंशयः अथहरितमणिप
न्नाइतिलोके गारुत्मकंमरकतमश्मगर्भोहरिन्मणिः अथमाणिक्यमानिकइतिलोके त
स्यनामानि माणिक्यंपद्मरागंस्याच्छोणरत्नंचलोहितं अथपुष्परागस्यनामानि पुष्परागो
मंजुमणिः स्याद्वाचस्पतिवल्लभः अथइन्द्रनीलगोमेदयोर्नामानि नीलंतथेन्द्रनीलंचगो
मेदःपीतरक्तकं अथवैदूर्य्यं वैदूर्य्यंदूरजंरत्नंस्यात्केतुग्रहवल्लभं अथमौक्तिकं मौक्ति
कंमौक्तिकंमुक्तातथामुक्ताफलंचतत् शुक्तिःशंखोगजःक्रोडःफणीमत्स्यश्चदर्दुरः वेणु
रेतेःसमाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः मौक्तिकंशिशिरंवृष्यंचक्षुष्यंबलपुष्टिदं अथ
प्रवालं पुंसिक्लीबेप्रवालंस्यात्पुमानेवतुविद्रुमः अथरत्नानांगुणाः रत्नानिमन्दितानिस्युर्म
धुराणिसराणिच चक्षुष्याणिचशीतानिविषघ्नानिधृतानितु मांगल्यानिमनोज्ञानिग्रहदो १४४

गुणैस्तुल्येप्रकीर्तिते अथवालू वालुकासिकताप्रोक्ताशर्करारेतजापिच वालुकालेखनीशीता
व्रणोरस्क्षतनाशिनी अथखपरियातुत्थभेदः खर्परीतुत्थकंतुत्थादन्यत्तद्रसकंमतं येगुणा
स्तुत्थकेप्रोक्तास्तेगुणारसकेस्मृताः अथकासीसभस्मवन्मृत्तिकाम्ला काशीसंधातुकाशी
संपांशुकाशीसमित्यपि तदेवकिंचित्पीतंतुपुष्पकासीसमुच्यते काशीसमम्लमुष्णंचतिक्तं
चतुवरंतथा वातश्लेष्महरंकेश्यंनेत्र्यंकंडूविषप्रणुत् मूत्रकृच्छ्राश्मरीश्वित्रनाशनंपरिकी
र्तितं अथसोरठीमाटीसौराष्ट्रीतुवरीकाक्षीमृत्तालकंसुराष्ट्रजा आढकीचापिसाख्यातामृ
त्स्नाचसुरमृत्तिका स्फटिकायाःगुणाःसर्वेसौराष्ट्र्यामपिकीर्तिताः अथकरियामाटी
कृष्णमृत्क्षतदाहास्रप्रदरश्लेष्मपित्तनुत् अथकांदय पंकोदाहास्रपित्तार्त्तिशोथघ्नःशी कींचर
तलःसरः अथबोल मुलतानीमाटि बोलंगंधकसंप्राणंपिंडगोपरसाःसमाः बोलंर
क्तहरंशीतंमेध्यंदीपनपाचनं मधुरंकटुतिक्तंचग्राहीमेदःत्रिदोषजित् ज्वरापस्मारकुष्ठ

भा॰प्र॰ हारिद्रः स उदाहृतः अथ सक्तुकस्य स्वरूपं यद्ग्रंथिः सक्तुकेनेव पूर्णमध्यः स सक्तुकः अथ
१४५ प्रदीपनस्य स्वरूपं वर्णतो लोहितो यः स्याद्दीप्तिमान्दहनप्रभः महादाहकरः पूर्वैः कथितः स
प्रदीपनः अथ सौराष्ट्रिकस्य स्वरूपं सौराष्ट्रविषये यः स्यात्स सौराष्ट्रिक उच्यते अथ शृंगि
कस्य स्वरूपं यस्मिन्गोशृंगके बद्धे दुग्धं भवति लोहितं स शृंगिक इति प्रोक्तो द्रव्यतत्त्वविशा
रदैः अथ कालकूटस्य स्वरूपं देवासुररणे देवैर्हतस्य पृथुमानिलः दैत्यस्य रुधिराज्जातस्त मालिनः५
रुरश्वत्थसन्निभः निर्यासः कालकूटोस्य मुनिभिः संप्रकीर्तितः सोहिच्छत्रे शृंगवेरे कोंकणे
मलये भवेत् अथ हालाहलस्य स्वरूपं गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा तेजसा प
स्य दह्यंते समीपस्था द्रुमादयः असौ हालाहलो ज्ञेयः किंकिधायां हिमालये दक्षिणाब्धितटे
देशे कोंकणेपि च जायते अथ ब्रह्मपुत्रस्य स्वरूपं वर्णतः कपिलो यः स्यात्तथा भवति सा रेचकः२
रकः ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ब्राह्मणः पांडुरस्तेषु क्षत्रियो लोहितप्रभः वै १४५

श्यः पीतोऽसितः शूद्रो विषजश्चतुर्विधः रसायने विषं विप्रं क्षत्रियं देहपुष्टये वैश्यं कुष्ठविनाशा
य शूद्रं दद्याद्वधाय हि विषं प्राणहरं प्रोक्तं व्यवायि च विकासि च आग्नेयं वातकफनुत् योगवाहि मदा
वहं व्यवायि सकलकायगुणव्यापनपूर्वकं पाकगमनशीलं विकासि ओजः शोषणपूर्वकं सं
धिबंधशिथिलीकरणशीलं आग्नेयं अधिकाग्न्यंशं योगवाहि संगिगुणग्राहिकं मदावहं तमो
गुणाधिक्येन बुद्धिविध्वंसकं तदेव युक्तियुक्तं तु प्राणदायि रसायनं योगवाहि त्रिदोषघ्नं बृंहणं
वीर्यवर्द्धनं ये दुर्गुणा विषे शुद्धे ते स्युर्हीना विशोधनात् तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोज
येत् अथोपविषाणां निरूपणं अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका करवीरोथ धत्तूरं
पंचैचोपविषाः स्मृताः उपविषा गौणविषा एषां गुणास्तत्र द्रष्टव्याः इति श्रीभावप्रकाशे धात्व
पधातुरसोपरसरत्नोपरत्नविषोपविषवर्गः अथ धान्यवर्गो लिख्यते तत्र धान्यानां भेदाः शा
लिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकं शमीधान्यं चतुर्थं क्षुद्रधान्यमियुक्तं धान्यपंचकं शालिधा

॥अर्कक्षीरं स्नुहीक्षीरं लांगली करवीरकः॥ गुंजाहिफेनधत्तूरः सप्तोपविषजातयः॥४॥

न्यामुदाहरंति शालयोरक्तशाल्याद्याव्रीहयः षष्टिकादयः यवादिकंशूकधान्यंमुद्गाद्यंशिं
बिधान्यकं कंग्वादिक्षुद्रधान्यंस्यात्तृणधान्यंचसंस्मृतं अथशालिधान्यलक्षणंनामानिगुणाश्च कंड
नेनविनाशुक्लाहैमंताःशालयःस्मृताः रक्तशालिर्लोहितस्यान्महत्यंडःशकुनाहितःसुगंधिकः
कर्दमकोमहाशालिश्चदूषकः पुष्पांडकःपुंडरीकस्तथामहिषमस्तकः दीर्घशूकःकांचनको
हायनोलोध्रपुष्पकः इत्याद्याःशालयःसंतिबहवोबहुदेशजाः ग्रंथविस्तारभीतेस्तेसमस्तानात्र
त्रभाषिताः शालयोमधुराःस्निग्धाबल्याबद्धाल्पवर्चसः कषायालघवोरुच्याःस्वर्यावृष्याश्च
बृंहणाः अल्पानिलकफाःशीताःपित्तघ्नामूत्रलास्तथा शालयोदग्धमृज्जाताःकषायालघु
पाकिनः सृष्टमूत्रपुरीषाश्चरूक्षाःश्लेष्मापकर्षणाः केदारावातपित्तघ्नागुरवःकफशुक्रलाः
कषायाअल्पवर्चस्कामधुराश्चबलावहाः केदाराःकृष्टक्षेत्रजाता स्थलजास्वादवःपित्तक
फघ्नावातवह्निदाःकिंचित्तिक्ताःकषायाश्चविपाकेकटुकास्तथापि स्थलजाःअकृष्टभूमिजाः

षहरणेच किंरत्नंकस्यग्रहस्यप्रीतिकारित्वेनतद्दोषहरंभवतीतिप्रश्नेतदुत्तरमाह रत्नमाला
यां माणिक्यंतरणेःसुजातममलंमुक्ताफलंशीतगोर्माहेयस्यचविद्रुमोनिगदितःसौम्यस्य
गारुत्मकं देवेज्यस्यचपुष्परागमसुराचार्यस्यवज्रंशनेर्नीलंनिर्मलमन्ययोर्निगदितेगोमेद
वैडूर्यके अथोपरत्नानांनिरूपणं उपरत्नानिकाचश्चकर्पूराश्मातथैवच मुक्ताशुक्तिस्त
थाशंखइत्यादीनिबहून्यपि उपरत्नानिगौणानि कर्पूराश्माकर्पूरमणिःशुक्तिःसीपि
गुणायथैव रत्नानामुपरत्नेषुतेतथा किंतुकिंचित्ततोहीनाविशेषोयमुदाहृतः अथवि
षस्यनामानिलक्षणंगुणाश्च विषंतुगरलंक्ष्वेडंतस्यभेदानुदाहरेत् वत्सनाभःसहारिद्रः
शाक्तुकश्चप्रदीपनः सौराष्ट्रिकःशृंगिकश्चकालकूटस्तथैवच हालाहलोब्रह्मपुत्रोवि
षभेदाअमीनव तत्रवत्सनाभस्यस्वरूपनिरूपणं सिंदुवारसदृक्पत्रोवत्सनाभ्याकृति
स्तथा यत्पार्श्वेनतरोर्वृद्धिर्वत्सनाभःसभाषितः अथहारिद्रस्यस्वरूपं हरिद्रातुल्यमूलोयो

भा·प्र· सुखंयस्माच्चयोऽयंतुसुखःस्तुसःव्रीहयः कथिताःपाकेमधुरावीर्यतोहिमाः अल्पाभिष्यंदिनीबद्धवर्चस्का

१४७ :षष्टिकैःसमाः कलमोहिवरस्तेषांतस्मादल्पगुणाःपरे अथषष्टिकाः गर्भस्थाएवयेपाकेयांतिते

षष्टिकामताः षष्टिकःशतपुष्पश्चप्रमोदकमुकुंदकौः महाषष्टिकइत्याद्याःषष्टिकाःसमुदाहृ

ताः एतेपिव्रीहयःप्रोक्तोव्रीहिलक्षणदर्शनात् षष्टिकामधुराशीतालघवोबद्धवर्चसः वातपि

त्तप्रशमनाःशालीनांसदृशागुणैः षष्टिकाप्रवरास्तेषांलघ्वीस्निग्धात्रिदोषजित् स्वाद्वीमृद्वीग्रा

हिणीचबलदाज्वरहारिणी रक्तशालिगुणैस्तुल्यातत(ः)स्युरल्पगुणाःपरेषष्टिकासाठीइतिलो

के अथशूकधान्यानि तेषुयवःप्रसिद्धः अतियवोनिःशूकः कृष्णारुणवर्णोयवःतोक्यो

हरितोनिःशूकःस्वल्पोयवःयईइतिलोकेप्रसिद्धः यवस्तुसितशूकःस्यान्निःशूकोतियवः

स्मृतः तोक्योहरितोनिःशूकःस्वल्पोयवःप्रकीर्तितः यवःकषायोमधुरोशीतलोलेखनो

मृदुः व्रणेषुतिलवत्पथ्योरूक्षोमेधाग्निवर्द्धनः कटुपाकोऽनभिष्यंदीस्वर्य्योबलकरोगुरुः व १४५

यवोवप:तद्वत्सहरित:ततःस्वल्पअप्रकीर्तितः २

[illegible]

हुवातमलोवर्णस्थैर्यकारीचापिपिच्छिलः कंठत्वगामयश्लेष्मपित्तमेदःप्रणाशनः पीनसश्वास

कासोरुस्तंभलोहिततृट्प्रणुत् अस्मादतियवोन्यूनस्तोक्योन्यूनतरस्ततः अथगोधूमः गो

धूमःसुमनोपिस्यात्त्रिविधःसचकीर्तितः महागोधूमइत्याख्यःपश्चिमात्ससमागतः महागोधूम

बडगेहूंइतिलोके मधूलीतुततःकिंचिदल्पासामध्यदेशजा निःशूकोदीर्घगोधूमःक्वचि

न्नंदीमुखाभिधः गोधूमोमधुरःशीतोवातपित्तहरोगुरुः कफशुक्रप्रदोबल्यःस्निग्धःसंधा बहुस्थिरसंधानकृत् २

वल्यो १ नकृत्सरः जीवनोबृंहणोवर्ण्योव्रण्योरुच्यःस्थिरत्वकृत् कफप्रदोनवीनोनतुपुराणः पुराणय

मांसः ४ वगोधूमक्षौद्रजांगलशूल्यभुगिति वाग्भटेनवसंतेपिहीतत्वात् मधूलीशीतलास्निग्धापित्त

घ्नीमधुरालघुः शुक्रलाबृंहणीपथ्यातद्वन्नंदीमुखःस्मृतः अथशमीधान्यंतत्पर्यायानाह

शमीजाःशिंबिजाःशिंबाःतथाशमीधान्यंद्विदलाः तेषांगुणाः वैदलामधुरारूक्षाःकषायाःक

टुपाकिनः वातलाकफपित्तघ्नाबद्धमूत्रमलाहिमाः ऋतेमुद्गमसूराभ्यामन्येत्वाध्मा

भा॰प्र॰ नकारकाः मुद्गमकुष्ठयोराध्मानकारित्वमक्षेदलापेक्षयान्नतु सर्वथा एतयोरपि किंचिदाध्मानकारि
१४८ त्वदर्शनात् तत्र मुद्गस्य गुणाः मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः स्वादुरल्पानिलो नेत्र्यो
ज्वरघ्नो वनजस्तथा। कृष्णमुद्गो महामुद्गो हरितः पीतकस्तथा। (श्वेतो रक्तस्तु तेषां च पूर्वः पूर्वो लघु
र्ग्राही कफपित्तहरो हिमः स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा। कृष्णमुद्गो महामुद्गो हरि(
तः पीतकस्तथा) श्वेतो रक्तस्तु तेषां च पूर्वः पूर्वो लघुः स्मृतः सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गु
णैः चरकादिभिरप्युक्त एष एव गुणाधिकः अथमषरिद माषो गुरुः स्वादुपाकः स्निग्धो रुच्यो ऽ
निलापहः स्रंसनः तर्पणो बल्यः शुक्रलो बृंहणः परः भिन्नमूत्रमलः स्तन्यो मेदःपित्तकफप्रदः
गुदकीलार्दितश्वासपंक्तिशूलानि नाशयेत् कफपित्तकरा माषाः कफपित्तकरं दधि कफ
पित्तकरा मत्स्याः रंताकं कफपित्तकृत् अथ वोडायस्य चवराटतरा लोके ख्याता इत्याद्यो भेदाः
राजमाषो महामाष अपलश्च चलः स्मृतः राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः रूक्षो वात(१४८

स्वयंजाताः वापिता मधुरा हृष्या अवल्या पित्तविनाशनाः श्लेष्मलाश्चाल्पवर्चस्काः कषाया गुरवो हिमाः
वापिताः कृष्टक्षेत्रे अकृष्टक्षेत्रे च वापितेभ्यो गुणैः किंचिद्धीनाः प्रोक्ताः अवापिताः कृष्टक्षेत्रे अकृष्टक्षे(
त्रे च रोपिताः तु नवा वृष्याः पुराणाः लघवः स्मृताः रोपिता रोपिता भूयः शीघ्रपाका गुणाधिकाः छि(
न्नरूढा हिमा रूक्षा अवल्या पित्तकफापहाः बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः रक्तशालि
र्वरस्तेषु वल्यो वर्ण्यस्त्रिदोषजित् चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्ज्वरापहः विषव्रणश्वासका(
सदाहनुद् वह्निपुष्टिदः तस्मादल्पान्तरगुणाः शालयो महदादयः रक्तशालिः दाउदषानी इति
मगधदेशे प्रसिद्धः अथ व्रीहिधान्यस्य गुणाः वार्षिकाः कंडिताः शुक्लाः व्रीहयश्चिरपाकिनः
कृष्णव्रीहिः पाटलश्च कुक्कुटांडक इत्यपि शालामुखा जतुमुखा इत्याद्या व्रीहयः स्मृताः
कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतंडुलः पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते कुक्कु
टांडाकृतिर्व्रीहिः कुक्कुटांडक उच्यते शालामुखः कृष्णशूकः कृष्णतंडुल उच्यते लाक्षावर्णो

करोरुच्यः स्तन्यभूरिमलप्रदः श्वेतो रक्तस्तथा कृष्णस्त्रिविधः सम्प्रकीर्त्तितः योमहांस्तेषु भवति स ए
दक्षिणे वल्लर इति वोक्तो गुणाधिकः अथ निष्पावः स तु राजशिंबी वीजं नटवासस्तु इति लोके निष्पावो राजशिंबिः स्या
द्वल्लकः श्वेतशिंबिकः निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः कषायस्तन्यपित्तास्रमूत्रवातवि
बंधकृत् विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः अथ मोठ वकुष्ठो वनमुद्गः स्यान्मकुष्टकमपु
ष्टकौ मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः वातजिन्मधुरः पाके संग्राही शीतलो लघुः अथ मसु
री मंगल्यको मसूरः स्यान्मंगल्या च मसूरिका मसूरिः मधुरः पाके संग्राही शीतलो लघुः कफपित्ता
स्रजिद्रूक्षो वातलो ज्वरनाशनः अथ अरहरि आढकी तुवरी चापि सा प्रोक्ता शणपुष्पिका आढकी
तुवरा रूक्षा मधुरा शीतला लघुः ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित् अथ छोला चणको
हरिमंथः स्यात् सकलप्रिय इत्यपि चणकः शीतलो रूक्षो रक्तपित्तकफापहः लघुः कषायो वि
ष्टंभी वातलो ज्वरनाशनः स चांगारेण संभृष्टस्तैलभृष्टश्च तद्गुणः आर्द्रभृष्टो बलकरो रोचनश्च

भा॰प्र॰ प्रकीर्त्तितः शुष्कमृद्धोऽतिरूक्षः स्याद्वातकफप्रकोपनः स्विन्नं पित्तकफं हन्यात्सूपः शोफकरो मतः आ
१४९ ढ्रैतिकोमलो रुच्यः पित्तरक्तहरो हिमः अथ केराउ कलायो वर्त्तुलः प्रोक्तः संपीतश्च हरेणुकः कला
यो मधुरः स्वादुः पाके रूक्षश्च शीतलः कषायो वातलो ग्राही कफपित्तहरो लघुः अथ खेसारी त्रिपुटः लाँकूर २ दुविआ
कंडिकौ पिस्यात्कथ्यंते तद्गुणा अथ त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशं कफपित्तहरो रुच्यो
ग्राहकः शीतलस्तथा किंतु खंजत्वपंगुत्वकारी वातातिकोपनः अथ कुरथी कुलत्थिका कुल
त्थश्च कथ्यंते तद्गुणास्तथा कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् लघुर्विदाही वीर्योष्ण
णः श्वासकासकफानिलान् हंति हिक्काश्मरीशुक्रदाहानाहानपीनसान् स्वेदसंग्राहको मेदोज्व
रकृमिहरः सरः अथ तिलः तिलः कृष्णः सितो रक्तः स वन्यो पितिलः स्मृतः तिलो रसे कटुस्तिक्तो
मधुरस्तुवरो गुरुः विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तकृत् बल्यः केश्यो हिमस्पर्शस्त्व
च्यः स्तन्यो व्रणे हिमः दंत्योल्पमूत्रकृद्ग्राही वातघ्नोग्निमतिप्रदः कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्य १४९

अलसी १
नेत्रफूली २

राईविशेष:
रक्तसर्षप ३

म:सित: अन्येहीनतरा:प्रोक्ता:ततोरक्तादयस्तिला: अथातसी अतसीनीलपुष्पीचपार्वतीस्या
दुमाक्षुमा अतसीमधुरातिक्तास्निग्धापाकेकटुर्गुरु: उष्णादृक्शुक्रवातघ्नीकफपित्तविनाशिनी
अथतोरीलाही तुवरीग्राहिणीशीतालघ्वीकफविषास्रजित तीक्ष्णोष्णाचवह्निदाकंडूकुष्टकोठक कुष्ठदद्रू
मिप्रणुत अथरक्तसरसोपीतसरसो सर्षप:कटुकस्नेहोभूतघ्नश्चकदंबक: गौरस्तुसर्षप:
प्राज्ञै:सिद्धार्थइतिकथ्यते सर्षपस्तुरसेपाकेकटुरुष्ण:सतिक्तक: तीक्ष्णोष्ण:कफवातघ्नो
रक्तपित्ताग्निवर्द्धक: रक्षोहरोजयेत्कंडूकुष्टकोठकृमिग्रहान् यथारक्तस्तथागौर:किंतु
गौरोवरोमत: अथराईकालाराई राजीतुराजिकतीक्ष्णगंधाक्षुज्जनिकासुरी क्षवश्चुताभिजन
क:कृमिकाकृष्णसर्षप: राजिकाकफपित्तघ्नीतीक्ष्णोष्णारक्तपित्तकृत किंचिद्रूक्षाग्निदाकंडू
कुष्टकोठकृमीन्हरेत अतितीक्ष्णाविशेषेणतद्वत्कृष्णापिराजिका अथक्षुद्रधान्यं क्षुद्रधान्यं
कुधान्यंचतृणधान्यमितिस्मृतं क्षुद्रधान्यमनुष्णंस्यात्कषायंलघुलेखनं मधुरंकटुकंपाकेरु

भा॰प्र॰ देहस्थक्लेदशोषणं वातकृद्बद्धविट्कं च पित्तरक्तकफापहं तत्र कंगुनीकौंकुनिरिति लोके स्त्रिया
१५० कंगुप्रियंगुद्वे कृष्णा रक्ता सिता तथा पीता च चतुर्विधा कंगुस्तासां पीता वरा स्मृता कंगुस्तु भग्नसंधा
न वातकृद्बृंहणी गुरुः रूक्षा श्लेष्महरातीव वाजिनां गुणकृद्भृशं अथ चीन चिनवा इति लोके
चीनाकः कंगुभेदोस्ति स ज्ञेयः कंगुवद्गुणैः अथ सांवा श्यामकः शोषणो रूक्षो वातलः कफपि
त्तहृत अथ कोद्रव कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः कोद्रवो वातलो ग्राही हिमः पित्तकफा
पहः उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशं अथ चातुके चारुकः शरबीजं स्यात्कथ्यंते तद्गु
णा अथ चारुको मधुरो रूक्षो रक्तपित्तकफापहः शीतो लघुर्वृष्यश्च कषायो वातकोपनः
अथ वंशबीज यवा वंशभवा रूक्षाः कषायाः कटुपाकिनः बद्धमूत्राः कफघ्नाश्च वातपित्त
कौ२३ कराः सराः अथ वरै कुसुंभबीजं वरटा सैवोक्ता तु वराटिका वरटा मधुरा स्निग्धा रक्तपित्तक
फापहा कषाया शीतला गुर्वी स्याद्वृष्यानिलापहा अथ मेडुवा मकरेति च गवेधुका तु विदग्ध १५०

भा·प्र· नतिवपुरस्थि निहंति नेत्रं वर्णं विनाशयति रूक्षमथापि शुक्रं प्रज्ञां तथैव कुरुते पलितं च नूनं हं
२५१ ति स्मृतिं गतिमिति प्रवदंति तज्ज्ञाः शाकेषु सर्वेषु वसंति रोगास्ते हेतवो देहविनाशनाय तस्माद्बुधः
शाकविवर्जनं तु कुर्यात्तथाम्लेषु स एव दोषः एतानि शाकानि निर्दिष्टानि वचनानि सामान्यानि
अथ शाकेषु विशिष्टवचनानि तत्र पत्रशाकानि तत्रादौ वास्तूकद्वयनामानि गुणाश्च वास्तूकं वथुई ४
वास्तुकं च स्यात् क्षारपत्रं च शाकराट् तदेव तु बृहत्पत्रं रक्तं स्याद्गौडवास्तुकं प्रायशो यवमध्ये स्या २५
द्यवशाकमतः स्मृतं वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितं दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदं
सरं प्लीहास्रपित्तार्शःकृमिदोषत्रयापहं अथ पोई पोतकी पोदिका सा तु मालवे अमृतवल्लरी पोतकी
शीतला स्निग्धा श्लेष्मला वातपित्तजित् अकंठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तजित् बलदा रु
चिकृत्पथ्या बृंहणी तृप्तिकारिणी श्वेतमरुसा लोहितमरुसा नवडीशतिच मारिषो वाष्पको मार्षः
श्वेतो रक्तश्च स स्मृतः मारिषो मधुरः शीतो विष्टंभी पित्तनुद्गुरुः वातश्लेष्मकरो रक्तपित्तनुद्विषमा २५१

ग्निजित् रक्तमार्षो गुरुर्नातिसक्षारो मधुरः सरः श्लेष्मलः कटुकः पाके स्वल्पदोष उदाहृतः अथ
चवराई अल्पमरुसा इति च तंडुलीयो मेघनादः कांडेरस्तंडुलेरकः भंडीरस्तंडुलीबीजो विषघ्नश्चा
ल्पमारिषः तंडुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः
अथ चवराई भेदः जलतंडुलीयं शाकं च कंचटकमिति प्रसिद्धं पानीयतंडुलीयोस्ति कंचटं समुदा जलकुंभी ४
हृतं कंचटं तिक्तकं रक्तपित्तानिलहरं लघु अथ पलांकी पालंक्या वास्तुकाकारा छुरिका चीरि
तच्छदा पलंक्या वातला शीता श्लेष्मला भेदिनी गुरुः विष्टंभिनी मदश्वासकासरक्तविषापहा
करेमू ४ अथ नलिका कालशाकमिति च नाडिकं कालशाकं च श्राद्धशाकं च कालकं कालशाकं
सरं रुच्यं वातकृत्कफशोफहृत् बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमं अथ पटुआ पट्टशाकं अंबाडी २
तु कसु नाडीको नाडीशाकं च स स्मृतः नाडीको रक्तपित्तघ्नो विष्टंभी वातकोपनः अथ करंबी गेठुवा २
कलंबी शतपर्विका कथ्यते तद्गुणा अथ कलंबी स्तन्यदा प्रोक्ता मधुरा शुक्रकारिणी अथ लोनी

भा॰प्र॰ इहल्लोनीकुल्फालल्हरा इति च लोनाल्लोनीचकथिता बृहल्लोनीबुघोटिका लोनारूक्षा गुरुःकंडू
१५२ वातश्लेष्महरीकटुः अर्शोघ्नीदीपनीचाम्ला मन्दाग्निविषनाशिनी घोटिकाम्ला सराचोष्णा वातहृ
त्कफपित्तकृत् त्वग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् शोथे लोचनरोगे च हिता तज्ज्ञैरुदा
हृता अथ चांगेरी अम्बिलोना इति च चांगेरी चुक्रिका दंतशठाम्बष्ठाम्ललोनिका अश्मंतकस्तु
शफरी कुशली चाम्लपत्रकः चांगेरी दीपनी रुच्या लघ्व्युष्णा कफवातनुत् पित्तलाम्ला ग्रहण्य
र्शः कुष्ठातीसारनाशिनी अथ चूक पटीपलाकी अम्लवा इति च चुक्रिकास्याच्चतुपत्राम्ला शोथवि
नीशातवेधिनी चुक्रा त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् रुच्या लघुतरा पाके हंताके नाते
रोचिनी अथ चेंचुका चिंचवत चिंचुश्च चिंचुकी चिंचु दीर्घपत्रा सतिक्तिका चिंचुः शीतास
रा रुच्या स्वाद्वी दोषत्रयापहा धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका मता अथ हिलमो
च ऊअकरा इति लोके ब्राह्मी शंखधरा चारी ब्राह्मी च हिलमोचिका शोथं कुष्ठं कफं पित्तं १५२

स्याद्वीतिद्धिः १

गवेधुः कथिता स्त्रियां गवेधुः कटुका स्वाद्वी कार्श्यकृत् कफनाशिनी अथ तिनी पसही इति च प्रसाधि
का तु नीवारस्तृणान्नमिति स्मृतं नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् अथ योनरी यवना जुवारी २
लो हिमः स्वादुर्लोहितः श्लेष्मपित्तजित् अरण्यस्तु वरो रूक्षः क्लेदघ्नः कथितो लघुः धान्यं सर्वं नवं स्वा
दु गुरु श्लेष्मकरं स्मृतं तत्तु वर्षोषितं पथ्यं यतो लघुतरं हितं वर्षोषितं धान्यं सर्वं गौरवं परिमुंचते
न तु त्यजति वीर्यं स्वं क्रमान्मुंचत्यतः परं एतेषु यव गोधूम तिल माषा नवा हिताः पुराणा विरसा
रूक्षा न तथा गुणकारिणः पुराणा वर्षद्वयादुपरि स्थिताः यवाद्वयोनवाः स्वस्था अतिहिता
: पथ्याशिनां तु पुराणा हिताः पुराणयवगोधूमक्षौद्रजांगलशूल्यभुगिति वसंते वा अन्येकर
त्वात् इति श्रीभावप्रकाशे धान्यवर्गः अथ शाकवर्गः तत्र शाकानि निरूपणं पत्रं पुष्पं फलं
नालं कंदं संस्वेदजं तथा शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरं अथ शाकानां गुणाः प्रा
पुर्रग्नफूल यः शाकानि सर्वाणि विष्टंभीनि गुरूणि च रूक्षाणि कटुवर्चांसि सृष्टविण्मूत्रतानि च शाकं भि

भा॰प्र॰ अथगोजी गोजिकाकुष्टमेहास्रकृच्छ्रज्वरहरीलघुः अथपटोलपत्र पटोलपत्रंपित्तघ्नंदीपनंपाचनंल
१५२ घुःस्निग्धंवृष्यंतथोष्णंचज्वरकासकृमिप्रणुत अथगुडूचीपत्र गुडूचीपत्रमाग्नेयंसर्वज्वरहरंलघुक
षायंकटुतिक्तंचस्वादुपाकंरसायनं बल्यमुष्णंचसंग्राहिहन्याद्दोषत्रयंतृषां दाहप्रमेहवातास्रका
वङान्यक्तै ३४ मलाकुष्टपांडुताः अथकासोदी कासमर्दोरिमर्दःस्यात्कासारिःकर्कशस्तथा कासमर्ददलंरुच्यं
वृष्यंकासविषप्रणुत मधुरंकफवातघ्नंपाचनंकंठशोधनं विशेषतःकासहरंपित्तघ्नंग्राहकं
लघु अथचणका रुच्यंचणकशाकंस्यात्दुर्जरंकफवातकृत अम्लपाकविदाहीस्याद्(
रु४ दंतशोथविदोषजित सक्षारंलवणंतीक्ष्णंस्वादुशाकेषुनिंदितं अथपुष्पशाकानितत्रागस्ति
पुष्पस्यगुणाः अगस्तिकुसुमंशीतंचातुर्थकनिवारणं नक्तांध्यनाशनंतिक्तंकषायंक
टुपाकिच पीनसश्लेष्मपित्तघ्नंवातघ्नंमुनिभिर्मतं अथकदलीपुष्पं कदल्याःकुसुमंस्निग्धंम
धुरंतुवरंगुरु वातपित्तहरंशीतंरक्तपित्तक्षयप्रणुत अथसोभांजनपुष्पं शिग्रोःपुष्पंतुकटु १५२

कंतीक्ष्णोष्णंस्नायुशोथनुत कृमिहृत्कफवातघ्नंविद्रधीप्लीहगुल्मजित मधुशिग्रोस्त्वचिहितंरक्त
पित्तक्षयप्रणुत अथसोभांजनपुष्पं शिग्रोःपुष्पंतुकटुकंतीक्ष्णोष्णंस्नायुशोथनुत कृमिहृत्क
फवातघ्नंविद्रधीप्लीहगुल्मजित मधुशिग्रोस्त्वचिहितंरक्तपित्तप्रसादनं अथशाल्मलीपुष्पं
शाल्मलीपुष्पशाकंतुघृतसैंधवसाधितं प्रदरंनाशयत्येवदुःसाध्यंचनसंशयः रसेपाकेचम
धुरंकषायंशीतलंगुरु कफपित्तास्रजिद्ग्राहीवातलंचप्रकीर्तितं अथफलशाकानि तत्रकू
ष्मांडस्यनामानिगुणाश्च कूष्मांडंस्यात्पुष्पफलंपीतपुष्पंबृहत्फलं कूष्मांडंबृंहणंवृष्यंगु
रुपित्तास्रवातनुत बालंपित्तापहंशीतंमध्यमंकफकारकं वृद्धंनातिहिमंस्वादुसक्षारंदीप(
नंलघु वस्तिशुद्धिकरंचेतोरोगहृत्सर्वदोषजित तन्मज्जापित्तनुत्स्निग्धोमधुरोवस्तिशोधनः अ
षभा थकोसांडी कूष्मांडीतुभृशंलध्वीकर्कारुरपिकीर्तिता कर्कारुग्राहिणीशीतारक्तपि
त्तहरागुरुः पक्वातिक्ताग्निजननीसक्षाराकफवातनुत अथलोकीगृहलोकी अलाबुःक

थितातुंबीद्विधादीर्घाचवर्त्तुला। मिष्टंतुंबीफलंहृद्यंपित्तश्लेष्मापहंगुरुवृष्यंरुचिकरंप्रोक्तंधातुपुष्टिवि
वर्द्धनं अथकटुतुंबी इक्ष्वाकुःकटुतुंबीस्यात्सातुंबाचवृहत्फला। कटुतुंबीहिमाहृद्यापित्तकासवि
षापहा तिक्ताकटुर्विपाकेचवातपित्तज्वरापहा अथककरी एर्वारुःकर्कटीप्रोक्ताकर्कटीतेतद्गु
णाः अथ कर्कटीशीतलारूक्षाग्राहिणीमधुरागुरुः रुच्यापित्तहरासामापक्वातृष्णाग्निपित्तकृत्
अथचचीडा चिचिंडःश्वेतराजिःस्यात्सुदीर्घोगृहकूलकः चिचिंडोवातपित्तघ्नोवल्यःपथ्योरुचे
प्रदः शोषिणोहितःकिंचिद्गुणैर्न्यूनःपटोलतः अथकरेलाकरेली कारवेल्लंकठिल्लंस्यात्
त्कारवेलीततोलघुः कारवेल्लंहिमंभेदिलघुतिक्तमवातलं ज्वरपित्तकफास्रघ्नंपांडुमेहकृमीन्हरे
त् तद्गुणाकारवेल्लीस्याद्विशेषाद्दीपनीलघुः अथनेनुआ महाकोशातकीप्रोक्ताहस्तिघोषाम घियातोरई२
मित्यपि दुग्धंसमधुरंस्निग्धंवातपित्तहरंसरं सद्यःशुक्रकरंशीतंसात्म्यंसर्वशरीरिणांजी
वनंबृंहणंबल्यंमेध्यंवाजीकरंपरं वयःस्थापकमायुष्यंसंधिकारिरसायनम् विरेकवांतिव
स्तीनांतुल्यमोजोविवर्द्धनं जीर्णज्वरेमनोरोगेशोषमूर्छाभ्रमेषुच ग्रहण्यांपांडुरोगेचदाहेतृषि
हृदामये शूलोदावर्त्तगुल्मेषुवस्तिरोगेगुदांकुरे रक्तपित्तेऽतीसारेयोनिरोगेश्रमेक्लमे गर्भ
स्रावेचसततंहितंमुनिवरैःस्मृतं बालवृद्धक्षतक्षीणाःक्षुद्व्यवायकृशाश्चये तेभ्यःसदातिश
यितंहितमेतदुदाहृतं अथगोदुग्धस्यगुणाः गव्यंदुग्धंविशेषेणमधुरंरसपाकयोः शीतलं
स्तन्यकृत्स्निग्धंवातपित्तास्रनाशनं दोषधातुमलस्रोतःकिंचित्क्लेदकरंगुरु जरासमस्त।

रोगाणां शांतिकृत्सेवितं सदा अथ वर्णविशेषेण गुणविशेषः कृष्णायागोर्भवेत्दुग्धंवात
हारिगुणाधिकं पीतायाः हरते पित्तं तथा वातहरंभवेत् श्लेष्मलं गुरु शुक्लाया रक्ता चित्रा
च वातहृत् अथ धेनोर्विवत्सायाश्च गुणाः वालवत्सविवत्सानां गवां दुग्धं त्रिदोषकृत् अथ
वक्करनिगोगुणाः वष्कयिण्यास्त्रिदोषघ्नं तर्प्पणं वलकृत्पयः अथ देशविशेषेण गुणवि
शेषः जांगलानूपशैलेषु चरंतीनां यथोत्तरं पयो गुरुतरं स्नेहो यथाहारं प्रवर्त्तते अथाहा
रविशेषेण गुण विशेषः स्वल्पान्नभक्षणाज्जातं क्षीरं गुरु कफप्रदं तनुवल्पं परं वृष्यं स्वस्था
नां गुणदायकं पलालतृणकर्पासबीजजं रोगिणे हितं अथ महिषीदुग्धस्य गुणाः माहिषं
मधुरं गव्यात्स्निग्धं शुक्रकरं गुरु निद्राकरमभिष्यंदि क्षुधाधिक्यहरं हिमं अथ छागीदुग्धं छागं
कषायं मधुरं शीतं ग्राहि पयो लघु रक्तपित्तातिसारघ्नं क्षयकासज्वरापहं अजानामल्पकाय
त्वात्कटुतिक्तादिभक्षणात् स्तोकांबुपानाद्व्यायामात्सर्वरोगापहं पयः अथ मा[illegible]दिदुग्धस्य गुणाः

हस्तन्यरणादि ३

मा॰ प्र॰ मार्गीनं जांगलो ग्यानामजाक्षीरगुणं पयः अथ मेंढीदुग्धं आविकं लवणं स्वादु स्निग्धोष्णं चाश्म

१२२ रीप्रणुत अहृद्यं तर्पणं केश्यं शुक्रं पित्तकफप्रदं गुरु कासेनिलोद्भूते केवले चानिले वरं अथ

घोटीदुग्धं रूक्षोष्णं वडवाक्षीरं बल्यं शोषानिलापहं अम्लं पटु लघु स्वादु सर्वमेकशफं तथा अथ एकखुरादि ३०० एवं त्रयं ३

उष्ट्रीदुग्धं औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा कृमिकुष्ठकफानाहशोथोदरहरं सरं अ

थ हस्तिनीदुग्धं बृंहणं हस्तिनीदुग्धं मधुरं तु वरं गुरु वृष्यं बल्यं हितं स्निग्धं चक्षुष्यं स्थिरताकरं

अथ नारीदुग्धं नार्य्या लघु पयः शीतं दीपनं वातपित्तजित् चक्षुःशूलाभिघातघ्नं नस्यमाश्चोतनयोर्व

रं अथ धारोष्णादिगुणाः धारोष्णं गोपयो बल्यं लघु शीतं सुधासमं दीपनं च त्रिदोषघ्नं तद्धाराशिशि

रं त्यजेत् धारोष्णं शस्यते गव्यं धाराशीतं तु माहिषं शृतोष्णमाविकं पथ्यं शृतशीतमजापयः आ भेडी ३

मं क्षीरमभिष्यंदि गुरु श्लेष्मामवर्द्धनं ज्ञेयं सर्वमपथ्यं तज्ज्यमाहिषवर्जितं नारीक्षीरं त्वाममेव

शृतं न तु मतं हितं शृतोष्णं कफवातघ्नं शृतशीतं तु पित्तनुत् अर्द्धोदकं क्षीरशिष्टमामाल्लघुत १२२

रंपयः जलेनरहितंदुग्धमतिपक्वंयथायथा तथातथागुरुस्निग्धंवृष्यंवलविवर्द्धनं अथपे
यूषं किलाटंक्षीरशाकंतक्रपिंडंमोरटाणांलक्षणंगुणाश्च क्षीरंतत्कालसूतायाघनंपेयू
षमुच्यते पेयूषंपेउसइतिलोके नष्टदुग्धस्यपक्वस्यपिंडःप्रोक्तःकिलाटकः पिधूरीइति
लोके अपक्वमेवयन्नष्टंक्षीरशाकंहितत्पयः क्षीरशाकंविनसाइतिलोके दध्नातक्रेण
वानष्टंदुग्धंवद्धंसुवाससा द्रवभागेनहीनंयत्तक्रपिंडःसउच्यते नष्टदुग्धभवंनीरंमोरटंजे
ज्जटोऽब्रवीत् पेयूषंचकिलाटंचक्षीरशाकंतथैवच तक्रपिंडश्चमेवृष्याबृंहणावलवर्द्धना
ः गुरवःश्लेष्मलाहृद्यावातपित्तविनाशनाः दीप्ताग्नीनांविनिद्राणांप्रवायेचातिपूजिताः
मुखशोषतृषादाहरक्तपित्तज्वरप्रणुत् लघुर्वलकरोरुच्योमोरटःस्यात्सितायुतः अथसं
तानिकागुणाः साढीइतिलोके संतानिकागुरुःशीतावृष्यापित्तास्रवातनुत् तर्पणीबृंह
णीस्निग्धावलासवलशुक्रदा अथखण्डादियुक्तदुग्धगुणाः खण्डेनसहितंदुग्धंकफ

कृछ्रपवनापहं सितासितोपलायुक्तं शुक्लनेत्रमलापहं सगुडं मूत्रकृच्छ्रघ्नं पित्तश्लेष्मकरं
स्मृतं रात्रौ चंद्रगुणाधिक्याद्व्यायामाकरणात्तथा प्राभातिकं पयः प्रायः प्रादोषाद्गुरुशीतलं
दिवाकरकराघाताद्व्यायामानलसेवनात् प्राभातिकात्तु प्रादोषं लघु वातकफापहं अथदुग्ध
स्यैव समयविशेषेगुणविशेषः वृष्यं बृंहणमग्निदीप्तिजनकं पूर्वान्हिकाले पयो मध्यान्हे तु
बलावहं कफकरं पित्तापहं दीपनम् बाले वृद्धिकरं क्षयक्षयकरं वृद्धेषु रेतोवहं रात्रौ पथ्यम
नेकदोषशमनं चक्षुर्हितं संस्मृतं वदंति पेयं निशि केवलं पयो भोज्यं न तेनेह सहौदनादि
कं भवेदजीर्णं निशि पीतशार्करादीरप्यपीतस्य न शोषमुत्सृजेत् विदाहीन्यन्नपानानि दि
वाभुंक्ते हि यन्नरः तद्विदाहप्रशांत्यर्थं रात्रौ क्षीरं सदा पिबेत् दीप्तानले कृशे पुंसि बाले वृद्धे प
यः प्रिये क्षीरं गव्यमथाजं वा कोष्णं दंडाहतं भवेत् लघु वृष्यं ज्वरहरं वातपित्तकफापहं
मतं हिततमं दुग्धं सद्यः शुक्रकरं यतः अथमथितदुग्धस्यफेनगुणाः गोदुग्धप्रभवं किंवा १८३

छागीदुग्धसमुद्भवं भवेत्फेनं त्रिदोषघ्नं रोचनं बलवर्द्धनं वन्हिदीपकरं पथ्यं सद्यस्तृप्तिकरं
लघु अतीसारेऽग्निमांद्ये च ज्वरे जीर्णे प्रशस्यते अथ निंदितदुग्धं विवर्णं विरसं चाम्लं दुर्गंधं ग्रथि
तं पयः वर्जयेदम्ललवणयुक्तं कुष्टादिकृद्यतः इतिश्रीभावप्रकाशे दुग्धवर्गः अथ दधिव
र्गः तत्र दध्नो गुणाः दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु पाकेऽम्लं ग्राहि पित्तास्रशोथमेदः
कफप्रदं मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे अतीसारेऽरुचौ कार्श्ये च शस्यते बलशु
क्रकृत् अथ दधिभेदाः आदौ मंदं ततः स्वादु स्वाद्वम्लं च ततः परं अम्लं च वुधमत्यम्लं पंच।
मं दधि पंचधा अथ मंदादीनां लक्षणानि गुणाश्च मंदं दुग्धवदव्यक्तरसं किंचिद्घनं भवेत्
मंदं स्यात्सृष्टविण्मूत्रं दोषत्रयविदाहकृत् यत्सम्यग्घनतां यातं व्यक्तं स्वादुरसं भवेत् अव्य
क्ताम्लरसं तत्तु स्वादु विज्ञेयमुदाहृतं स्वादु स्यादत्यभिष्यंदि वृष्यं मेदःकफापहं वातघ्नं मधुरं
पाके रक्तपित्तप्रसादनं स्वाद्वम्लं सांद्रमधुरं कषायानुरसं भवेत् स्वाद्वम्लस्य गुणा ज्ञेयाः सा

भा॰प्र मान्यद्दधिवर्जनैः यत्तिरोहितमाधुर्यमव्यक्ताम्लत्वं तदम्लकं अम्लंतुदीपनंपित्तरक्तश्लेष्म
विवर्द्धनं तदत्यम्लंदन्तहर्षरोमहर्षकंठादिदाहकृत् अत्यम्लंदीपनंरक्तपित्तदूषिकरंपरं अथ
१८४ गोदधि गव्यंदधिविशेषेणस्वाद्वम्लंरुचिप्रदं पवित्रंदीपनंस्निग्धंश्लेष्मलंवातपित्तनुत स्वा
दुपाकमभिष्यन्दिवृष्यंगुर्वस्त्ररूक्षकं उक्तंदध्नामशेषाणांमध्येगव्यंगुणाधिकं अथछागी ग॰खं॰४
दधि आजंदध्युत्तमंग्राहिलघुदोषत्रयापहं शस्यतेश्वासकासार्शःक्षयकार्श्येषुदीपनं
अथ पक्वदुग्धदधिगुणाः पक्वदुग्धभवंरुच्यंदधिस्निग्धंगुणोत्तमं पित्तानिलापहंसर्वधा
त्वग्निबलवर्द्धनं अथनिःसारदुग्धदधिगुणाः असारंदधिसंग्राहीशीतलंवातलंलघु विष्टंभिदी
पनंरुच्यंमधुरंनातिपित्तलं अथशर्करादिसहितदधिगुणाः सशर्करंदधिश्रेष्ठंतृष्णापित्ता
स्रदाहनुत् सगुडंवातनुद्वृष्यंबृंहणंतर्पणंगुरु अथरात्रौदधिसेवनेविशेषः नक्तंदधिभुं
जीतनचाप्यघृतशर्करम् नामुद्गसूपंनाक्षौद्रंनोष्णंनामलकैर्विना अथयमर्थः रात्रौदधिनभुं

जीत भुंजीतंचेत्तदा अघृतशार्करममुद्गयूषमक्षौद्रमुष्णंविनामलकंचदधिनभुंजीततेनघृत
शार्करादियुक्तंदधिरात्रावपिभुंजीतेत्यर्थः तथाच शस्यतेदधिनोरात्रौशस्तंचांबुघृतान्वितं
रक्तपित्तकफोत्थेषुविकारेषुत्वहितंन तदस्तुघृतान्वितमपि अथऋतुविशेषेणविधिनिषे त्रै
धौ हेमंतेशिशिरेचापिवर्षासुदधिशस्यते शरद्ग्रीष्मवसंतेषुप्रायस्तद्दधिगर्हितं अविधि
नादधिसेवनेदोषमाह ज्वरासृक्पित्तवीसर्पकुष्ठपांड्वामयभ्रमान् प्राप्नुयात्कामलांचोग्रांवि
धिंहित्वादधिप्रियः अथसरस्यमस्तुनश्चलक्षणंगुणाश्च दध्नस्तूपरिगोभागोघनःस्नेह
समन्वितः सलोकेसरइत्युक्तोदध्नोमंडस्तुमस्त्विति सरःस्वादुर्गुरुर्वृष्योवातवन्हिप्रण
शनः सोम्लोबस्तिप्रधमनःपित्तश्लेष्मविवर्द्धनः मस्तुक्लमहरंबल्यंलघुभक्ताभिलाषकृत
स्रोतोविशोधनंह्लादिकफतृष्णानिलापहं अवृष्यंप्रीणनंशीघ्रंभिनत्तिमलसंग्रहं
इतिश्रीभावप्रकाशेदधिवर्गः अथतक्रवर्गः तत्रतक्रस्यनिरुक्तिर्नामानि गुणाश्च घोलं

भा॰प्र॰

१८५

तुमथितंतक्रमुदश्विच्छच्छिकापिच ससरंनिर्जलंघोलंमथितंत्वसरोदकं तक्रंपादजलंप्रोक्त
मुदश्विस्त्वर्धवारिकं छच्छिकासरहीनंस्यात्स्वच्छाप्रचुरवारिका घोलंशर्करारहितंरसालावत्
मथितंमठ्ठाइतिलोके छच्छिकाछाछइतिलोके वातपित्तहरंघोलंमथितंकफपित्तनुत्
तक्रंत्याहिकषायाम्लंस्वादुपाकरसंलघु वीर्योष्णंदीपनंवृष्यंप्रीणनंवातनाशनम् ग्रहण्या
दिमतांपथ्यंभवेतसंग्राहिलाघवात् किंचित्स्वादुविपाकित्वान्नचपित्तप्रकोपनं कषायोष्ण
विकाषित्वाद्रौक्ष्याच्चापिकफापहं नतक्रसेवीव्यथतेकदाचिन्नतक्रदग्धाःप्रभवंतिरोगाः य
थासुराणाममृतंसुखायतथानराणांभुवितक्रमाहुः उदश्वित्कफकृद्बल्यंश्रमघ्नंपरमंमतं छ
च्छिकाशीतलालघ्वीपित्तश्रमतृषाहरी वातनुत्कफकृत्सातुदीपनीलवणान्विता अथोद्धृ
तघृतस्तोकोकृतघृतानुद्धृतघृतानांतक्राणांगुणाः समुद्धृतघृतंतक्रंपथ्यंलघुविशेषतः स्तो
कोद्धृतघृतंतस्माद्गुरुवृष्यंकफापहं अनुद्धृतघृतंसांद्रंगुरुपुष्टिककफप्रदं अथदोषविशेषेया १८५

षिविशेषेचतक्रविशेषः वातेम्लंशस्यतेतक्रंशुंठीसैन्धवसंयुतं पित्तेस्वादुसितायुक्तंव्योषक्षारयु
तंकफे हिंगुजीरयुतंघोलंसैन्धवेनसुसंयुतं भवेदतीववातघ्नमर्शोतीसारहृत्परं सुरुच्यंपुष्टिदं
वल्यंवस्तिशूलविनाशनं मूत्रकृच्छ्रेतुसगुडंपांडुरोगेसचित्रकं अथामपक्कतक्रगुणाः तक्रमामं
कफंकोष्ठेहंतिकंठेकरोतिच पीनसश्वासकासादोपक्कमेवप्रयुज्यते अथतक्रसेवनान्निहिता
नि शीतकालेग्निमांद्येचतथावातामयेषुच अरुचौस्रोतसांरोधेतक्रंस्यादमृतोपमं तच्चहंतिगर
छर्दिप्रसेकविषमज्वरान् पांडुमेदोग्रहण्यर्शोमूत्रग्रहभगंदरान् मेहंगुल्ममतीसारंशूलप्लीहो
दरारुचीः श्वित्रकोष्ठकृतव्याधीन्कुष्ठशोफतृषाकृमीन् अथतक्रनिषेधं नैवतक्रंक्षतेदद्या
न्नोष्णकालेनदुर्वले नमूर्छाभ्रमदाहेषुनरोगेरक्तपित्तके अथमथ्यादीनांतक्राणांविशिष्टगु
णाः यान्युक्तानिदधीन्पंचतद्गुणंतक्रमादिशेत इतिश्रीभावप्रकाशेतक्रवर्गः अथनवनी
तवर्गः तत्रादौगव्यस्यनवनीतस्यगुणाः नवनीतंहितंगव्यंवृष्यंवर्णवलाग्निकृत संग्राहिवा

भा॰ प्र॰ तपित्तास्रक्षयोऽर्शोऽर्दितकासहृत् तद्धितं बालके वृद्धे विशेषादमृतं शिशोः अथ माहिषस्य गुणाः
नवनीतं हितं ग्राह्यं वृष्यं वर्णबलाग्निकृत् संग्राहि वातपित्तास्रक्षयोऽर्शोऽर्दितकासहृत् तद्धितं बाल
१८६ केवृद्धे विशेषादमृतं शिशोः अथ माहिषस्य गुणाः नवनीतं माहिष्यास्तु वातश्लेष्मकरं गुरु दाह
पित्तश्रमहरं मेदःशुक्रविवर्द्धनं अथ पयसो नवनीतस्य गुणाः दुग्धोत्थं नवनीतं च चक्षुष्यं रक्त
पित्तनुत् वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलं अथ सद्यःसमुद्धृतनवनीतस्य गुणाः नवनी
तं तु सद्यस्कं स्वादु ग्राहि हिमं लघु मेध्यं किंचित्कषायाम्लमीषत्तक्रांशसंक्रमात् अथ चिरंतन
नवनीतस्य गुणाः सक्षारकटुकाम्लत्वाच्छर्द्यर्शःकुष्ठकारकं श्लेष्मलं गुरु मेदस्यं नवनीतं चिरं मेदस्यं प्रति ते ४
तनम् इति श्रीभावप्रकाशे नवनीतवर्गः अथ घृतवर्गः तत्र घृतस्य नामानि गुणाश्च घृतमाज्यं
हविः सर्पिः कथ्यंते तद्गुणा अथ घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनं शीतवीर्यं विषालक्ष्मीक
फपित्तानिलापहं अल्पाभिष्यंदि लावण्यकांत्योजस्तेजवृद्धिकृत् स्वरस्मृतिकरं मेध्यमायुष्यं व

लघुगुरु उदावर्त्तज्वरोन्मादशूलानाहव्रणान्हरेत् स्निग्धंकफकरंरक्षः क्षयवीसर्परक्तनुत्
अथगव्यघृतस्यगुणाः गव्यंघृतंविशेषेणचक्षुष्यंवृष्यमग्निकृत् स्वादुपाकरसंशीतंवातपि
त्तकफापहं मेधालावण्यकांत्योजस्तेजोवृद्धिकरंपरं अलक्ष्मीपापरक्षोघ्नंवयसःस्थापकंगु
रु वल्यंपवित्रमायुष्यंसुमंगल्यंरसायनं सुगंधंरोचनंचारुसर्वाज्येषुगुणाधिकं अथमाहिष
स्यगुणाः माहिष्यंस्यात्घृतंस्वादुपित्तरक्तानिलापहं शीतलंश्लेष्मलंवल्यंगुरुस्वादुविपच्य
ते अथछागस्य आजामाज्यंकरोत्यग्निंचक्षुष्यंवलवर्द्धनं कासेश्वासेक्षयेचापिहितंपाकेभ
वेत्कटुः अथदुग्धघृतगुणाः घृतंदुग्धभवंग्राहिशीतलंनेत्ररोगहृत् निहंतिपित्तदाहास्र
मदमूर्छाभ्रमानिलान् अथहस्तनदधिजघृतगुणाः हविर्ह्यस्तनदुग्धोत्थंतत्स्याद्धैयंगवी
नकं हैयंगवीनंचक्षुष्यंदीपनंरुचिकृत्परं वलकृद्बृंहणंवृष्यंविशेषाज्ज्वरनाशनं अथ
पुराणघृतगुणाः वर्षादूर्द्ध्वंभवेदाज्यंपुराणंतत्त्रिदोषनुत् मूर्छाकुष्टविषोन्मादापस्मारति

भा·प्र·

मिरापहं यथायथाखिलंसर्प्पिःपुराणमधिकंभवेत् तथातथागुणैःस्वैःस्वैरधिकंतदुदाहृतं अ
पनूतनस्यघृतस्यविषयाः योजयेन्नवमेवाज्यंभोजनेतर्पणेश्रमे वलक्षयेपांडुरोगेकामलानेत्र
१८७ रोगयोः अथघृतप्रयोगस्यविषयाः राजयक्ष्मणिवालेचवृद्धेश्लेष्मकृतेगदे रोगेसामेविसूच्यां
चविवंधेचमहात्यये ज्वरेचदहनेमन्देनसर्पिर्वहुमन्यते इतिश्रीभावप्रकाशेघृतवर्गः अथ
मूत्रवर्गः गोमूत्रंकटुतीक्ष्णोष्णंक्षारंतिक्तंकषायकं लघ्वग्निदीपनंमेध्यंपित्तकृत्क मेध्यमिति धिः २
फवातनुत् शूलगुल्मोदरानाहकंडूक्षिमुखरोगजित् किलासगदवातामवस्तिरुक्कुष्ठना
शनं कासश्वासापहंशोथकामलापांडुरोगहृत् कंडूकिलासगदशूलमुखाक्षिरोगान्गुल्मा
तिसारमरुदामयमूत्ररोधान् कासंसकुष्ठजठरक्रिमिपांडुरोगान्गोमूत्रमेकमपिपीतम
पाकरोति सर्वेष्वपिचमूत्रेषुगोमूत्रंगुणतोधिकं अतोविशेषात्कथनेमूत्रंगोमूत्रमुच्यते प्लीहो
दरश्वासकासशोथवर्चोग्रहापहं शूलगुल्मरुजानाहकामलापांडुरोगनुत् कषायंतिक्तती १८७

६

ह्णांच पूरणात्कर्णशूलनुत अथमानुषमूत्रगुणाः नरमूत्रंगरंहंतिसेवितंतद्रसायनं रक्तपा
माहरंतीक्ष्णंसक्षारलवणंस्मृतं गोऽजाविमहिषीणांतुस्त्रीणांमूत्रंप्रशस्यते खरोष्ट्रेभनराश्वा
नांपुंसांमूत्रंहितंमतं इतिश्रीभावप्रकाशेमूत्रवर्गः अथतैलवर्गः तत्रतैलस्यस्वरूपनिरूप
णम् तिलादिस्निग्धवस्तूनांस्नेहस्तैलमुदाहृतं तत्तुवातहरंसर्वंविशेषात्तिलसंभवं अथ
तैलगुणाः तिलतैलंगुरुस्थैर्यबलवर्णकरंसरं वृष्यंविकाषिविशदंमधुरंरसपाकयोः
सूक्ष्मंकषायानुरसंतिक्तंवातकफापहं वीर्योष्णंचहिमंस्पर्शेबृंहणंरक्तपित्तकृत् लेख
नंबद्धविण्मूत्रंगर्भाशयशोधनं दीपनंबुद्धिदंमेध्यंव्यवायिव्रणमेहनुत श्रोत्रयोनिशि
रःशूलनाशनंलघुताकरं त्वच्यंकेश्यंचचक्षुष्यमभ्यंगेभोजनेऽन्यथा छिन्नभिन्नच्युतोत्पि
ष्टमथितक्षतपिच्चिते भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते तथाभिहतनिर्भुग्नमृगव्या
घ्रादिविद्धते वस्तौपानेचसंस्कारेनस्येकर्णाक्षिपूरणे सेकाभ्यंगावगाहेषुतिलतैलंप्रश

स्यते ननु बृंहणलेखनयोः कथं समानाधिकरण्यमित्याह रूक्षादिदुष्टः पवनः स्रोतःसंकोच
येद्यदा रसोऽसम्यग्वहन्कार्श्यं कुर्यात्स्फिक्काद्यवर्द्धयन् तेषु प्रवेष्टसरतासोऽप्यस्निग्धत्वमा।
दृढं तैलं त्वमं रसं नेतुं कृशानां तेन बृंहणं व्यवायिसूक्ष्मतीक्ष्णोष्णसरसत्वैर्मेदसः क्षयं शनैः
प्रकुरुते तैलं तेन लेखनमीरितं बद्धं पुरीषं बध्नाति स्खलितं तत्प्रवर्त्तयेत् ग्राहकं सारकं।
चापि तेन तैलमुदीरितं घृतमष्टात्यरं पक्वं हीनवीर्यं प्रजायते तैलं पक्वमपक्वं वा चिरस्था
यि गुणाधिकं अथ सर्षपतैलगुणाः दीपनं सार्षपं तैलं कटुपाकरसं लघु लेखनं।
स्पर्शवीर्योष्णं तीक्ष्णं पित्तास्रदूषणं कफमेदोनिलार्शोघ्नं शिरःकर्णामयापहं कंडूको
ठकृमिश्वित्रकुष्ठदुष्टव्रणप्रणुत् तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रहृत् राजिकयोः
कृष्णराई आस्कराई अथ तोरीलाहीइतिख्यातितैलगुणाः तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि
कफास्रजित् वह्निकृद्विषहृत्कण्डूकुष्ठकोष्ठकृमिप्रणुत् मेदोदोषापहं चापि व्रणशोथ।

हरंपरं अथातसीतैलगुणाः अतसीतैलमाग्नेयंस्निग्धोष्णंकफपित्तकृत् कटुपाकमचक्षु
ष्यंबल्यंवातहरंगुरु मलकृद्रसतःस्वादुग्राहित्वग्दोषहृद्घनं वस्तौपानेतथाभ्यंगेनस्येक।
र्णस्यपूरणे अनुपानविधौचापिप्रयोज्यंवातशांतये अथवौरैतैलगुणाः कुसुंभतैलमु।
ष्णंस्यादुष्णंगुरुविदाहिच चक्षुष्यमहितंबल्यंरक्तपित्तकफप्रदं अथखाखसबीजतै।
लं तैलंतुखसबीजानांबल्यंवृष्यंगुरुस्मृतं वातहृत्कफहृच्छीतंस्वादुपाकरसंचतत्
अथैरंडतैलं एरंडतैलंतीक्ष्णोष्णंदीपनंपिच्छिलंगुरु वृष्यंत्वच्यंवयस्थापिमेधाकांति।
बलप्रदं कषायानुरसंसूक्ष्मंयोनिशुक्रविशोधनं विस्रंस्वादुरसेपाकेसतिक्तंकटुकंस
रं विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलहृत् हंतिवातोदरानाहगुल्माष्ठीलाकटीग्रहान् वात
शोणितविड्बंधब्रध्नशोथामविद्रधीन् आमवातगजेंद्रस्यशरीरवनचारिणः एकएवाभि
हंतायमेरंडस्नेहकेशरी अथरालतैलं तैलंसर्जरसोद्भूतंविस्फोटव्रणनाशनं कुष्टपा।

स्थापितं २

भा॰प्र॰ माकृमिहरंवातश्लेष्मामयापहं अथसर्वतैलगुणाः तैलंस्वयोनिगुण कृद्वाभटेनाखिलंमतं

अतःशेषस्यतैलस्यगुणाज्ञेयाःस्वयोनिवत् इतिभावप्रकाशेतैलवर्गः अथसंधानवर्गः

१८९ तत्रकांजिकस्यनामानिगुणाश्च संहितंधान्यमंडादिकांजिकंकथ्यतेबुधैः कांजिकंभेदिती

क्ष्णोष्णंरोचनंपाचनंलघु दाहज्वरहरंस्पर्शात्पानाद्वातकफापहं माषादिवटकैर्यत्तुक्रियते

तद्गुणाधिकं लघुवातहरंतत्तुरोचनंपाचनंपरं शूलाजीर्णविबंधामनाशनंबस्तिशोधनं

अथतुषोदकस्यलक्षणंगुणाश्च तुषोदकंयवैरामैःसतुषैःसकलीकृतैः यवैःउदकेसं

हितैःसंधानवर्गोक्तत्वात् तुषांबुदीपनंहृद्यंपांडुकृमिगदापहं तीक्ष्णोष्णंपाचनंपित्तरक्त

कृद्बस्तिशोधनं अथसौवीरस्यलक्षणंगुणाश्च सौवीरंतुयवैरामैःपक्वैर्वानिस्तुषीकृतैःगो

धूमैरपिसौवीरमाचार्याःकेचिदूचिरे सौवीरंतुग्रहण्यर्शःकफघ्नंभेदिदीपनं उदावर्त्ता

मर्मेदोस्थिशूलानाहेषुशस्यते अथारनालस्यलक्षणंगुणाश्च आरनालंतुगोधूमैरामैः १८९

मूरीके पत्रका१९४

स्यान्निस्तुषीकृतैः पक्वैर्वासंहितैस्तुसौवीरसदृशंगुणैः अथधान्याम्लस्यलक्षणंगुणाश्च
धान्याम्लंशालिचूर्णश्चकोद्रवादिकृतंभवेत् धान्याम्लंधान्ययोनित्वात्प्रीणनंलघुदीपनंअ
रुचौवातरोगेषुसर्वेष्वास्थापनेहितं अथशिंडक्यालक्षणंगुणाश्च शिंडाकीराजिकायुक्तैः
स्यान्मूलकैर्दलकैश्चैः सर्षपस्वरसैर्वापिशालिपिष्टकसंयुतैः संहितैरितिनिर्दोषः शिंडाकी
रोचनीगुर्वीपित्तश्लेष्मकरीस्मृता अथचुक्रस्यलक्षणंगुणाश्च कंदमूलफलादीनिस
स्नेहलवणानिच यत्रद्रवेऽभिषूयंते तच्चुक्रमभिधीयते चुक्रंकफघ्नंतीक्ष्णोष्णंरोचनं
पाचनंलघु पाण्डुकृमिहरंरूक्षंभेदनंरक्तपित्तकृत् अथसंधानस्यलक्षणंगुणाश्च कंदमू
लफलाद्यंयत्तच्चविज्ञेयमासुतम् तद्रुच्यंपाचनंवातहरंलघुविशेषतः पा ण्डुकृमिहरंरूक्षं
भेदनंरक्तपित्तकृत् अथमद्यस्यनामानिलक्षणंगुणाश्च मद्यंतुसीधुमैरेयमिराचमदिरासु
रा कादंबरीवारुणीचहालापिचहलिप्रिया पेयंयन्मादकंलोकेतन्मद्यमभिधीयतेयथा

भा॰प्र॰ रिष्टंसुरासीधुरासवाद्यमनेकधा मद्यंसर्वंभवेदुष्णंपित्तकृद्वातनाशनं भेदनंशीघ्रपाकंचरूक्षंक
फहरंपरं अम्लंचदीपनंरुच्यंपाचनंचाशुकारिच तीक्ष्णंसूक्ष्मंचविशदंव्यवायिचविकाशिच
१८० अथारिष्टस्यलक्षणंगुणाश्च पक्वौषधांबुसिद्धंयन्मद्यंतत्स्यादरिष्टकं अरिष्टमद्यमितिलोके
यथाद्राक्षारिष्टंदशमूलारिष्टंबबूलारिष्टंच अरिष्टंलघुपाकेनसर्वतश्चगुणाधिकं अरिष्टस्य
गुणाज्ञेयाबीजद्रव्यगुणैःसमाः अथसुरायालक्षणंगुणाश्च शालिषष्टिकपिष्टादिकृतंमद्यंसुरा
मता सुरागुर्वीबलस्तन्यपुष्टिमेदःकफप्रदा ग्राहिणीशोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत
अथसुराभेदोवारुणीतस्यालक्षणं पुनर्नवाशालिपिष्टैर्विहितावारुणीस्मृता संहितैस्ताल
खर्जूररसैर्यासापिवारुणी सुरावद्वारुणीलघ्वीपीनसाध्मानशूलनुत सुरावन्मेदार्थलघ्वी
ति अथसीधुद्वयस्यलक्षणं द्रव्यैःपक्वैरसैःसिद्धःसीधुःपक्वरसश्चसः आमैस्तैरेवयःसी
धुःसचशीतरसःस्मृतःशीधुःपक्वरसःश्रेष्ठःस्वराग्निबलवर्णकृत वातपित्तकरोहृद्यःस्नेहनो १८०

ईक्षो २

रोचनो हरेत् विबंधमेदःशोफार्शःशोफोदर कफामयान् तस्मादल्पगुणःशीतरसःसंलेख
नःस्मृतः अथासवस्य लक्षणं गुणाश्च यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः यथा लोहा
सवादिः आसवस्य गुणा ज्ञेया वीजद्रव्यगुणैःसमाः अथ नवपुरानमद्यं मद्यं नवमभिष्यं
दि त्रिदोषजनकं सरं अहृद्यं बृंहणं दाहि दुर्गंधं विशदं गुरु जीर्णं तदेव रोचिष्णु कृमिश्लेष्मानि
लापहं हृद्यं सुगंधिगुणवल्लघु स्रोतोविशोधनं अथ सात्विकादिमद्यंपिवतां चेष्टाविशेषाः
सात्विके गीतहास्यादि राजसे साहसादिकं तामसे निंद्यकर्माणि निद्रां च मदिरा चरेत् आच
रेत् कुर्यात् विधिना मात्रया काले हितैरन्नैर्यथाबलं प्रहृष्टो यःपिवेन्मद्यं तस्य स्यादमृतोपमं
किंतु मद्यं स्वभावेन यथैवान्नं तथा स्मृतं अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतं अथ मद्यगं
धनाशनोपायः मुस्तैलवालुगदजीरकधान्यकैलायश्चूर्वयन्सदसि वाचवमभिमनक्ति स्वामा
विकं मुखजमुज्झति प्रतिगंधं गंधवमद्यलसुनादिभवं च नूनं इति श्रीभावप्रकाशे संधानवर्गः

भा॰प्र॰ अथ मधुवर्गः तत्र मधुनो नामानि गुणाश्च मधु माक्षिकमाध्वीकक्षौद्रसारघमीरितं मक्षिकाव
रटीभृंगवांतपुष्परसोद्भवं मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनं चक्षुष्यं दीपनं स्वर्यं व्र॰ण
१८१ शोधनरोपणं सौकुमार्यकरं सूक्ष्मं परं स्रोतोविशोधनं कषायानुरसं ह्लादि प्रसादजननं परं
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं हरेत् कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् मेदस्तृष्णा
वमिश्वासहिक्कातीसारविड्ग्रहान् दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलं अथ मधुभेदाः माक्षिकं
भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः अथ माक्षिकलक्ष
णं माक्षिकाः पिंगवर्णास्तु महत्यो मधुमक्षिकाः ताभिः कृतं तैलवर्णं माक्षिकं परिकीर्तितं मा
क्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु कामलार्शःक्षतश्वासकासक्षयविनाशनं अथ भ्रामरं कि
ञ्चित्सूक्ष्मैः प्रसिद्धेभ्यः षट्पदेभ्यो विनिर्मितं निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतं भ्रामरं
कैरार रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु स्वादुपाकमभिष्यंदि विशेषात्पिच्छिलं हिमं अथ क्षौद्रं माक्षिकाः

सु५ऊम५१ १८१

कपिलाःसूक्ष्माःक्षुद्राख्यास्तत्कृतंमधु मुनिभिःक्षौद्रमित्युक्तंतद्वर्णात्कपिलंभवेत् गुणैःमाक्षि
कवत्क्षौद्रंविशेषान्मेहनाशनं अथपौत्तिकं यःकृष्णामशकोपमालघुतराःप्रायोमहापिंडिकां
वृक्षानास्तरुकोटरांतरगताःपुष्पासवंकुर्वते तास्तज्ज्ञैरिहपूत्तिकानिगदिताताभिःकृतंसर्पिषा
तुल्यंपन्मधुतद्धनेचरजनैःसंकीर्त्तितंपौत्तिकं पौत्तिकंमधुरूक्षोष्णंपित्तदाहास्रवातकृत् वि
दाहिमेहकृच्छ्रघ्नंग्रंथ्यादिक्षतशोषिषु अथछात्रं वरटाःकपिलाःपीताःप्रायोहिमवतोव
ने कुर्वंतिछत्रकाकारंतज्जंछात्रंमधुस्मृतं छात्रंकपिलपीतंस्यात्पिच्छिलंशीतलंगुरु स्वादु
पाकंकृमिश्वित्ररक्तपित्तप्रमेहजित् भ्रमतृण्मोहविषहृत्तर्पणंचगुणाधिकं अथार्घ्यं म
धूकवृक्षान्निर्यासंपरत्कास्त्र्यांतश्रमेज्जवा स्रवत्यार्घ्यंतदाख्यातंश्वेतकंमाल्ववेपुनः तीक्ष्ण
तुंडास्तुयापीतामाक्षिकाषट्पदोपमाः अर्घ्यास्तास्तत्कृतंयत्तदार्घ्यमित्यपरेजगुः आर्घ्यम
क्ष्यतिचक्षुष्यंकफपित्तहरंपरं कषायंकटुकंपाकेतिक्तंचबलपुष्टिकृत् अथऔद्दालं

प्रायोवल्मीकमध्यस्थाःकपिलाःस्वल्पकीटिकाः कुर्वंतिकपिलंस्वल्पंतत्स्यादौद्दालकंमधु
औद्दालकंरुचिकरंस्वर्यंकुष्ठविषापहं कषायमुष्णमम्लंचकटुपाकंचपित्तकृत् अथदालं यं
श्रुत्यपतितंपुष्पाद्यत्रयत्रोपरिस्थितं मधुराम्लंकषायंचतद्दालंमधुकीर्तितं दालंमधुलघुप्रोक्तंदी
पनीयंकफापहं कषायानुरसंरूक्षंरुच्यंछर्दिप्रमेहजित् अधिकंमधुरंस्निग्धंबृंहणंगुरुसा
रकं लघुपाकेगुरुसारिकंतुलितं अथनवपुराणमधुगुणाः नवंमधुभवेत्पुष्ट्यैनातिश्लेष्महरंस
रं पुराणंग्राहकंरूक्षंमेदोघ्नमतिलेखनं मधुनःशार्करायाश्चगुडस्यापिविशेषतः एकसंवत्स
रेऽतीतेपुराणत्वंस्मृतंबुधैः अथमधुनःशीतस्यगुणाधिक्यमुष्णतायांनिषेधः विषपुष्पादपिरसं
विषाभ्रमरादयः गृहीत्वामधुकुर्वंतितच्छीतंगुणवन्मधु विषान्वयात्तदुष्णंवुक्ष्येणोष्णेनवासह उ
ष्णार्त्तस्योष्णकालेचस्मृतंविषसमंमधु अथमयनं मयनंतुमधूच्छिष्टंमधुशेषंचशिक्थकंमध्वा
धारोमदनकंमधूषितमपिस्मृतं मदनंमृदुसुस्निग्धंभूतघ्नंव्रणरोपणं भग्नसंधानकृद्वातकु

कार्गा३१४

ह्वी सर्पस्कजित इति श्रीभावप्रकाशे मधुवर्गः अथेक्षुवर्गः इक्षोर्नामानि गुणाश्च इक्षुर्दीर्घ
च्छदः प्रोक्तस्तथा भूरिरसोपि च गुडमूलोसिपत्रश्च तथा मधुतृणः स्मृतः इक्षवो रक्तपित्तघ्ना ब
ल्या वृष्याः कफप्रदाः स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः अथेक्षुभेदाः पौंड्रकोभी
रुकश्चापि वंशकः शतपोरकः कांतारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः नैपालो दीर्घपत्रश्च
नीलपोरोथ कोशकृत इत्येता जातयस्तेषां कथयामि गुणानपि अथस्वेतपौंड्राभीरुकगुणाः
वातपित्तप्रशमनो मधुरो रसपाकयोः सुशीतो बृंहणो बल्यः पौंड्रको भीरुकस्तथा अथकस्त्रि
कुशिश्चारगुणाः कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः अथकांतारेक्षुगुणाः कांतारेक्षु
र्गुरुर्वृष्यः श्लेष्मणो बृंहणः सरः अथवंशेक्षुगुणाः दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः
अथशतपोरगुणाः शतपर्वा भवेत्किंचित्कोशकारगुणान्वितः विशेषात्किंचिदुष्णश्च सक्षा
रः पवनापहः अथमनकोगुणाः मनोगुप्ताचापहरीतल्लामयविनाशिनी सुशीता मधुरा

तीव्ररक्तपित्तप्रणाशिनी अथबालयुवद्धानांगुणाः बालइक्षुःकफंकुर्य्यान्मेदोमेहकरश्च
सः युवातुवातहृत्स्वादुरीषत्तीक्ष्णश्चपित्तनुत् रक्तपित्तहरोवृद्धःक्षतहृद्बलवीर्यकृत् अथाङ्ग
भेदेनभेदाः मूलेतुमधुरोत्यर्थंमध्येपिमधुरःस्मृतः अग्रेग्रंथिषुचज्ञेयःइक्षुःपटुरसोजनैः अथ
दंतपीडितेक्षुरसस्यगुणाः दंतनिःपीडितस्येक्षोरसःपित्तास्रनाशनः शार्करासमवीर्यःस्या
दविदाहीकफप्रदः अथयंत्रनिःपीडितेक्षुरसस्यगुणाः मूलाग्रजंतुजग्धादिपीडनान्मलसं
करात् किंचित्कालंविधृत्याचविक्रियांयातियांत्रिकः तस्माद्विदाहीविष्टंभीगुरुःस्याद्यांत्रि
कोरसः अथपर्युषितस्येक्षुरसस्यगुणाः रसःपर्युषितोनेष्टोह्यम्लोवातापहोगुरुः कफ
पित्तकरःशोषीभेदनश्चातिमूत्रलः अथपक्वस्येक्षुरसस्यगुणाः पक्वोरसोगुरुःस्निग्धः
सुतीक्ष्णःकफवातनुत् गुल्मानाहप्रशमनःकिंचित्पित्तहरःस्मृतः अथेक्षुरसस्यविका
राणांगुणाः इक्षोर्विकारास्तृड्दाहमूर्छापित्तास्रनाशनाः गुरवोमधुराबल्याःस्निग्धावात

हराः सराः तृष्णामोहहराः शीता बृंहणा विषहारिणः अथ फाणितटरकारावच्छो आइति लोके त
स्य लक्षणं गुणाश्च इक्षोरसस्तु यः पक्वः किंचिद्गाढो बहुद्रवः स एवेक्षुविकारेषु ख्यातः फाणित
संज्ञया फाणितं गुर्वभिष्यंदि बृंहणं कफशुक्रकृत वातपित्तश्रमान्हंति मूत्रवस्तिविशोधनं
अथ मत्स्यंडीरावकच्चखंड इति लोके इक्षो रसोयः संपक्वो घनः किंचिद्द्रवान्वितः मंदं यत्स्यंदते
तस्मान्मत्स्यंडीति निगद्यते मत्स्यंडी भेदिनी बल्या सद्यः पित्तानिलापहा मधुरा बृंहणी वृष्या रक्त
दोषापहा स्मृता अथ गुडस्य लक्षणं गुणाश्च इक्षोरसोयः संपक्वो जायते लोष्टवत् दृढः स गुडो
गौडदेशे तु मत्स्यंडेव गुडो मतः गुडो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः नातिपित्तहरो मेदः
कफ कृमिबलप्रदः अथ पुराणगुडस्य गुणाः गुडो जीर्णो लघुः पथ्योऽनभिष्यंदि पुष्टिकृत ५२
पित्तघ्नो मधुरो वृष्यो वातघ्नोऽसृक्प्रसादनः अथ नवीनगुडगुणाः गुडो नवः कफश्वासकास
कृमिकरोऽग्निकृत श्लेष्माणामाशु विनिहंति सदार्द्रकेन पित्तं निहंति च तदेव हरीतकीभिः शुं

ष्वासमंहरतिवातमशेषमित्थंदोषत्रयक्षयकरःपरमोगुडोयं अथखंडगुणाः खंडंसुमधुरंच
ष्यंचक्षुष्यंबृंहणंहिमं वातपित्तहरंस्निग्धंबल्यंवांतिहरंपरं खंडमितिप्रसिद्धं अथसिताविनीते
लोकेतस्यलक्षणंगुणाश्च खंडंतुसिकतारूपंसुश्वेतंशर्करासिता सितासुमधुरारुच्यावातपि
त्तास्रदाहहृत मूर्च्छाछर्दिज्वरान्हंतिसुशीताशुक्रकारिणी अथगुडशर्करामिश्रीतयोर्गु
णाः भवेत्पुष्पसिताशीतारक्तपित्तहरीलघुः छर्द्यतीसाररक्तदाहरक्तहृत्तुवरीहिमा यथाय
थैषांनैर्मल्यंमधुरत्वंतथातथा स्नेहलाघवशैत्यानिसरत्वंचतथातथा इतिश्रीभावप्रका
शेइक्षुवर्गःसमाप्तोऽयंपंचदशवर्गः अथानेकार्थनामवर्गः तत्रद्व्यर्थानिनामानियथा अ
म्लांतकः अम्लोणिकाकोविदारश्च कुलकः पटोलःकुपीलुश्चकुपीलुःकुचिलाइति
लोके कोशातकी महाकोशातकीराजकोशातकीच दीप्यकः यवान्यजमोदाच फणि
ज्झकः मरुवकःपिंडीतकश्च मरुवकःमरुआइतिलोके पिंडीतकःमयनफरइतिलोके

कुरतरी जलतिम १

मधूलिका मूर्वाजलपर्णीच स्तवकं सौवर्चलंबीजपूरकंच लोणिका लोणीशाकंचांगे-
रीशाकंच वसुकः रक्तार्कः क्षारलवणश्च (खारी) बाल्हीकं कुंकुमं हिंगुच वितुन्नकं धान्यकं
कपाई३ तुंबुंच स्वादुकंटकः गोक्षुरोविकंकतश्च अग्निमुखी भल्लातकीलांगलीच अग्निशि-
खं कुंकुमं कुसुंभश्च अजशृंगी मेषशृंगी कर्कटशृंगीच प्रियंगुः फलिनी कंगुश्च भंगा काकुनि४
भृंगराजस्त्वक् (तेज) समंगा मंजिष्ठालज्जालुश्च अमोघा विडंगंपाटलाच मोचा कदलीशा-
ल्मलिश्च कुरंटकः श्योनाकः केवर्ती मुस्तंच कुनटी धनिकामनःशिलाच घोराया २
गोवदरीच त्रिपुटा तरस्तश्चैलाच भार्गी कस्तूरिगंधपालाशीच दंतशठः जंबीरःक-
पित्थश्च दंतशठा आम्लिकाचांगेरीच अरुणामंजिष्ठाअतिविषाच कणा पिप्पली।
जीरकंच तालपर्णी मुशलीभुराच पीलुपर्णी मूर्वाबिंबीच ब्रा ह्मणी शांर्गिष्टकाच
अपराजिता विष्णुक्रांताताम्रपर्णीच आस्फोता अपराजिताशारिवाच पारावतपदी

कर्कुंदति १ क्षिक्रकोति १

दूपी ४ सुरम्रा २

भा·प्र· ज्योतिष्मतीकाकजंघाच शारदी शारिवाजलपिप्पलीच उग्रगंधा वचाजवानीच परिव्या
१८५ धः कर्णिकारेजलवेतसश्च अंजनं स्रोतोंजनंसौवीरंच अग्निश्चित्रकंकुंदतिभल्लातक
श्च कृमिघ्नः विडंगोहरिद्राच तेजनः शरोवेणुश्च तेजनी तेजवतीमूर्वाच रोचनः कंपि
ल्पः रोचनाचगोरोचना राजादनं क्षीरिकाप्रियालुश्च शकुलादनी कटुकाजलपिप्पली
मुलाच ५ च गोलोमी श्वेतदूर्वावचाच पद्मा पद्मचारिणीभार्गीच श्यामा सारिवाप्रियंगुश्च धान्यं
धान्यकंशाल्यादिच सहस्रवीर्य्या नीलदूर्वामहाशतावरीच सेव्यं उशीरंलामज्जकंच उदुं
वरं जंतुफलंताम्रंच ऐंद्री इंद्रवारुणीइंद्राणीच कटंभरा कटुकाशोनाकंच क्षारः जव(
क्षारः स्वर्जिकाच गंडीरः शाकविशेषोगंडिनीदेवगांधारीत्विचलोके गंधिनीमंजिष्ठा गंधारी देवगांधार ३
जवाक्षार २ उत्पलगंधयलाशीच चित्रा इंद्रवारुणीद्रदंतीच वृंडिकेरी कर्प्पासीविंवीच धारा गु
डूचीक्षीरकाकोलीच वालपत्रः खदिरोयवासश्च वारि वालकंमुदकंच स्हामूर्वामांसरो

पपैया २ नेत्रवाला १

कलौंजी

ह्लीव अंगारवल्ली भार्गीगुंजाच अमृणालं उशीरंलामज्जकश्च कुंडलिनी गुडूचीकोवि॰ कचनार ११
दारश्च गंधफली प्रियंगुश्चंपककलेकाच दीर्घमूलं यवासः शालपर्णीच पिच्छिला शाल्म
शिरसई ३ लिः शिंशिपाच पुष्पफलः कपित्थः कूष्मांडश्च पोटगलः नलः कासश्च यवफलः कुट
सहदेवी ४ जोवंशश्च देवी मूर्वास्पृक्काच विश्वा शुंठ्यतिविषाच शीतशिवं सैंधवंमिश्रेयाच क
कसौंदा ५ र्कशः कांपिल्यः कासमर्दश्च चर्मकषा शातलामांसरोहिणीच नंदिवृक्षः अश्वत्थभेदो
ऽधोमुखपत्रशाखश्चेलिपापीपरइतिलोकेप्रसिद्धः तुणिश्चपयः क्षीरमुद्कंच रुहा रु
भरकटई कूसा ४ वामांसरोहिणीच सिंहीवृहतीवासाच अथपर्यायानिनामानि क्रमुकः पूगस्तुंदः पट्टिका पठियालोध ४
लोध्रश्च तुरकः कोकिलाक्षोगोक्षुरस्तिलकनामपुष्पविशेषश्च प्रियकः प्रियंगुः कदं
बोऽसनश्च पृथ्वीका कालाजाजीवृहदेलाहिंगुपत्रीच भूतिकं भूनिंबः कतृणंभूस्तृणंश्च हरिकुरी कुसर
सोमवल्कलः कट्फलः श्वेतखदिरोधृतपूर्णकरंजश्च सौगंधिकं कल्हारंकतृणंगंधकं

कलौंजी

भांग२ लसुन१ खेंखारि३

भा.प्र. च भृंगः भृंगराजस्त्वग्भृंगारश्च अरिष्टः निंबोरसोनंमहौषधंमर्कटीकपिकच्छूश्चयामार्गःक
१६५ रंजीच अंबष्ठा पाठाचांगेरीकाकमाचीच कृष्णा पिप्पलीकालाजाजीनिलीचक्षीरिणी दुग्धे
काक्षीरकाकोलीश्वेतसारिवाच मधुपर्णी गुडूचीगंभारीनीलीच मधुकपर्णः श्योनाकः
ब्राह्मी४ स्त्रियांतुमंजिष्ठाब्रह्ममांडूकीच श्रीपर्णी गंभारीगणिकारिकाकटूफलश्च अमृता गुडू
चीहरीतकीधात्रीच अनंता दुरालभानीलदूर्वालांगलीच कृष्णप्रोक्ता अतिबलामहाश्रा
वणीकपिकच्छूश्च कृष्णवृंता पाटलागंभारीमाषपर्णीच जीवंती गुडूचीशाकविशेषो जिवंती२
बोवंदाच लता सारिवाप्रियंगुःज्योतिष्मतीच समुद्रांता दुरालभाकार्पासीस्पृक्काच हैम
वती हरीतकीश्वेतवचापीतदुग्धःसीकंदःयस्यमूलंचोकमितिप्रसिद्धं अभया हरीतकी
मुंडी२ महाश्रावणीपद्मचारिणीच षड्ग्रंथा वचागंधपलाशीकरंजीच वरदा सुवर्चलाकुरकुरइ
तिलोके अश्वगंधावराहीगेठीइतिलोके इक्षुगंधाकाशःकोकिलाक्षोगोक्षुरःक्षीरविदारीच

कर्कूदाति४

श्रमरूतर   शालय ३

कालस्कंधः तमालस्तिंदुकः कालखदिरश्च महौषधं शुंठीरसोनोविषंच मधु द्रोणपुष्प(
रसोमद्यंच कपीतनः आम्रातकः शिरीषोगर्दभांडश्च मदनः पिंडीतकोधत्तूरः सिक्थ(
कश्च सप्तपुष्पः श्वेतार्कोरक्तार्कः कुंदश्च सुरभिः शल्लकीमुराएलावालुकंच लक्ष्मीः
ऋद्धिर्वृद्धिःशमीच कालानुसार्य्यं कालीयकंतगरंशैलेयंच चांपेयः चंपकोनागकेशरः(
पद्मकेशरश्च नादेयी गणिकाजलजंबूर्जलवेतसंच पाक्यं विडंसौवर्चलंयवक्षारश्च वि
शल्या लांगलीगुडूचीलघुदंतीच इंद्रद्रुः ककुभोदेवदारुकुटजश्च काश्मीरं कुंकुमंपुष्क
रमूलंकाश्मीरीगंभारीच गुंद्रः पटेरकःशरश्च गुन्द्रा प्रियंगुर्भद्रमुस्तकोमुस्तश्च कुक्कं कुक
मम्लवेतसंरक्ताम्लश्च पारिभद्रः निंबःपारिजातोदेवदारुश्च पीतदारुःहरिद्रादेवदारुस
सारखोर रलश्च वीरः ककुभोवीरणंकाकोलीच वीरतरुः ककुभोवीरणंशरश्च मयूरःअपा
मार्गोजमोदातुल्यरक्तसारःरक्तचंदनंपतंगंखदिरश्च वदरासुवर्चलाश्र्वगंधावाराही

चवसिरः रक्तापामार्गोगजपिप्पलीसमुद्रलवंणंसौवीरं अंजनमेतेदोवद्धंसंधानभेदश्च अंकुलः
अशोकोवेतसस्तिनिशश्च शिला मनःशिलाशिलाजतुगैरिकंच सोमवल्ली वाकुचीयु
डीचीब्राह्मीच अम्लीवः सोभांजनोमहानिंबः समुद्रलवणंच कारवी कालाजाजीशताका
जमोदाच धामार्गवः रक्तापामार्गः राजकोशातकीमहाकोशातकीच दुःस्पर्शा यवासः
कंटकारीकपिकच्छूश्च पलाशः किंशुकःगंधपलाशीपत्रंच कालमेषी मंजिष्ठावाकु
चीश्पामात्रिवृच्च पलंकषः गुग्गुलुः गोक्षुरः लाक्षाच मधुरसाद्राक्षामूर्वागंभारीच रसा रा
स्नाशल्लकीपाठाच श्रेयसी हरीतकीरास्नागजपिप्पलीच लोहं अयःकांस्यमगुरुच
सहा मुद्गपर्णीबलाभेदः ककहीसेवतीगुलाबक इतिलोके सुवहा रास्नानाकुलीनीलपु
ष्पः सिंदुवारः अथयवक्षारादीनिनामानि अपशब्दःसमतोष्मसुसोवर्चलविन्नीतके कर्ष
पत्राद्गमुपाह्वशाकटेंद्रियययासके काकारव्यःकाकमाचीविकाकोलीकाकणंतिकाका

कजंघाकाकनासाकाकोडुंवरिकापिच समस्तवर्गेषुकथितःकाकशब्दोविचक्षणैः सर्पद्वि
रदमेषेषुसीसकेनागकेसरे नागवल्ल्यांनागदंत्यांनागशब्दःप्रयुज्यते मांसद्रवेचेक्षुरसेपा
रदेमधुरादिषु वालरोगेविषेनीरेरसोनवसुवर्त्तते इतिश्रीभावप्रकाशेहरीतक्यादिद्रव्या
णांनामगुणकर्मादिकथनंसमाप्तंसंपूर्णम् अथविशेषगुणकथनवर्गाः तत्रपानीय
स्यगुणाः पानीयंप्रसृतीरष्टौयःपिवेदरुणोदये सजराव्याधिनिर्मुक्तोजीवेद्वर्षशतंसुधीः
विगतघननिशीथेप्रातरुत्थायनित्यंपिवतिखलुनरोयोनासरंध्रेणवारि सभवतिमतिपूर्
र्णश्चक्षुषातार्क्ष्यतुल्योवलिपलितविहीनःसर्वरोगैर्विमुक्तः निशीथोऽत्रनिशांधकारः
अथमानपरिभाषा नमानेनविनायुक्तिर्द्रव्याणांजायतेक्वचित अतःप्रयोगकार्य्यार्थंमा
नमत्रोच्यतेमया १ चरकस्यमतंवैद्यैराद्यैर्यस्मान्मतंततः विहायसर्वमानानिमागधंमान
मुच्यते २ त्रसरेणुर्वुधैःप्रोक्तास्त्रिंशतापरमाणुभिः त्रसरेणुस्तुपर्यायोनाम्नावंशीनिगद्यते ३

शा॰प्र॰
१८८

जालान्तरगतैः सूर्यकरैर्वंशीविलोक्यते षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ४ तिसृभिः
राजिकाभिश्च सर्षपः प्रोच्यते बुधैः यवोऽष्टसर्षपैः प्रोक्तो गुंजा स्यात्तच्चतुष्टयं ५ षड्भिस्तु रक्तिकाभि
ःस्यान्माषको हेमधानकौ माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ६ टङ्कः स एव कथित
स्तद्द्वयं कोल उच्यते क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ७ कोलद्वयं तु कर्षः स्यात्स प्रोक्तः
पाणिमाणिकः अक्षं पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकं ८ विडालपदकं चैव तथा
षोडशिका मता करमध्यं हंसपदं सुवर्णं कवलग्रहः ९ उदुंवरं च पर्यायैः कर्ष एव निगद्य
ते स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा १० शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थि
का प्रकुंचः षोडशी विल्वं पलमेवात्र कीर्त्यते ११ पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते
प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्द्धशरावकः १२ अर्धमानं च स ज्ञेयः कुडवाभ्यां च मानिका
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः १३ शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकं भाज

नं कांस्यपात्रं च चतुःषष्टिपलश्च सः १४ चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः उन्मान
श्च घटो राशिर्द्रोणपर्यायसंज्ञितः १५ द्रोणाभ्यां सूर्प्पकुम्भौ च चतुःषष्टिशरावकः सूर्पाभ्यां (
च भवेद्द्रोणी वाहो गोणी च सा स्मृता १६ द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः चतुःसह
स्रपलिका षण्णवत्यधिका च सा १७ पलानां द्विसहस्रं च भार एकः प्रकीर्त्तितः तुलापलशतं
ज्ञेयं सर्वत्रैवैष निश्चयः १८ माषटङ्काक्षबिल्वानि कुडवः प्रस्थमाढकं राशिर्गोणी खारिके
ति यथोत्तरस्चतुर्गुणं १९ अथ पंचरक्तिकसंमतः सुश्रुतमते पञ्चरक्तिको माषो विंशतिरक्तिक
टंको ऽशीतिरक्तिकः कर्षः अयमेव कलिङ्गपरिभाषायामपि यतस्तत्राष्टरक्तिको माषो द्वात्रिं
शद्रक्तिकष्टंकः सार्द्धटंकद्वयमितः कर्षः गुञ्जादिमानमारभ्य यावत्स्यात्कुडवस्थितिः द्रवा
र्द्रशुष्कद्रव्याणां तावन्मानं समं स्मृतं २० प्रस्थादिमानमारभ्य द्विगुणं तु द्रवार्द्रयोः मानं तथा तु
लायास्तु द्विगुणं न क्वचित्स्मृतं २१ मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरंगुलं विस्तीर्णं च तथोच्चं च

तन्मानंकुडवंवदेत् २२ इतिमागधमानं अथकलिङ्गमानं यतोमन्दाग्नयोह्रस्वाहीनसत्वानरा
कलौ अतस्तुमात्रातद्योग्याप्रोच्यतेसुज्ञसम्मता १ यवोद्वादशभिर्गौरसर्षपैःप्रोच्यतेवुधैः यव
द्वयेनगुञ्जास्यात्त्रिगुंजोवल्लउच्यते २ माषोगुंजाभिरष्टाभिःसप्तभिर्वाभवेत्क्वचित् चतुर्भिर्माषकैः
शाणःसनिष्कष्टंकएवच ३ गद्याणोमाषकैःषड्भिःकर्षःस्याद्दशमाषिकः चतुःकर्षैःपलं
प्रोक्तंदशशाणमितंवुधैः ४ चतुःपलैश्चकुडवंप्रस्थाद्याःपूर्ववन्मताः स्थितिर्नास्त्येवमात्राया
ःकालमग्निंवयोवलं ५ प्रकृतिंदोषदेशौचदृष्ट्वामात्रांप्रकल्पयेत् नाल्पंहन्त्यौषधंव्याधिंय
थाम्भोल्पंमहानलम् ६ अतिमात्रञ्चदोषाययथात्यम्बुसेवितंदकम् ७ इतिमानपरिभाषा
अथभेषजानांविधानानि स्वरसश्चतथाकल्कःक्वाथश्चहिमफाण्टकौ ज्ञेयाःकषायाःपञ्चैते
लघवःस्युर्यथोत्तरं १ तत्रादौस्वरसविधिः आहतात्तत्क्षणाकृष्टाद्द्रव्यात्क्षुण्णात्समुद्धरेत् वस्त्रनि
ष्पीडितोयश्चस्वरसोरसउच्यते २ आहृतात्कीटाग्निघ्नीतादिभिरनुपहतात् क्षुण्णात्सम्पिष्टात्

कुडवंचूर्णितंद्रव्यंचतुःषष्टिपलेजले अहोरात्रंस्थितंतस्माज्ज्ञेयोद्रावरसउत्तमः३ चूर्णितं चूर्णी
कृतं आदायशुष्कंद्रव्यंवास्वरसानामसम्भवे जलेष्टगुणितेसाध्यंपादशिष्टंचगृह्यते ४ स्व
रसस्यगुरुत्वाच्चपलमर्द्धंप्रयोजयेत् निशोषितंचाग्निसिद्धंपलमात्रंरसंपिबेत् निशोषितंनि
शायामुषितं ५ सितामधुगुडंक्षीरंजीरकंलवणंतथा घृतंतैलंचचूर्णादीन्कोलमात्रान्रसे
क्षिपेत् ६ कोलसंकर्षम अथतण्डुलजलविधिः कंडितंतण्डुलपलंजलेष्टगुणितेक्षिपेत्
भावयित्वाजलंग्राह्यंदेयंसर्वत्रकर्मसु भावयित्वाकोमलीकृत्वा अथहिमविधिः क्षुण्णंद्रव्य
पलंसम्यक्षड्भिर्नीरपलैःप्लुतं निशोषितंहिमःसःस्यात्तथाशीतकषायकः तस्यमा॰
नमतंपानेपलद्वयमितंबुधैः क्षुण्णंचूर्णीकृतं अथमन्थविधिः जलेचतुःपलेशीतेक्षुण्णंद्रव्य
पलंक्षिपेत् मृत्पात्रेमन्थयेत्सम्यक्तस्माद्द्विपलंपिबेत् क्षुण्णंचूर्णीकृतं मंथयेत्मर्द्दीया
त् अथफाण्टविधिः क्षुण्णेद्रव्यपलेसम्यग्जलमुष्णंविनिक्षिपेत् मृत्पात्रेकुडवोन्मानंततस्तु

भा·प्र
२००

श्रावयेत्पयः सस्याच्चूर्णद्रवः फांटः तन्मानं द्वि पलोन्मितं क्षौद्रं सितां गुडादींस्तु कर्षमात्रान् वि
निक्षिपेत् चुल्ले चूर्णीकृते सच्चूर्णद्रवः फांटः स्यादित्यन्वयः अथ कल्कविधिः द्रव्यमार्द्रं
शिलापिष्टं शुष्कं वा सजलं भवेत् प्रक्षेपस्तेन मानं कर्षसंमितं कल्के मधु घृतं तैलं देयं द्विगुण
मात्रया सितां गुडं समं दद्यात् द्रवो देयश्चतुर्गुणः अथ चूर्णविधिः अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं
वस्त्रगालितं तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसंमिता चूर्णे गुडः समो देयः शर्करा द्विगु
णा मता चूर्णेषु भर्जितं हिंगु देयं नोत्क्लेदकृद्भवेत् लिहेच्चूर्णं द्रवैः सर्वैः घृताद्यैर्द्विगुणोन्मि
तैः पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः चूर्णावलेहगुटिकाकल्कानामनुपानकं पित्तवा
तकफातङ्के त्रिद्व्येकपलमाहरेत् यथा तैलं जले प्राप्तं क्षणेनैव विसर्प्पति अनुपानबला
द्देहे तथा सर्प्पति भेषजम् अथ भावनाविधिः द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत् भा
वनायाः प्रमाणं तु चूर्णे प्रोक्तं भिषग्वरैः अथ पुटपाकविधिः पुटपाकस्य कल्कस्य स्वरसो

गृह्यतेयतः अतस्तुपुटपाकानांयुक्तिरत्रोच्यतेमया पुटपाकस्यमात्रेयंलेपस्यांगारवर्णता त
ल्लेपंच्यंगुलंस्थूलंकुर्य्याद्व्यंगुलमात्रकं काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमं पलमात्रोर
सोग्राह्यःकर्षमात्रंमधुक्षिपेत् कल्कचूर्णद्रवाद्यास्तुदेयाकोलमितावुधैः अथोष्णोदकवि
धिः उष्णोदकंफुकवटाइतिलोके अष्टमेनांशशेषेणचतुर्थेनार्द्धकेनवा कासश्वासज्वरा
न्हन्तिपीतमुष्णोदकंनिशि अथक्षीरपाकविधिः क्षीरमष्टगुणंद्रव्यात्क्षीरान्नीरंचतुर्गुणं
क्षीरशेषंचुतत्पीतंशूलमामोद्भवंजयेत् अथक्वाथविधिः पानीयंषोडशगुणंक्षुणेद्रव्यप
लेक्षिपेत् मृत्पात्रेक्वाथयेद्ग्राह्यमष्टमांशावशेषितं कर्षादिस्तुपलंयावद्दद्यात्षोडशिकंज
लं षोडशिकंषोडशगुणं तज्जलंपाययेद्धीमान्कोलंमृद्वग्निसाधितं सतक्वाथःकषायश्च
निर्यूहःसनिगद्यते अथक्वाथपानमात्रामाह मात्रोत्तमापलेनस्यात्त्रिभिरक्षैस्तुमध्यमा जघ
न्याचपलार्द्धेनस्नेहक्वाथौषधेषुच तंत्रांतरे क्वाथ्यद्रव्यपलेवारिअष्टगुणमिष्यते चतुर्भा

भा॰प्र॰ गावशिष्टे तु पेयं पलचतुष्टयं दीप्तानलं महाकायं पाययेच्च पलद्वयं मध्यमाग्निमल्पकायं पल
२०१ मात्रं च पाययेत् क्वाथे क्षिपेत् सितामंशैश्चतुर्थाष्टमषोडशैः वातपित्तकफातंके विपरीतं मधु
स्मृतं जीरकं गुग्गुलं क्षारं लवणं च शिलाजतु हिंगु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत् क्षी
रं घृतं गुडं तैलं मूत्रं चान्यद्द्रवं तथा कल्कं चूर्णादिकं क्वाथे निःक्षिपेत्कर्षसंमितं तत्रोपविश्य
विश्रान्तः प्रसन्नवदनेक्षणः औषधं हेमरजतमृद्भाजनमधिष्ठितं पिबेत्प्रसन्नहृदयः पीत्वा
पात्रमधोमुखं विधायाचम्य शालिलं ताम्बूलं चोपयोजयेत् अथावलेहविधिः क्वाथादे
र्यत्पुनः पाकात् घनत्वं सा रसक्रिया सोऽवलेहश्च लेहश्च तन्मात्रा स्यात्पलोन्मिता सिता
चतुर्गुणा कार्या चूर्णाद्विद्विगुणो गुडः द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः सुपक्वे तंतुमत्त्वं
स्यादवलेहेऽप्सु मज्जनं स्थिरत्वं पीडिते मुद्रा गन्धवर्णरसोद्भवः दुग्धमिक्षुरसं यूषं पंचमूल
कषायजं वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते अथ वटिकाविधिः वटका अथ कर

23

ष्यंते तन्नामगुटिकावटी मोदकोवटिकापिंडीगुडोवर्त्तिस्तथोच्यते लेहवत्साधयेद्वन्हौगुडोवाश
र्करायवा गुग्गुलुर्वाक्षिपेत्तत्रचूर्णंतन्निर्मितावटी तत्रवन्हिसिद्धेगुडादौ कुर्य्यादवन्हिसिद्धेनक्व
चिद्गुग्गुलुनावटी द्रवेणमधुनावापिगुटिकांकारयेद्बुधः शिताचतुर्गुणादेयावटीषुद्विगुणोगु
डः चूर्णाच्चूर्णसमःकार्य्योगुग्गुलुर्मधुतत्समं चूर्णसमं द्रवंतुद्विगुणंदेयंमोदकेषुभिषग्वरैः द्र
वोद्रवरूपंद्रव्यं कर्षप्रमाणातन्मात्राबलंदृष्ट्वाप्रयुज्यते बलमितिकालादेरप्युपलक्षणं अ
थघृततैलयोर्विधिः कल्काच्चतुर्गुणीकृत्यघृतंवातैलमेवच चतुर्गुणेद्रवेसाध्यंतस्यमात्राप
लोन्मिता मात्रापलोन्मिता भक्षणाय निक्षिप्यक्वाथयेत्तोयंक्वाथद्रव्याच्चतुर्गुणं पादशिष्टं
गृहीत्वाथस्नेहंतेनैवसाधयेत् चतुर्गुणंमृदुद्रव्येकठिनेऽष्टगुणंमतं तथाचमध्यमद्रव्येदद्या
दष्टगुणंपयः अत्यंतकठिनद्रव्येनीरंषोडशिकंमतं मृदुद्रव्येआर्द्रद्रव्येगुडूच्यादौ कठिन
शुष्कद्रव्येगुडूच्यादौ अत्यंतकठिनेमरिचशुष्कदेवदार्वादौ कर्षादितःपलंयावत्क्षिपे

भा.प्र.
२०२

तथोडशिकं मतं तदूर्ध्वं कुडवं यावद्भवेदष्टगुणं पयः प्रस्थादितः क्षिपेन्नीरं वारि यावच्चतुर्गुणं
पूर्ववच्चतुर्गुणमिति द्रव्यमित्यादिना क्वाथ्यद्रव्यगतमुक्ताद्विगुणत्वेदेन जलगतपरिमाणमुक्तं इदा
नीं केचिदाचार्याः कर्षादितः पलं यावदित्यादिना वचनेन क्वाथ्यद्रव्यगतपरिमाणभेदेन ज
लगतपरिमाणं मन्यंते अंबुक्वाथरसैर्यत्र पृथक्स्नेहस्य साधनं कल्कस्यांशं तत्र दद्याच्च
तुर्थषष्ठमष्टमं अस्यायमर्थः अंबुना स्नेहसाधने कल्कं स्नेहस्य चतुर्थमंशं दद्यात् क्वा
थेन स्नेहसाधने स्नेहस्य षष्ठं भागं कल्कं दद्यात् स्वरसैः स्नेहसाधने स्नेहस्याष्टमं भागं कल्कं
दद्यात् पुनर्विशेषमाह दुग्धे दधिरसे तक्रे कल्को देयोष्टमांशिकः कल्कस्य सम्यक्पाका
र्थं तोयमत्र चतुर्गुणं कल्कद्रव्याच्चतुर्गुणं तोयं पेषणार्थे द्रव्याणि यत्र स्नेहेषु पंचादीनि भवं
ति हि तत्र स्नेहसमान्याहुर्यथापूर्वं चतुर्गुणं अस्यायमर्थः यत्र स्नेहेषु अष्टादीनि पंच द्रव्याणि
दुग्ध दधि स्वरस तक्र कल्कोपयुक्तजलानि प्रत्येकं स्नेहसमानि बोद्धव्यानि यथापूर्वं दुग्धद

धिस्वरसतक्रेसमुदितंस्नेहाच्च चतुर्गुणंभवति द्रव्येणकेवलेनैवस्नेहपाकोभवेद्यदि तत्राम्बु
पिष्टःकल्कस्यात्जलंचात्रचतुर्गुणं अत्रकल्कद्रव्येक्वाथेनकेवलेनैवपाकोयत्रेरितक्व
चित् क्वाथ्यद्रव्यस्यकल्कोपितत्रस्नेहेप्रयुज्यते पुष्पकल्कस्तुयःस्नेहस्तत्रतोयंचतुर्गुणं
स्नेहा स्नेहाष्टमांशश्चपुष्पकल्कःप्रयुज्यते वर्त्तिवत्स्नेहकल्कःस्याद्यदांगुल्याविवर्त्ति
तः शब्दहीनोग्निनिःक्षिप्तःस्नेहःसिद्धोभवेत्तदा यदाफेनोद्गमस्तैलेफेनशांतिश्चसर्पिषि
वर्णगंधरसोत्पत्तिःस्नेहसिद्धिस्तदाभवेत् स्नेहपाकस्त्रिधाप्रोक्तोमृदुर्मध्यःखरस्तथा ईषत्स
रसकल्कस्तुस्नेहपाकोमृदुर्भवेत् मध्यपाकस्यसिद्धिश्चकल्कोनीरसकोमले ईषत्कठिन
कल्कश्चस्नेहपाकोभवेत्खरः तदूर्ध्वंदग्धपाकःस्याद्दाहकृन्निःप्रयोजनः आमपाकश्चनि
वीर्योवह्निमांद्यकरोगुरुः नस्यार्थंस्यान्मृदुःपाकोमध्यमःसर्वकर्मसु अभ्यंगार्थेखरःप्रो
क्तोयुंज्यादेवंयथोचितं घृततैलगुडादींश्चसाधयेन्नैकवासरे प्रकुर्वंत्युषितास्त्वेतेविशेषाद्गुण

मा॰म संचयं अथसंधानविधिः द्रवेषुचिरकालस्थंद्रव्यंयत्संधितंभवेत् आसवारिष्टभेदैस्तुप्रो
२०३ च्यतेभेषजोचितं भेषजोचितं तत्रभेषजोचितं तत्रासवारिष्टयोर्लक्षणमाह यदपक्वौष अ॰ं २
धाम्बुभ्यांसिद्धंमद्यंसआसवः अरिष्टःक्वाथसाध्यःस्यात्तयोर्मानंपलोन्मितं सामान्यतोऽ
रिष्टविधिः अनुक्तमानारिष्टेषुद्रवद्रोणेगुडात्तुलां क्षौद्रंक्षिपेद्गुडादर्धंप्रक्षेपंदशमांसिकं धूली दिकं ४
पुडस्येवदशमांशं द्विविधंसीधुमाह ज्ञेयःशीतरसःसीधुरपक्वमधुरद्रवैः इक्षुरसादि
भिः सिद्धःपक्वरसःसीधुःसंपक्वमधुरद्रवैः परिपक्वान्नसंधानसमुत्पन्नांसुरांजगुः सुरा
मंडःप्रसन्नास्यात्ततःकादंबरीघना तदधोजगलोज्ञेयोमेदकोजगलाद्घनः पक्कसोहृ गोधूमादिः ४
तसारःस्यात्सुराबीजंचकिण्वकं सुराबीजंयवगोधूमतण्डुलादि यत्तालखर्जूररसैःसं
धितासाहिवारुणी कंदमूलफलादीनिसस्नेहलवणानिच यत्रद्रव्येऽभिषूयंतेतच्चुक्र खिरका २
मभिधीयते अभिषूयंतेद्रवेणाप्लाव्यसंधीयंते विनष्टमम्लतांयातंमद्यंवामधुरद्रवः वि

३५

श्र्द्धं सिन्नास्तु गोधूमाः कुल्माषाः संस्मृता बुधैः ४

चिरास्थिता १ नष्टसंधितोयस्तु तच्चुक्रमभिधीयते गुडाम्बुना सतैलेन कंदशाकफलैस्तथा संधितं चाम्लतां
जातं गुडशुक्तं प्रचक्षते एवमेव हि शुक्तं स्यान्मृद्वीकासंभवं तथा तुषांबु संधितं ज्ञेयमामैर्वि
दलितैर्यवैः यवैस्तु निस्तुषैः पक्वैः सौवीरं संधितं भवेत् आरनालं तु गोधूमैरामैः स्यान्निस्तु
षीकृतैः पक्वैर्वा संधितैस्तैस्तु सौवीरसदृशं गुणैः कुल्माषधान्यमंडादिसंधितं कांजिकं वि
दुः शंडाकी संधिता ज्ञेया मूलकैः सर्षपादिभिः अथ धातूनां शोधनमारणविधिः तत्र मारण
प्रयोग्यं सुवर्णमाह दाहे रक्तं सितं छेदे निकषे कुंकुमप्रभं तारशुल्बोज्झितं स्निग्धं कोमलं ांसीताग्र ५
गुरु हेम सत् अशुभं तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलं दाहे छेदेऽसितं श्वेतं कषे त्याज्यं
स्फुटं लघु अथ शोधनविधिः पत्रलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत् निषिंचेत्तप्ततप्ता
नि तैले तक्रे च कांजिके गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा एवं हेम्नः परेषां च धातू
नां शोधनं भवेत् अथाशुद्धस्य सुवर्णस्य दोषमाह बलं सवीर्यं हरते नराणां रोगव्रजं पोषय

जं·भी·ही·त्रिं·पू·२

गा·प्र· तीहकाये असौख्यकार्य्येवसदासुवर्णमसुद्धमेतन्मरणंचकुर्य्यात अथस्वर्णस्यमारणविधिः स्वर्ण
२०४ स्यद्विगुणंसूतमम्लेनसहमर्दयेत तद्गोलकसमंगंधंनिदध्यादधरोत्तरं स्वर्णस्यातितनूकृतपत्र
का·स्वं·३ स्य गंधंगंधकचूर्णम गोलकंचततोरुध्वासरावद्दृढसंपुटे त्रिंशद्वनोपलैर्दद्यात्पुटान्येवंचतुर्द
श निरुत्थंजायतेभस्मगंधोदेयःपुनःपुनः रुध्वासवस्त्रकुट्टितचिक्कणमृत्तिकया वनोपलाः
गोष्ठाइतिलोके निरुत्थंयत्पुनर्नजीवति अथान्यःप्रकारः काञ्चनेगालितेनागंषोडशां श्री·सा·६
म·ई·शि·सा·५ शेननिःक्षिपेत चूर्णयित्वातथाम्लेनघृष्ट्वाकृत्वाचगोलकं गोलकेनसमंगंधंदत्वाचैवाध
रोत्तरं सरावसंपुटेधृत्वापुटेत्त्रिंशद्वनोपलैः एवंसप्तपुटैर्हेमनिरुत्थंभस्मजायते अत्रापिपू
र्ववत्गंधःप्रदातव्यःपुनःपुनः काञ्चनाररसैर्घृष्ट्वासमसूतकगंधयोः कज्जलींहेमपत्राणिले
पयेत्समयातया काञ्चनारत्वचःकल्कैर्मूषायुग्मं प्रकल्पयेत धृत्वाथतत्संपुटेगोलंमन्म
षासंपुटेच्चतत् निधायसंधिरोधंचकृत्वासंशोष्यगोलकं वह्निंखरतरंदद्यादेवंदद्यात्पुटत्रयं

क·ज्ञा·ल्पा·२

२०४

२९

निरुत्थं जायते भस्म सर्वकर्म्मसु योजयेत् कांचनारप्रकारेण लांगली हंति कांचनं लांगलीकरियारी
न्प्रजीआख१२ ज्वालामुखी तया हन्यात्तथा हंति मनःशिला अन्यच्च शिलासिंदूरयोश्चूर्णं समं योरर्कदुग्धकैः समभागयोः २
सप्तधा भावना दद्यात् शोषयेच्च पुनः पुनः ततस्तु गलिते हेम्नि कल्कोयं दीयते समः पुनर्द्धमेद्दति
तरां यथा कल्को विलीयते एवं वेलात्रयं दद्यात्कल्कं हेमम्रतिर्भवेत् एवं मारितस्य सुवर्णस्य गुणाः
सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनं स्वादु तिक्तं च तुवरं पाके च स्वादु पिच्छिलं पवित्रं बृंहणं नेत्र्यं
मेधास्मृतिमतिप्रदं हृद्यमायुःकरं कांतिवाग्विशुद्धिस्थिरत्वकृत् विषक्षयक्षयोन्मादत्रिदोष
ज्वरशोषजित् हृष्यं हृषायकामुकाय हितं असम्यग्मारितं स्वर्णं बलं वीर्यं च नाशयेत् करोति
रोगान्मृत्युं च तद्धन्याद्यत्नतस्ततः धात्वधात्वादिमारणोपयुक्तान्पुटप्रकारानाह रसप्रदीपे लो
हादेरपुनर्भवस्त्वं गुणत्वं गुणाम्यता सलिले तरणं चापि तत्सिद्धिः पुटनाद्भवेत् गंभीरे विस्तृते कु
ण्डे द्विहस्ते चतुरस्रके वनोपलसहस्रेण पूरिते पुटनौषधं कोष्ठे स्वल्पं प्रयत्नेन गोविशोपरि धारयेत्

आ॰प्र॰ वनोपलसहस्रार्द्धंकोष्टिकोपरिनिक्षिपेत् वह्निंविनिक्षिपेत्तत्रमहापुटमितिस्मृतं कोष्ठंमूषा गो
२०५ विद्यागोष्ठा इतिमहापुटः सपादहस्तमानेनकुण्डेनिम्नेतथायते वनोपलसहस्रेणापू
र्णमध्येविधारयेत् पुटनद्रव्यसंयुक्तांकोष्ठिकांमुद्रितांमुखे अधोर्द्धानिकरंडाने
अर्द्धान्युपरिनिःक्षिपेत् एतद्गजपुटंप्रोक्तंख्यातंसर्वपुटोत्तमं हस्तश्चतुर्विंशतिरं
गुलप्रमाणः ससपादः तेनत्रिंशदंगुलप्रमाणेनेत्यर्थः अतएवोक्तं साधारणा
नरांगुल्यात्रिंशदंगुलकोगजः इतिगजपुटं अरत्निमात्रकेकुण्डेपुटंवाराहमुच्य
ते वितस्तिमात्रेखातेत्वकथितंकौकुटंपुटं अरत्निस्तुनिःकनिष्ठेनमुष्टिनेत्यम
रः निसृतकनिष्ठ्यामुष्ट्योपलक्षितोहस्तोऽरत्निरित्यर्थः षोडशांगुलकेखाते
कस्यचित्कौकुटंपुटं यत्पुटंदीयतेखातेह्यष्टसंख्यैर्वनोपलैः कपोतपुटमेतत्तु
कथितंपुटपण्डितैः गोष्ठांतर्गोखुरक्षुण्णंशुष्कंचूर्णितगोमयं गोर्वरंतत्समा

ख्यातं वरिष्ठं रससाधने वृहद्भाण्डस्थितैर्यत्र गोवरैर्दीप्यते पुटं तद्गोवरं पुटं प्रोक्तं नि।
षण्णैः सूतभस्मकृत वृहद्भाण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत् छिद्राग्निमुद्रयेद्भाण्ड
भाण्डपुटमुच्यते अथ यंत्रप्रकारानाह तत्रैव भाण्डे वितस्तिगम्भीरे मध्ये निहि
त कूपिके कूपिकाकंठपर्य्यन्तं वालुकाभिः प्रपूरिते भेषजं कूपिकासंस्थं वह्निना
यत्र पच्यते वालुकायंत्रमेतद्धि यंत्र तत्त्वज्ञैः स्मृतं वालुकायंत्रं निवद्धं सौषधं स
तं सूत्रैस्त्रिगुणाम्बरे रसपोटलिकां काष्ठे दृढं वध्वा गुणेन हि संधानपूर्णकु
म्भान्तस्त्ववालंवनसंस्थितां अधस्ताज्ज्वालयेदग्निं तत्तु क्रमेण हि दोलायंत्र
मिदं प्रोक्तं स्वेदनाख्यं तदेव हि संधानं कांजिकादि सांवु स्थालीमुखे वध्वे वस्त्रे।
स्वेद्यं निधाय च पिधाय पच्यते यत्र तद्यंत्रं स्वेदनं स्मृतं स्वेदनयंत्रं अथ स्थाल्याः पार
स्वेदयंत्रं संछिद्राणि दध्यात्तन्मुखोपरि स्थालीमूर्ध्वमुखीं सम्यक् निरुध्य मृत्स्नया

भा॰ प्र॰

२०६

ऊर्ध्वस्थाल्यांजलंक्षिप्त्वाचुल्ल्यामारोप्ययत्नतः अधस्ताज्ज्वालयेदग्निंयावत्प्रहरपंचकं स्वांगशी
तंततोयंत्राद्गृह्णीयाद्रसमुत्तमं विद्याधराभिधंयंत्रमेतत्तज्ज्ञैरुदाहृतं विद्याधरयंत्रं वालुकासु
समस्तांगांताम्रखारसान्विता दीप्तोपलैःसंहृण्याद्यंत्रंभूधरनामकं भूधरयंत्रं यंत्रंडम
रुसंज्ञंस्यात्तत्स्थाल्योर्मुद्रितेमुखे डमरूयंत्रं अथमारणाययोग्यंरूप्यमाह गुरुस्निग्धंमृ
दुश्वेतंदाहच्छेदघनक्षमं स्वर्णाद्यंचन्द्रवत्स्वच्छंतारंनवगुणंशुभं अथायोग्यं कठिनंकृ
त्रिमंरूक्षंरक्तंपीतंदलंलघु दाहच्छेदघनैर्नष्टंरूप्यंदुष्टंप्रकीर्त्तितं अथशोधनविधिः पत्र
लीकृतपत्राणितारस्याग्नौप्रतापयेत् निषिंचेत्तप्ततप्तानितैलेतक्रेचकांजिके गोमूत्रेचकु
लत्थानांकषायेचत्रिधात्रिधा एवंरजतपत्राणांविशुद्धिःसंप्रजायते अथाशुद्धस्यरूप्य
स्यदोषमाह रूप्यंत्वशुद्धंप्रकरोतितापंविड्बंधनंवीर्य्यबलक्षयंच देहस्यपुष्टिंहरतेतनो
तिरोगांस्ततःशोधनमस्यकुर्य्यात् अथरूप्यस्यमारणविधिः भागैकंतालकंमर्द्ययाम्ब

२०६

२८

म्लैनकेनचित् तेनभागत्रयंतारपत्राणिपरिलेपयेत् धृत्वामूषापुटेरुध्वापुटेत्त्रिंशद्वनोपलैः स
मुद्धृत्यपुनस्तालंदत्वारुध्वापुटेपचेत् एवंचतुर्दशपुटैस्तारंभस्मप्रजायते अन्यप्रकारः
स्नुहीक्षीरेणसंपिष्टंमाक्षिकंतेनलेपयेत् तालकस्यप्रकारेणतारपत्राणिबुद्धिमान् पुटे
च्चतुर्दशपुटैस्तारंभस्मप्रजायते एवंमारितस्यरूप्यस्यगुणाः रूप्यंशीतंकषायाम्लं
स्वादुपाकरसंसरं वयसःस्थापनंस्निग्धंलेखनंवातपित्तजित् प्रमेहादिकरोगांश्चनाशा
यत्यचिराद्ध्रुवं अथमारणयोग्यंताम्रमाह जपाकुसुमसंकाशंस्निग्धंमृदुघनंक्षमं लो
हनागोज्झितंताम्रंमारणायप्रशस्यते अथायोग्यंताम्रमाह कृष्णंरूक्षमतिस्तब्धंश्वेतं
चापिघनासहं लोहनागयुतंचेतिअशुद्धंदुष्टंप्रकीर्तितं अथशोधनविधिः पत्रीकृता
पत्राणिताम्रस्यास्नोप्रलेपयेत् निषिच्चेत्तप्ततप्तानितैलेतक्रेचकांजिके गोमूत्रेचकुलत्था
नांकषायेचत्रिधात्रिधा एवंताम्रस्यपत्राणांविशुद्धिःसंप्रजायते एकोदोषोविषेताम्रेत्व

शुद्धेशैत्रमोवमिः विरेकस्वेदउत्क्लेदोमूर्च्छादाहोरुचिस्तथा अथताम्रस्यमारणविधिः सूक्ष्माणि
ताम्रपत्राणिकृत्वासंशोधयेद्बुधः वासस्त्रयमम्लेनततःखल्वेविनिक्षिपेत पादांशंसूतकंदत्
त्वायाममम्लेनमर्दयेत ततउद्धृत्यपत्राणिलेपयेद्द्विगुणेनच गंधकेनाम्लघृष्टेनतस्यकुर्य्या
च्चगोलकं ततःपिष्ट्वाचमीनाक्षीचाङ्गेरीञ्चपुनर्नवां चतुःपत्रा अविलोनालोनीएतयोर्भेदः
तत्कल्केनबहिर्गोलंलेपयेद्द्व्यंगुलोन्मितं धृत्वातद्गोलकंभाण्डेसरावेनचरोधयेत वालुकाभिः
प्रपूर्य्याथविभूतिलवणांबुभिः दत्वाभाण्डमुखेमुद्रांचुल्ल्यामेवविपाचयेत क्रमवृद्धाग्निना
सम्यक्यावद्यामचतुष्टयं स्वांगशीतंसमुद्धृत्यमर्दयेत्सूरणद्रवैः यामैकंगोलकंतच्चले
:क्षिपेत्सूरणोदरे मृदालेपस्तुकर्तव्यःसर्वतोंगुष्टमात्रकः पाच्यंगजपुटेहित्वामृतंभव
तिनिश्चितं वमनंचविरेकंचभ्रमंक्लममथारुचिं विदाहंस्वेदमुत्क्लेदंनकरोतिकदाच
न एवंमारितताम्रस्यगुणाः ताम्रंकषायंमधुरंसतिक्तमम्लंविपाकेकटुसारकंच पित्ता

पित्तापहं श्लेष्महरं स्वच्छी ततश्चोपणं स्याल्लघु लेखणं च पांडूदराशोंज्वरकुष्ठकासश्वासक्षयान्पीन
समम्लपित्तं शोथं कृमीन् शूलमपाकरोति प्राज्ञैः परेहं हरणमल्पमेतत् एको दोषो विषे ताम्रे
त्वसम्यग्मारिते स्थिते दाहः स्वेदोरुचिर्मूर्छा क्लेदो रेको वमिर्भ्रमः रेको विरेकः अथ वंगस्य
स्वरूपनिरूपणं अत्र मंतत्र खुरकं मिश्रकं त्वहितं मतं तस्याशुद्धस्य दोषमाह वंगो विध
हरिए सुरु४
ने खलु शुद्धिहीनस्तथा विपक्वश्च किलासगुल्मो कुष्ठानि शूलं किल वातशोथं पांडुं प्रमेहं च भ
गंदरं च विषोपसर्गं कविकारहृदं दत्ते पंचक्षत्वाणिक फज्वरश्च मेहाश्मरी विद्रधिमुख्यरोगा
न्नागोपि कुर्यात्कथितान्विकारान् तस्य शोधनमभिधीयते वंग नागो प्रतप्तौ च गलितौ तौ नि
षेचयेत् त्रिधा त्रिधा विशुद्धिः स्यात् रविदुग्धेऽपि च त्रिधा निषेचयेत् तैलतक्रकांजिकगोमूत्र
कुलत्थस्य क्वाथेषु प्रत्येकं त्रिधा त्रिधा ततोऽर्कदुग्धे त्रिधा अथ वंगस्य मारणविधिः मृत्पात्रे
द्राविते वंगे चिंचाश्वत्थत्वचो रजः क्षिप्त्वा वंगचतुर्थांशमयोदर्व्या प्रचालयेत् चिंचाश्वत्थविलीन

श्चूर्णं अयोदर्वीकरच्छुलि ततो द्वियाममात्रेण वंगं भस्म प्रजायते अथ भस्मसमं तालं क्षिप्त्वा
म्लेन विमर्दयेत् ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत् तालेन दशमांशेन याममेकं ततः पुटे
त् एवं दशपुटैः पक्वं वंगं भवति मारितं एवं मारितस्य वंगस्य गुणाः रंगं लघुरसं रूक्षं कु
ष्ठमेहकफक्रिमीन् निहन्ति पांडुसश्वासं नेत्र्यमीषत्तु पित्तलं सिंहो गजौघं तु यथा निहन्ति।
तथैव वंगो खिलमेहवर्गं देहस्य सौख्यं प्रबलेंद्रियत्वं नरस्य पुष्टिं विदधाति नूनं अथ य।
शदस्य स्वरूपं यशदं गिरिजं तस्य दोषाः शोधनमारणे वंगस्येव हि बोद्धव्या गुणांस्तु कथ
याम्यथ यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् चक्षुष्यं परमं मेहान् पांडुं श्वासं च नाश
येत् अथ शीसकस्य शोधनं तस्य साहजिका दोषा रंगस्येव निदर्शिताः शोधनं चापि तस्ये
व निर्णीतं पुरा अथ शीसस्य मारणविधिः तांबूलरससंपिष्टशिलालेपात्पुनः पुनः
द्वात्रिंशद्भिः पुटैः नागो निरुत्थं भस्म जायते शिलः मनः शिला अथ अश्वथस्य चिंचात्व

५१ कौर्ण्यं चितुर्यांशेन निःक्षिपेत् मत्याजैचिंद्रतेनागेलोहदार्व्याप्रक्षालयेत यामैकेनभवेद्भस्म
तत्तुल्यास्यान्मनःशिलाकांजिकेनद्वयंपिष्ट्वापचेद्गजपुटेनच स्वांगशीतिंपुनःपिष्ट्वाशिलया
कांजिकेनच पुनःपचेत्सरावाभ्यामेवंषष्ठिपुटैर्मृतिः एवंमारितस्यनागस्यगुणाः नागसंगं
गुणंज्ञेयंविशेषान्मेहनाशनं नागस्तुनागशतंतुल्यबलंददातिव्याधिंचनाशयतिजीवन
मातनोति वह्निंप्रदीपयतिकामबलंकरोतिमृत्युंविनाशयतिसन्नतसेवितःसः अथलोह
स्याशुद्धस्यदोषमाह षण्ढत्वकुष्ठामयमृत्युकारिहृद्रोगशूलौकुरुतेऽश्मरींच नानारुजानां
चतथाप्रकोपंकुर्याच्चहृल्लासमशुद्धलोहं अथतस्यदोषशांतयेशोधनमभिधीयते पललि
कृतपत्राणिलोहस्याग्नौप्रतापयेत् निःक्षिपेत्प्रतप्तानितैलेतक्रेचकांजिके गोमूत्रेचकुलत्था ७३
नांकषायेचत्रिधात्रिधा एवंलोहस्यपत्राणांविशुद्धिःसंप्रजायते अथलोहस्यमारणविधिः
शुद्धंलोहभवंचूर्णंपातालगरुडीरसैः मर्दयित्वापुटेद्वह्नौदद्यादेवंपुटत्रयं पुटत्रयंकु

ववई१

मा॰भ्र मार्य्याश्चकुठारछिन्नकारसैः पुटषट्कं ततोदद्यादेवं तीक्ष्णमृतिर्भवेत् अन्यच्च क्षिपेद्दाडिम
मांसेन द्रवं तीक्ष्णचूर्णतः मर्द्दयेत्कन्यकाद्रावे यामयुग्मं ततः पुटेत् एवं सप्तपुटैर्मृतं लोह
२०९ चूर्णमवाप्नुयात् सत्योऽनुभूतो योगीन्द्रैः क्रमोऽन्यो लोहमारणे कथ्यते रामराजेन कौतूहल
धियाधुना सूतकाद्द्विगुणं गंधं दत्वा कुर्य्याच्च कज्जली द्वयोः समं लोहचूर्णं मर्द्दयेत्कन्यका
द्रवैः यामयुग्मं ततः पिंडं कृत्वा ताम्रस्य पात्रके घर्मे धृत्वा रुबूकस्य पत्रैराच्छादयेद्बुधः १२३४५५
यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः दत्वोपरि शरावं तु त्रिदिनान्ते समुद्धरेत् पिष्ट्वा च गा
लयेद्वस्त्रादेवं वारितरं भवेत् दाडिमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा तद्रसेनायसश्चूर्णं स(
न्नीया भावयेदपि आतपे शोषयेत्तत्तु पुटेदेवं पुनः पुनः एकविंशतिवारैस्तत्म्रियते ना
त्र संशयः एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत् एवं मारितस्य गुणाः लोहं तिक्तं स
रं शीतं कषायं मधुरं गुरु रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् कफं पित्तं गरं शूलं शो

२०८

३९

शुद्धिमितिशेषः ५

मा॰प्र॰ तैलेन वा पुटेत् तैलेनैवाजमूत्रेण म्रियते स्वर्णमाक्षिकं अथ तारमाक्षिकस्य शोधनमाह स्व
२९० र्णमाक्षिकवद्दोषा विज्ञेयास्तारमाक्षिके अतस्तद्दोषशांत्यर्थं शोधनं तस्य कथ्यते कर्को
टीमेषशृंग्युत्थैर्द्रवैर्जंबीरजैर्दिनं भावयेदातपे तीव्रे विमला शुध्यति ध्रुवं विमला तारमा
क्षिकं कर्कोटी खेषसा मेषशृंगी मेढाशृंगी अथ मारणं कुलत्थस्य कषायेण घृष्ट्वा तैलेन
वा पुटेत् तैलेन वाजमूत्रेण तारमाक्षिकमृच्छति अथ तयोर्विशिष्टाः गुणाः न केवलं स्व
माक्षिकयोः ५ र्णरूप्यगुणास्तौ पाजयोर्मताः द्रव्यान्तरस्य संसर्गात् संत्यन्येपि गुणास्तयोः माक्षिकं म
धुरं तिक्तं स्वर्यं वृष्यं रसायनं चक्षुष्यं वस्तिरुक्कुष्ठपांडुमेहं विषोदरम् अर्शःशोफं हत्यं
कण्डुं त्रिदोषं च नियच्छति अथ तुत्थस्य शोधनमाह विष्टया मर्दयेत्तुत्थं मार्जारककपोत
योः दशांशं टंकणं दत्वा पचेल्लघुपुटे ततः पुटं दध्यात्पुटं क्षौद्रैर्देयं तुत्थविशुद्धये एवं शुद्ध
स्य तुत्थस्य गुणाः तुत्थकं कटुकं क्षारं कषायं वामकं लघु लेखनं भेदनं शीतं चक्षुष्यं कफ

२९०

३२

अश्मरी १

पित्तहृत् विषाश्मकुष्ठकंडूघ्नं तद्गुणं खर्परं मतं अथ कांस्यपरीतेश्च शोधनमभिधीयते पत्र रीतिका २१
लीकृतपत्राणि कांस्यस्याग्नौ प्रतापयेत् निषिंचेत्तप्ततप्तानि तैले तक्रे च कांजिके गोमूत्रे च कु
लत्थानां कषाये च त्रिधा त्रिधा एवं कांस्यस्य रीतेश्च विशुद्धिः संप्रजायते अथ मारणं अर्कक्षी
रेण संपिष्टो गंधकस्तेन लेपयेत् समेन कांस्यपत्राणि शुद्धान्यम्लद्रवैर्मुहुः ततो मूषापुटे धृ
त्वा पचेद्गजपुटेन च एवं पुटद्वयात् कांस्यं रीतिश्च म्रियते ध्रुवं एवं मारितयोः कांस्यरीतिश्च गु
णाः कांस्यं कषायं तीक्ष्णोष्णं लेखनं विशदं सरं गुरु नेत्रहितं रूक्षं कफपित्तहरं परं रीतिका
तु भवेद्रूक्षा सतिक्ता लवणा रसे शोधनी पाण्डुरोगघ्नी कृमिघ्ना नातिलेखनी अथ सिंदूरस्य शो
धनमाह दुग्धाम्लयोगतस्तस्य विशुद्धिः कथिता बुधैः अथ गुणाः सिंदूरमुष्णं वीसर्पकुष्ठकंडूवि
षापहं भग्नसंधानजननं व्रणशोधनरोपणं अथ शिलाजतुनः शोधनमाह तत्र शोधनाय
योग्यं शिलाजतु माह गोमूत्रगन्धि यत्कृष्णं स्निग्धं मृदु तथा गुरु तिक्तं कषायं शीतं च सर्वश्रेष्ठं त

भा.प्र.

२९१

दायसम् आयसं आयसत्वपधातुः विंध्यादौ वकुलंत्वत्र तत्रलोहं यतोऽधिकं तच्छोधनमतेऽर्थम
नेकमलमेलनात ततश्शिलाजतु शिलाजतुसमानीयसूक्ष्मंखंडं विधायच निःक्षिप्यात्सुष्णपानी
येयामेकंस्थापयेत्सुधीः मर्द्दयित्वा ततोनीरं गृह्णीयाद्वस्त्रगालितं स्थापयित्वाऽमत्पात्रेधारये पं२
द्वातपेबुधः उपरिस्थंघनंयत्स्यात्तत्क्षिपेदन्यपात्रके एवंपुनर्पुनर्नीतं क्षिमासात्स्यात्शिलाज
तु भवेत्कार्य्यक्षमंवह्नौक्षिप्तंलिंगोपमंभवेत् निर्धूमंचततःशुद्धंसर्वकर्मसुयोजयेत् अ
पाप्यःप्रकारः तत्रप्रथमतःतस्यवहिर्मलमपाकर्तुंकेवलजलेनप्रक्षालनंकर्त्तव्यं ततस्त
दंतर्गतमृत्तिकासिकतादिदोषहरीकरणाय वक्ष्यमाणक्वाथेनतत्रभावनादेया तद्दहवा
ग्मटः माधिंमाधिंतंसात्म्यसमनुसरन्भावयेद्दयःपात्रे प्राक्केवलजलधौतंशुष्कंक्वाथैस्त
तैर्भाव्यं तुल्यंगिरिजेनजलेवसुगुणितेभावनौषधंक्वाथ्यंतत्क्वाथेपादांशपूतेलेप्रक्षिपेद्गि
रिजं तत्समरसतांयातंसंशुष्कंप्रक्षिपेद्रसे भूयःस्वैःस्वैरेवंक्वाथैर्भाव्यंवारान्सप्त त्रत्र अ

शिलाजतुनाद

व१

२९१

33

फार्शःप्लीहपांडुताः मेदोमेहरुमीन्कुर्यात्तत्किंहंतद्देवहि गुंजामेकांसमारभ्यप्रयावत्सुर्नवर
क्तिकाः तावल्लोहंसमश्नीयाद्यथादोषानलंनरः कूष्मांडंतिलतैलंचमाषान्नंराजिकांतथा
मद्यमम्लरसंचैववर्जयेल्लोहसेवकः शिलागंधार्कदुग्धाक्ताःस्वर्णाद्याःसर्वधातवः म्रियंते
द्वादशपुटैःसत्यंवेदवचोयथा अथोपधातूनांमारणप्रकारणं तत्रस्वर्णमाक्षिकस्या
शुद्धस्यदोषमाह मन्दानलत्वंवलहानिमुग्रांविष्टंभितांनेत्रगदान्सकुष्ठान् मालांतथै
वव्रणपूर्विकांचकुर्य्यादशुद्धंखलुमाक्षिकंच अथतस्यदोषशांतयेशोधनमभिधीयते
माक्षिकस्यत्रयोभागाभागैकंसैन्धवस्यच मातुलुंगद्रवैर्वाथजंवीरस्यद्रवैःपचेत् चाल
येल्लोहजेपात्रेयावत्पात्रंसुलोहितं भवेत्ततस्तुसंशुद्धिंस्वर्णमाक्षिकमृच्छति अथमारण
विधिः कुलत्थस्यकषायेणघृष्ट्वातैलेनवापुटेत् तैलेनैवाजमूत्रेणम्रियतेस्वर्णमाक्षिकं
अथतारमाक्षिकस्यशोधनमाह स्वर्णमाक्षिकवद्धेममाविधिः कुलत्थस्यकषायेणघृष्ट्वा

मार्जे पिल्वाध्रतं त्ले स्व्यर्थे यो ईं स्वर्णं मांचवेत् ६

भा.प्र. फलाम्भोगणस्यैर्विमर्द्यशिलाजतुं दिनैकं लोहजे पात्रे शुद्धिमायात्यसंशयं एवं शोधितस्य शिला
२१२ जतुनो गुणानाह शिलाजतु स्मृतं तिक्तं कटूष्णं कटुपाकि च रसायनं योगवाहि श्लेष्ममेहा
श्मशर्कराः मूत्रकृच्छ्रं क्षयं श्वासं शोथमर्शांसि पांडुतां वातरक्तं तथा कुष्ठमपस्मारोदरं ह
रेत् त्रिदिनं कांजिके क्षिप्तः शुद्धः स्याद्विषतिंदुकः विषमुष्टिशुद्धिः सविषं दंतिनी बीजं
क्वाथयेन्महिषीमिले घर्मशुष्कं ततः कृत्वा त्यक्त्वा बीजं समुद्धरेत् तुषैः सर्षपजैर्मर्दैस्त्रितो
वस्त्रे स ५ वस्त्रेसंपीडयेत् मज्जापंलघृतविरचिदाम्रचूर्णेजितदयेत् ततो दाहेन रहितं निषगोवं प्रयो
जयेत् अथ रसस्य शोधनविधिः तत्र स्वेदनं नानाधान्यैर्यथाप्राप्तैस्तुषवर्जैर्जलान्वितैः
इति जैपालशोधनं ४ मृद्भांडं पूरितं रक्षेद्यावदम्लत्वमाप्नुयात् तन्मध्ये भेगुँरामुंडी विष्णुक्रांता पुनर्नवा मीनाक्षी पाठी २
चैव सर्पाक्षी सहदेवी शतावरी त्रिफला गिरिकर्णी च हंसपादी च चित्रकं समूलं कुट्टयि
त्वा तु यथालाभं विनिःक्षिपेत् पूर्वम्लभांडमध्ये तु धान्याम्लकमिदं स्मृतं स्वेदनादिषु सर्व

नाईनागफूलीति च २

३४

त्र रसराजस्य योजयेत् विष्णुक्रांता गिरिकर्णी च अपराजिते च श्वेतनीलपुष्पभेदात् अत्य
म्लमारनालं वा तदभावे प्रयोजयेत् तदभावे धान्याम्लाभावे ऊषणं लवणं राजी रजनी त्रिफ
लार्द्रकं महाबला नागबला मेघनादः पुनर्नवा मेषशृंगी चित्रकं च नवसारं समं समं तत्स
मस्तं चूर्णं तं च पूर्वाम्लेनैव पेषयेत् प्रलिम्पेत्तेन कल्केन वस्त्रमंगुलमात्रकं तन्मध्ये निः
क्षिपेत्सूतं बध्वा तं त्रिदिनं पचेत् दोलायंत्रेऽम्लसंयुक्ते जायते स्वेदितो रसः मेघनादस्तु च
राई शाकविशेषः शृंगी मेढाशृंगी तद्दलानि एककरा शृंगी ग्राह्या नवसारो नौसादरं अन्यच्च
मूलकानलसिंधूत्थत्र्यूषणार्द्रकराजिका रसस्य षोडशांशेन प्रत्येकं युंज्यात्पृथक्पृथक् इ
ते घ्नन्तु क्रमानेषु मतं मानमिदं बुधैः पटाह्वे तेषु चैतेषु सूतं प्रक्षिप्य कांजिके स्वेदयेद्दिनमे
कं च दोलायंत्रेण बुद्धिमान् स्वेदनीयं भवेत्सूतो मर्दनाच्च सुनिर्मलः मूलकं मुरई
अनलश्चित्रकं त्र्यूषं त्रिकटु राजिका राई अथ मर्दनं इष्टिकाचूर्णचूर्णाभ्यां मादौ मर्दयेद्र

स्वेदनादिष्वेवमिदं मानं मतं नतत्र २

सस्ततः दध्ना गुडेनसिंधूत्थराजिकागृहधूमकैः अन्यच्च कुमारिकाचित्रकरक्तसर्षपैःकृ
तैःकषायैर्बृहतीविमिश्रितैः फलत्रिकेणापिविमर्दितोरसोदिनत्रयंसर्वमलैर्विमुच्यते
अथमूर्छनं ऊषणंत्रिफलावंध्याकंदैस्त्रुकदयान्वितैः चित्रकोर्णानिशाक्षारकन्यार्क
कनकद्रवैः सूतंकृतेनघृष्टेनवारान्सप्तातिमूर्छयेत इत्थंसंमूर्छितस्सूतस्त्यजेत्सप्ता
पिकञ्चुकान् वंध्यकंदः वांभूरेवखसाकंदःस्तुनाह्वयं महतीलघुश्च कर्णिकिनमे
षका निशाहरिद्राक्षारोयवक्षारः कन्याकुमारिका अर्कःअर्कपत्ररसं कनकध
त्तूरपत्ररसं अथोर्ध्वपातनं मयूरग्रीवताप्याभ्यांनष्टपिष्टीकृतस्यच यंत्रेविद्याधरेकु
र्यात्रसेंद्रस्योर्ध्वपातनं सूतःस्यादूर्ध्वपातेनसर्वदोषविवर्जितः मयूरग्रीवातूत्थिया
ताप्यंसुवर्णमाक्षिकं नष्टपिष्टीकृतस्यकुमारिकाद्रवयोगेनतावन्मर्दनंकर्त्तव्यंयावत्पा
रदःएषकनदृश्यतइत्यर्थः विद्याधरयंत्रेडमरूयंत्रे अथाधःपातनम् त्रिफलाशिग्रु

२१३

शिलाजतु७१

यत्स्निग्धस्पर्शगुरुंस्यात्तंतिक्तकसाधितं अहंयुंजीतगिरिजंमेकेकेनतथात्र्यहं फलत्रयस्यपृषे
जेदीमधु२ नपटोल्याःमधुकस्यच शिलाजमेवंदेहस्यभवत्यत्युपकारकं काथ्यद्रव्याणिभावनाफलंचा
द्दहारीतः लोहस्थितंनिंवगुडूचिसर्पिर्द्वचिर्यथावत्परिभावयेत्तत संतानिकाकीटपतंगदं
शगुष्ठेषधीदोषनिवारणाय संतानिकातद्बहिःसंलग्नमृत्तिकादिमयी एवंभावनांदत्वास्य
शोध्यकेवलेनंशोधनंकर्त्तव्यं तत्प्रकारमाहाग्निवेशः अलेपकालेरवितापयुक्तेध्यत्रेनि
जलेन२ वातेसमभूमिभागे चत्वारियात्रा एपसितायसानिन्यस्यातपेतत्रकृतावधानः शिलाजतु
श्रेष्ठमवाप्यपात्रेप्रक्षिप्यतस्मात्तद्विगुणंचतोयं अलंतदूर्ध्वंक्वथितंचदत्वाविशोधयेत्तत्तम्
दितंयथावत् ततस्तुयत्कृष्णमुपैतिचोर्ध्वंसंतानिकावद्विरचितंतत् पात्रेतदन्यत्रततोवे
दध्यात्तस्माद्धिपात्रादपरत्रभूयः यद्यद्विशुद्धंजलमेवमूर्ध्वंफलंसमस्तंजलमेत्यधस्तात् तदा
त्यजेत्तत्सलिलंमलंचशिलाजतुस्यात्कुलशुद्धमेवं अथसंक्षेपतःशिलाजतुशोधनं गोदुग्धत्रि

राजिका १

तृतीया १ शिखिभिर्लवणासुरिसंयुतैः नष्टपिष्टिरसं कृत्वा लेपयेदूर्ध्वभाजने ततो दीप्तैरधःपातमु
पलैस्तस्य कारयेत् यंत्रेणाधरसंज्ञेतु ततः सूतो विशुध्यति स्वेदनादिक्रियाभिस्तु सोधितो
सोपदा भवेत् तदा कार्याणि कुरुते प्रयोज्यः सर्वकर्मसु अथ मुख्यदोषहरः शोध
नविधिः गृहकन्या हरति मलं त्रिफला वह्निं चित्रको विषं हन्ति तस्मादेभिर्मिश्रैर्वारान्सं
मूर्छयेत्सप्त अथ सर्वदोषहरस्संक्षिप्तः शोधनविधिः कुमारिका चित्रकरक्तसर्षपैः
कृतैः कषायैर्बृहतीविमिश्रितैः फलत्रिकेणापि विमर्दितो रसो दिनत्रयं सर्वमलैर्वियुज्यते
एवं कदर्थितः सूतः षंढो भवति निश्चितं दिव्योषधीकषायेण स्वेदितः सबली भवेत् सर्पा
क्षीचिंचिकावंध्याभृंगाद्यैः स्वेदितो वली ततः सपावककल्कैः स्विन्नः स्याद् अतिदीप्तिमान् स
र्पाक्षी नागफणी चिंचिका आवली वंध्या वालुखेरवसा भृंगः भृंगराजः अह्रोमुस्तः पावकः
शिरफोकार २ चित्रकं अथ रसस्य मारणविधिः धूमसारं रसं तोरी गंधकं नवसादरं यामैकं मर्दयेदम्लैर्ना

सोरठी मृत्तिका १

भा॰प्र॰ गंकृत्वासमंसमं काचकूप्यांविनिःक्षिप्यतांचमृत्स्नमुद्रयाविलिप्यपरितोवक्त्रेमुद्रांदत्वा
२९४ विशोषयेत् अधःसच्छिद्रपिठरीमध्येकूपींनिवेशयेत् पिठरींवालुकापूरैःभृत्वाचाकूपि
कागलं निवेश्यचुल्ल्यांतदधोवह्निंकुर्याच्छनैःशनैः तस्मादप्यधिकंकिंचित्पावकंज्वा
लयेत्क्रमात् एवंद्वादशयामंस्यान्म्रियतेरसउत्तमः स्फोटयेत्स्वांगशीतंतंमूर्द्धगंगन्धकंत्यजेत्
पूर्वतुलितमात्रयाप अधस्थंचमृतंसूतंगृह्णीयात्तंतुमात्रया यथोचितानुपानेनसर्वकर्मसुयोजयेत् अथान्यःप्र
कारः अपामार्गस्यबीजानांमूषायुग्मंप्रकल्पयेत् तत्संपुटेक्षिपेत्सूतंमलपूदुग्धमिश्रितं
मलपूकाष्ठोदुंबरिका द्रोणपुष्पीप्रसूनानिविडङ्गमरिचैर्दकः एतच्चूर्णंस्यधश्चोर्ध्वंदत्वा हिधा ४
मध्यंकरोतीतिमध्ययति ३ मुद्राप्रदीयते ततोलंमध्ययेत्सम्यग्जन्मूषासंपुटेसुधीः मुद्रांदत्वाशोषयित्वाततोगजपुटेप
चेत् एकेनैवपुटेनैवसूतकंभस्मजायते तस्ययोज्यंपथ्यास्यानेयथामात्रंयथाविधि अन्य
ःप्रकारः काष्ठोदुंबरिकादुग्धैरसंकिंचिद्विमर्दयेत् तद्दुग्धघृष्टहिंगोत्थमूषायुग्मंप्रकल्पये

त् क्षिप्त्वा तत्संपुटे सम्यक् ततो मुद्रां प्रदापयेत् धृत्वा तज्जोलकं प्राज्ञो मन्मूषासंपुटे धिके पचे
द्गजपुटे तेन सूतकं याति निश्चलतां ॥ अन्यः प्रकारः नागवल्लीरसैर्घृष्टः कर्कोटीकंदगर्भितः मन्मू
षासंपुटे पक्वः सूतो याति चैव निश्चलतां ॥ अथ कर्पूररसस्य विधिः ॥ तत्र पारदस्य संक्षिप्तं शोधनं क
र्तव्यं शुद्धसूतसमं कुर्यात् त्रित्येकं गैरिकं सुधीः इष्टिकां खटिकां तद्वत् स्फटिकां सिंधुजन्म च
वल्मीकं क्षारलवणं भांडरंजकमृत्तिकां सर्वा एतानि संचूर्ण्य वाससा चापि शोधयेत् ॥ ख
टिका खडी स्फटिका फटकरी सिंधुजन्म सैंधवं वल्मीकं वेंकउरके माटी क्षारलवणं
षरियालोन भांडरंजकमृत्तिका काविश्र एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्दयेत् स्फटि
का फटकरी सिंधुजन्म सैंधव वल्मीकं वेंवउरके माटी क्षारलवणं षरियालोन भांड
रंजकमृत्तिका काविश्र एभिश्चूर्णैर्युतं यावद्यामं विमर्दयेत् तच्चूर्णसहितं सूतं स्थालीम
ध्ये परिक्षिपेत् तस्याः स्थाल्याः मुखे स्थालीमपरां दापयेत् समां सवस्त्रकुट्टितमृदा मुद्रयेत्

ग्रा॰प्र २३५ नयोर्मुखं संशोष्यमुद्रयेद्द्वयोर्न्नयः संशोष्यमुद्रयेत सम्यक्वविशोष्यमुद्रांतां स्थालीचुल्ह्यांवि
धारयेत यंत्रोपरिआलवालंकृत्वाआर्द्रवस्त्रंशीततार्थंस्थापणीयं अग्निंनिरंतरंदद्याद्यावद्दि
नचतुष्टयं अङ्गारोपरितद्यंत्रंस्वेद्यत्वादहर्निशं शनैरुद्घाटयेद्यंत्रंमूर्ध्वस्थालीगतंरसं कर
पूरवत्सुविमलंगृह्णीयाद्गुणवत्तरं तंदेवकुंसुमचंदनकस्तूरिकुंकुमैर्युक्तं खादन्नहरति लवंग४
फिरंगव्याधिंशोपद्रवंसपदि विन्दतिवन्हेर्दीप्तिंपुष्टिंवीर्यवलंविपुलं रमयतिरमणीश्च
तकंरसकर्पूरस्यसेवकःसततं कर्पूररसः अथसिंदूररसः शुद्धसूतस्यगृह्णीयाद्द्विष
भागचतुष्टयं शुद्धगंधस्यभागैकंतावत्कत्रिमगांधकं अथवापारदस्यार्द्धशुद्धगन्धक
मेवहि तयोःकज्जलिकांकुर्य्यात्दिनमेकंविमर्दयेत मृत्तिकांवाससासार्द्धंकुट्टयेदतिपच
तः तयावास्त्रयेसम्यक्काचकूपींप्रलेपयेत मृत्तिकांशोषयित्वातुरूप्यांकज्जलिकांक्षे
पेत तत्कूपींवालुकायंत्रेस्थापयित्वारसंपचेत अग्निंनिरंतरंदद्याद्यावद्दिनचतुष्टयंगृह्णी

याद्दूर्ध्वसंलग्नंसिंदूरसदृशंरसः सिंदूररसमारितस्यमूर्च्छितस्यपारदस्यगुणाः पारदः कृमि
कुष्ठघ्नोजयदोदृष्टिदःसरः मृत्युजिद्बृमहावीर्योयोगवाहीज्वराहरः स्मृतिदोरूपदोवृष्यो
दृष्टिकृद्धातुवर्द्धनः खंडत्वनाशनःशूरःखेचरःसिद्धिदःपरः पारदःसकलरोगहास्मृतः
षड्रसोनिखिलयोगवाहकः पंचभूतमयएषकीर्त्तितः तेनतद्गुणगणैर्विराजते "रसामृते"
यस्यरोगस्ययोयोगस्तेनैवसहयोजितः रसेंद्रोहंतितंरोगंनरकुंजरवाजिनां अथोपरसाः
तत्रहिंगुलशोधनविधिः मेषीक्षीरेणदरदमम्लवर्गैश्चभावितं सप्तवारान्प्रयत्नेनशुद्धि
मायातिनिश्चितं एवंशोधितस्यहिंगुलस्यगुणाः तिक्तंकषायंकटुहिंगुलंस्यान्नेत्रामयघ्नं
कफपित्तहारि हृल्लासकंवज्वरकामलांश्चप्लीहामवातंचगरंनिहंति अथहिंगुलाद्रसाक
र्षणविधिः निंबूरसेर्निम्बपत्ररसैर्वायाममात्रकं घृष्टादरदमूर्ध्वंतुपातयेत्सूतयुक्तिवत्
तत्रोर्द्धपिठरीलग्नंमृत्तीयात्सूतमुत्तमं शुद्धमेवहितत्सूतंसर्वकर्मसुयोजयेत् अथगंध

भा.प्र.
२९६

कस्याशुद्धस्यदोषमाह अशुद्धोगन्धकः कुर्य्यात्कुष्ठंपित्तरुजभ्रमं हंतिवीर्य्यंबलंरूपंतस्माच्छु
द्धःप्रयुज्यते अथशोधनविधिः लोहपात्रेविनिःक्षिप्यघृतमग्नौप्रतापयेत् तप्तेघृतेतत्समानं
क्षिपेद्गंधकजंरजः विद्रुतंगंधकंदृष्ट्वातनुवस्त्रेविनिःक्षिपेत् यथावस्त्राद्विनिःसृत्यदुग्धमध्ये
खिलंपतेत् एवंसगंधकःशुद्धःसर्वकर्मोचितोभवेत् एवंशुद्धस्यगंधस्यगुणमाह गंधकःक
टुकस्तिक्तोवीर्य्योष्णस्तुवरःसरः पित्तलःकटुकःपाकेकंडूवीसर्प्पजंतुजित् हन्तिकुष्ठंक्षयंप्ली
हंकफवातान्रसायनं अथात्रकस्याशुद्धस्यदोषमाह पीडांविधत्तेविविधांनराणांकुष्ठं
क्षयंपांडुगदंचकुर्य्यात् हृत्पार्श्वपीडांचकरोत्यसह्यामशुद्धमभ्रंगुरुवन्हिहृत्स्यात् अथात्र
कस्यशोधनविधिः कृष्णाभ्रकंधमेद्वन्हौततःक्षीरेविनिःक्षिपेत् भिन्नपत्रंतुतत्कृत्वातंडु पत्रा९२
लीयाम्लयोर्द्रवैः भावयेदष्टयामंतदेवमभ्रंविशुध्यति अथतस्यमारणं कृत्वाधान्याभ्रकं
सिरकानिवू२ तच्चशोषयित्वाथमर्द्दयेत् अर्कक्षीरैर्दिनंखल्वेचक्राकारंचकारयेत् वेष्टयेदर्कपत्रैश्च

सम्यगाजपुटे पचेत् पुनर्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्र
यं म्रियते नात्र संदेहः प्रयोज्यं सर्वकर्मसु तुल्यं घृतं मृताभ्रेण लोहपात्रे विपाचयेत् घृते जी
र्णे तदभ्रं तु सर्वयोगेषु योजयेत् अथ धान्याभ्रकस्य विधिः पादांशशालिसंयुक्तमभ्रं बद्ध्वाथ कं
बले त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः कंबलाद्गलितं सूक्ष्मं वालुकारहितं च यत् ध
धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये एवं संशोध्य मारितस्याभ्रकस्य गुणाः अभ्रं कषायं म
धुरं सुशीतमायुःकरं धातुविवर्द्धनं च हन्यात्त्रिदोषं व्रणमेहकुष्ठं प्लीहोदरं ग्रंथिविषं कृमींश्च
रोगान्निहन्ति दृढयति वपुर्वीर्यवृद्धिं विधत्ते तारुण्याढ्यं रमयति शतं योषितां नित्यमेव दीर्घायुष्का
न् जनयति सुतान् सिंहतुल्यप्रभावान् मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम् अथ तालक
स्याशुद्धस्य दोषमाह अशुद्धं तालमायुर्घ्नं कफमारुतमेहकृत् तापस्फोटाङ्गसंकोचान्कुरु
ते तेन शोधयेत् अथ तालकस्य शोधनविधिः तालकं कणशः कृत्वा तच्चूर्णं कांजिके क्षिपेत्

भा·प्र· दोलायंत्रेणयाममेकंततःकूष्मांडजेद्रवे तिलतैलेपचेद्यामंयामंचत्रिफलाजले दोलायंत्रेचतु
२१७ र्यामंपक्वंशुध्यतितालकं अथतालकस्यमारणविधिः सदलंतालकंशुद्धंपौनर्नवरसे
नतु खल्वेविमर्द्दयेदेकंदिनंपश्चाद्विशोषयेत् संशोष्यगोलकंतस्यकुर्यात्तंचविशो
षयेत् ततःपुनर्नवाक्षारैःस्थाल्याअर्द्धंप्रपूरयेत् तत्रतद्गोलकंधृत्वापुनस्तेनैवपूरये
त् आकण्ठंपिठरंतस्यपिधानंधारयेन्मुखे स्थालींचुल्ल्यांसमारोप्यक्रमाद्वह्निंविवर्द्ध
येत् दिनान्यंतरशून्यानिपंचवह्निंप्रदीपयेत् एवंतन्म्रियतेतालंमात्रातस्यैकरक्तिका
अनुपानान्यनेकानियथायोग्यंप्रयोजयेत् एवंशोधितस्यमारितस्यतालकस्यगुणाः
हरितालंकटुस्निग्धंकषायोष्णंहरेद्विषं कंडूकुष्ठास्यरोगास्रकफपित्तकचव्रणान् अ
न्यच्च तालकंहरतेरोगान्कुष्ठमृत्युज्वरापहं शोधितंकुरुतेकांतिंवीर्यवृद्धिंतथायुषः
अथमनःशिलायाःअशुद्धायाःदोषमाह तालकस्यैवभेदोस्तिमनोगुप्तैतदंतरं ताल

कंर्वंतिपीतंस्याऽज्ञवेद्रक्तामनःशिला मनःशिलामंदबलंकरोतिजंतुंध्रुवंशोधनंमंतरेण शोधनंविना १
मलस्यबंधःकिलमूत्ररोधंसशर्कराकृच्छ्रगदंचकुर्य्यात् अथतच्छोधनविधिः पचेत्र्यहम
जामूत्रेदोलायंत्रेमनःशिलां भावयेत्सप्तधापित्तैरजायाःसविशुध्यति एवंशोधितायाः
मनःशिलायाःगुणाः मनःशिलागुरुर्वर्णप्रसिरोक्षालेखनाकटुः तिक्तास्निग्धाविषश्वास
कासभूतविषास्त्रनुत अथखर्परस्तुत्थभेदस्तस्यशोधनविधिः नरमूत्रेथगोमूत्रेसप्ता
खर्परिया ५ हंरसकंपचेत् दोलायंत्रेणशुद्धःस्यात्ततःकार्य्येषुयोजयेत् अथतस्यगुणाःखर्परंक
टुकंक्षारंकषायंवामकंलघु लेखनंभेदनंशीतंचक्षुष्यंकफपित्तहृत् विषाश्मकुष्टकं
डूलांनाशनंपरमंमतं अथसर्वरत्नानांसाधारणशोधनविधिः सूर्य्यावर्तैवज्रकंदःक
दलीदेवदालिका शिग्रुःकोशातकीवंध्याकाकमाचीचवालकं एषामेकरसेनैववज्रिंःक्षा नेत्रबाला २
रैर्लवणैःसह भावयेदम्लवर्गैश्चद्दिनमेकंप्रयत्नतः ततःपचेच्चतक्रेवैदोलायंत्रेदिनंसुधीः

वंदाला २ सहैमनर २ कटुकतोरई २ खेरसार २ केवैयाक्रामोनीर २ डरतरह ३ वज्राजीवनस्सरहंगोचर २

मंदीरादिभिः १ सूर्यावर्तादिक्काथैः १ सज्जीसुहागायवक्षार २

भा॰प्र॰ एवंशुध्यंति ते सर्वे प्रोक्ता उपरसा हि ये विशेषश्च कंकुष्टं गैरिकं शंखकाशीसटंकणास्तथा नीलां
२१८ जनं शुक्तिभेदाः स्फटिकाः सवराटकाः जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा शुद्धिमा
।मि॰ ३ यांत्यमी योज्याः निषकार्येषु सिद्धये एवं शोधितानामुपरसानां पथ्यगुणाः गुणग्रंथेष्वष्टव्याः
तत्राशुद्धस्य वज्रस्य दोषमाह अशुद्धं कुरुते वज्रं कुष्टं पार्श्वव्यथां तथा पांडुतां पंगुतत्वं च तस्मा
त्संशोध्य मारयेत् अथ वज्रस्य शोधनविधिः कुलत्थकोद्रवैः क्वाथे दोलायंत्रे विपाचयेत्
व्याघ्रीकंदगतं वज्रं त्रिदिनं तद्विशुध्यति व्याघ्री कंटकारिका अन्यशोधनविधिः गृहीत्वा
हिंसुकवज्रं व्याघ्रीकंदोदरे क्षिपेत् महिषीविष्टया लिप्त्वा कारीषाग्नौ विपाचयेत् त्रियामायाश्च
तुर्यांशं पाचितं न्यस्ते अश्वमूत्रके सेचयेत्पाचयेदेवं सप्तरात्रेण शुध्यति अथ वज्रस्य मारणविधिः
हिंगुसैंधवसंयुक्ते क्षिपेत्क्वाथे कुलत्थजे तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा अन्यो मारणप्र
कारः मेषशृंगी भुजंगास्थि कूर्मपृष्ठाम्लवेतसं शशदंतं समं पिष्ट्वा वज्रीक्षीरेण गोलकं

जोरियामे छी इति ५१

रुत्वातन्मध्यगंवज्रं म्रियतेध्मातमेवहि मारितस्यवज्रस्यगुणाः आयुःपुष्टिंवलंवीर्य्यवर्ण
सौख्यंकरोतिच सेवितंसर्वरोगघ्नंमृतंवज्रंनसंशयः अथरत्नानांशोधनमारणविधिः वज्र
वत्सर्वरत्नानिशोधयेन्मारयेत्तथा शुद्धानांमारितानांचतेषांशृणुगुणानपि मणयोवीर्यतःशी
तामधुरास्तुवरारसान् चक्षुष्यालेपनाद्धापिसारकाविषहारकाः धारणान्तेतुमांगल्याग्रहदु
ष्टिहराअपि इतिरत्नानांशोधनमारणविधिः अथविषाणांशोधनविधिः तत्रवत्सनाभस्यस्व
रूपनिरूपणं सिंदुवारसदृक्पत्रोवत्सनाभ्याकृतिस्तथा यत्पार्श्वेनतरोर्वृद्धिर्वत्सनाभःसभा
षितः विषस्यशोधनविधिः गोमूत्रेत्रिदिनंस्थाप्यंविषंतेनविशुध्यति रक्तसर्षपतैलाक्तेतथा
धार्य्यंचवाससि येगुणागरलेप्रोक्तास्तेस्युर्हीनाविशोधनात् तस्माद्विषंप्रयोगेषुशोधयित्वा
प्रयोजयेत् अथविषस्यगुणाः विषंप्राणहरंप्रोक्तंव्यवायिचविकाशिच आग्नेयंवातकफ
हृद्योगवाहिमदावहं व्यवायित्वकलकायगुणव्यापनपूर्वकपाकागमनशीलं विकाशि ।

भा·प्र·
२१८

ओजःशोषणपूर्वकसंधिबंधशिथिलीकरणशीलं आग्नेयं अधिकाम्यंशंयोगवाहि सं गिरु
णग्राहकं मदावहं तमोगुणप्रधान्येन बुद्धिविध्वंसकं तदेव युक्तिपुक्तं तु प्राणदायि रसायनं यो
गवाहि परं वातश्लेष्मजित्सं नियातहृत् अथोपविषाणां निरूपणं अर्कक्षीरं स्नुहीक्षीरं लांग
लीकरवीरकः गुंजाहिफेनो धत्तूरः सप्तोपविषजातयः एतेषां शोधनं चिंत्यं गुणास्तत्र तत्र
दृष्टव्याः अथद्रव्याणां गुणवत्ताविधिः गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधं मासद्वयात्तथा
चूर्णं लभन्ते हीनवीर्यतां हीनत्वं गुटिकालेहौ लभेते वत्सरोपरि हीनाः स्युर्घृततैलाद्याश्चतुर्मा
साधिकास्तथा घृततैलाद्याः इति योगविशेषणं चतुर्मासाधिकाः वत्सरादुपरिश्चत्वारो मा
साः अधिकाः येषु ते घृततैलयोर्विशेष माहत्वावरे घृतमब्दात्परं पक्वं हीनवीर्यत्वमाप्नुया
त् तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकं तदपि षोडशमासादूर्ध्वरिणं पक्व तैलं गुणाधि
कं वा वक्ष्यं औषध्यो लघुपाकाः स्युः निर्वीर्या वत्सरात्परं औषध्यो धान्यादयः लघुपाकाः शीघ्रया

२१८
४१

काःनिर्वीर्यस्युः पुराणस्युगुणैर्युक्ताश्चासवाधातवोरसाः अथस्नेहउच्यतेपानविधिः स्नेहश्च
चतुर्विधःप्रोक्तोघृतंतैलंवसातथा मज्जाचतंपिबेन्मर्त्यःकिंचिदभ्युदितेरवौ स्थावरोजंगमश्चैव।
द्वियोनिःस्नेहउच्यते तिलतैलंस्थावरेषुजंगमेषुघृतंवरं द्वाभ्यांत्रिभिश्चतुर्भिर्वायमकस्त्रि।
वृतोमहान् अस्यायमर्थः द्वाभ्यांघृततैलाभ्यांयमकाख्यःस्नेहःस्यात् त्रिभिःस्नेहैःघृत
तैलवसारूपैःत्रिवृताख्यःस्यात् चतुर्भिर्घृततैलवसामज्जाभिर्महास्नेह[illegible]दित्यर्थःपे
येत्र्यहंचतुरहंपंचाहंषडहानिच मृदुमध्यक्रूरकोष्ठापेक्षया। त्र्यहंचतुरहंपंचाहंषड
हानिवेति यदुक्तं मृदुकोष्ठस्त्रिरात्रेणस्निग्धस्नेहोपसेवया मध्यकोष्ठश्चतुर्भिश्च दिवसैः।
स्निह्यतिध्रुवं पंचभिर्वाथषड्भिर्वादिनैःक्रूरोविशुध्यति सप्तरात्रात्परंस्नेहः सात्मीभवते
सेवितः मृदुमध्यक्रूरकोष्ठानांसर्वेषांसप्तरात्रात्परंसात्मीभवति वातानुलोम्यवह्निदीप्ति
कोष्ठशुद्धिमृदुस्निग्धांगलाघववपुर्दृढेंद्रियार्थनिर्जरताबलवर्णकरीभवति नतुस्नेहदेषपा।

न्यादीन्करोति दोषकालवयोवह्निवलान्यालोक्ययोजयेत् हीनंचमध्यमांज्येष्ठांमात्रांस्नेहस्य
बुद्धिमान् अमात्रयातथाकालेमिथ्याहारविहारतः स्नेहः करोतिशोफार्शस्तंद्रानिद्राविसं
ज्ञता देयादीप्ताग्नयेमात्रास्नेहस्यपलसंमिता मध्यमायत्रिकर्षास्याज्जघन्यायद्विकार्षिकी हीनमध्यज्येष्ठ२
अथवास्नेहमात्राःस्युस्तिस्रोन्याःसर्वसम्मताः अहोरात्रेणमहतीजीर्य्यत्यान्हितुमध्यमा जी
र्य्यत्यल्पादिनार्द्धेनसाविज्ञेयासुखावहा अपमर्थः याऽहोरात्रेणजीर्य्यतिसामात्रामहतीए
वंमध्यमाकनिष्ठाचज्ञेया अल्पास्याद्दीप्तनीहृष्यास्वल्पेदोषेप्रपूजिता मध्यमास्नेहनीज्ञेयावृंह
णीश्रमहारिणी ज्येष्ठाकुष्ठविषोन्मादग्रहापस्मारनाशिनी सुश्रुतपुनरपह यामात्राप्रथ
मेयामेप्रातेजीर्य्यतिवासरे सामात्रादीप्यपत्यग्निमल्पदोषेचपूजिता यामध्यावासरस्यार्द्धम
तीतेपरिजीर्य्यति सावृष्याबृंहणीचस्यान्मध्यदोषेप्रपूजिता यामात्राचरमेयामेस्थितेऽन्हःप
रिजीर्य्यति सामात्रास्नेहनज्ञेयावृद्धदोषेप्रपूजिताः केवलंपैत्तिकेसर्पिःवातिकेलवणा

तैलान्यये स्नुह्ये इतिक्लिं
२

न्वितं पेयं वा कल्ककषायैर्वापि योगसंस्कारसमन्वितं रूक्षक्षतविषार्त्तानां वातपित्तविकारिणां ही
नमेधास्मृतीनांच सर्पिःपानं प्रशस्यते कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः पिबेयुस्तै(
लसात्म्याश्चये तैलं दार्ढ्यार्थिनश्च ये व्यायामकर्शिताः शुष्करेतोरक्ता महारुजः महाग्निमारु
तप्राणा वसायोग्या नरास्मृताः क्रूराशया क्लेशसहा वातार्त्ता दीप्तवह्नयः मज्जानंच पिबेयु
स्नेहः सर्पिर्वा सर्वतो हितं क्रूराशया क्रूरकोष्ठाः सर्वतः सर्वस्मात् स्नेहात् शीतकाले दिवा
स्नेहमुष्णकाले पिबेन्निशि वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा नस्याभ्यंजनगंडू
षमूर्द्धकर्णाक्षितर्पणे तैलं घृतं वा युंजीत दृष्ट्वा दोषबलाबलं घृते कोष्णंजलं पेयं तैले यूषः
प्रशस्यते वसामज्ज्ञोः पिबेन्मंडमनुपानं सुखावहं स्नेहद्विषः शिशून् वृद्धान् सुकुमारान् कृशा
नपि तृष्णालुकानुष्णकाले सहभक्तेन दापयेत् सर्पिष्मती बहुतिला यवागूः स्वल्पतं
डुला सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी शर्कराचूर्णसंयुक्ते दोहनस्थे घृते तु गां

ज्ञा·प्र
२२१

२२१

83

पानेक्षुद्रोग्गस्ता १

दुग्धात्क्षीरंपिबेद्रूक्षः सद्यःस्नेहनमुत्तमं मिथ्याचाराद्बहुत्वाद्वा यस्यस्नेहोनजीर्य्यति वि
ष्टभ्य वापि जीर्णोतिवारिणोष्णेनवामयेत् स्नेहस्याजीर्णशंकायांपिबेदुष्णोदकंनरः
तेनोद्गारोभवेच्छुद्धोभक्तंप्रतिरुचिस्तथा स्नेहेनपैत्तिकस्याग्निर्यदातीक्ष्णतरीकृतः
तदास्योदीरयेत्तृष्णांविषमांतस्यपाययेत् शीतंजलंवामयेच्चतेनतृष्णाप्रशाम्यति अजी
र्णीवर्जयेत्स्नेहमुदरीतरुणज्वरी दुर्बलोरोचकीस्थूलोमूर्छालोमेहपीडितः दत्तवस्ति
विरिक्तश्चवांतस्तृष्णासमन्वितः अकालप्रसवानारीदुर्दिनेचविवर्जयेत् स्वेद्यसंशोध्यम
द्यस्त्रीव्यायामासक्तचिंतकाः वृद्धबालकृशारूक्षाः क्षीणास्त्राःक्षीणरेतसः वातार्त्ताः(
तिमिरार्त्तायेतेषांस्नेहनमुत्तमं वातानुलोम्यंदीप्ताग्निर्वर्चःस्निग्धमसंहतं मृदुस्निग्धांग उदीयस्य स्निग्धे
ताग्लानिःस्नेहोद्वेगोथलाघवं विमलेंद्रियतासम्यक्स्निग्धेरूक्षेविपर्य्ययः भक्तद्वेषोमु प्रमिलितहूंयं २
स्ना १ खस्रावोगुदेदाहःप्रवाहिका तंद्रातीसारपांडुत्वमतिस्निग्धस्यलक्षणं रूक्षस्यस्नेहनंस्नेहे

देहस्य २

भा·प्र·
२२२

इतिस्निग्धस्यरूक्षान्नंश्यामाकचणकाद्यैश्चतक्रपिण्याकसक्तुभिः दीप्ताग्निःशुद्धकोष्ठश्चपु
ष्टधातुर्दृढेंद्रियः निर्जरोवलवर्णाढ्यःस्नेहसेवीभवेन्नरः स्नेहेव्यायामसंशीतवेगाघातप्रजाग
रान् दिवास्वप्नमभिष्यंदिरूक्षान्नंचविवर्जयेत् अथपंचकर्माणि प्रथमंवमनंपश्चाद्विरेक
श्चानुवासनं एतानिपंचकर्माणिनिरूहोनावनंतथा अथवमनविधिः शरत्कालेवसं
तेचप्रावृट्कालेचदेहिनां वमनंरेचनंचैवकारयेत्कुशलोभिषक् वलवंतंकफव्याप्तं
हृल्लासादिनिपीडितं तथावमनसात्म्यंचधीरचित्तंचवामयेत् विषदोषेस्तन्यरोगेमन्दे
ऽग्नौश्लीपदेऽर्वुदे हृद्रोगकुष्ठवीसर्प्यमेहाजीर्णभ्रमेषुच विदारिकाऽपचीकासश्वासपीन
सर्हन्विषु अपस्मारज्वरोन्मादेतथारक्तातिसारिषु नासाताल्वोष्ठपाकेचकर्णस्रावेधि
जिकके गलशुंड्यामतीसारेपित्तश्लेष्मगदेतथा मेदोगदेरुचौचैववमनंकारयेद्भिषक्
स्तन्यरोगदुष्टदुग्धजनितेवालरोगके नवामनीयस्तिमिरीनगुल्मीनोदरीकृशः नातिवृ

स्थूलवकामलतस्फोटः

केशुं ... (marginal note, illegible)

२२२

५५

क्षेणाग्निर्गर्भिणीचनस्थूलोनक्षतातुरः मदार्त्तोबालकोवृद्धःक्षुधितश्चनिरूहितः उदावर्त्त्यूर्द्ध्व
रक्तीचदुःछर्द्यःकेवलानिलीपांडुरोगीक्रमिव्याप्तःपठना स्वरघातवान् एतेप्यजीर्णव्य
थितावाम्यायेविषपीडिताः कफव्याप्तास्तेवाम्यामधुकक्वाथपानतः ऊर्द्ध्वरक्तीयस्य
नासास्यकर्णाक्षिमार्गेणरक्तंप्रवर्त्ततेसरक्तःस्मृतःककर्त्राजद्यगुष्यश्च मधुकस्थानेमधू
केतिक्षितीपःपाठः सुकुमारंकृशंबालंवृद्धंभीरुंनवामयेत् पाययित्वायवागूंवाक्षीरत पीत्वायवागूंवा
क्रदधीनिच असात्म्यैःश्लेष्मलैर्नेज्यैःदोषानुत्क्लेश्यदेहिनः स्निग्धस्विन्नायवमनंदत्तं केठंइतिखिः २
सम्यकप्रवर्त्तते वमनेषुचसर्वेषुसैंधवंमधुवाहितं बीभत्संवमनंदद्याद्विपरीतंविरेचनं
अरुच्यंविपरीतंस्यात्क्वाथ्यद्रव्यस्यकुडवंश्रपयित्वाजलाढके अर्द्धभागावशिष्टंचवम
नेष्ववचारयेत् क्वाथपानेनवप्रस्थास्त्येषामात्राप्रकीर्त्तिता मध्यमाषण्मिताप्रोक्तात्रिप्र
स्थाचकनीयसी वमनेचविरेकेचतथास्त्रोणितमोक्षणे अर्द्धत्रयोदशपलंप्रस्थमाहुर्म

णीषिणः अर्द्धत्रयोदशपलं सार्द्धषट्कं कल्कचूर्णावलेहानां त्रिपलं मात्रयोत्तमं मध्यमं द्विप
लं दद्यात्कनीयस्तु पलं भवेत् वमने चाष्टवेगाः स्युः कथितास्तूत्तमस्तु ते षड्वेगा मध्यमा वेगाश्च
त्वारस्त्ववरे मताः कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् सुस्वादुलवणाम्लोष्णैः संस
ष्टं वायुना कफं कृष्णाराढफलं सिंधुः कफे कोष्णजलैः पिबेत् पटोलवासानिंबैश्च पित्ते शीतज
लैः पिबेत् राढफलं मैनफलं सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् अजीर्णे कोष्णपा
नीयं सिंधुं पीत्वा वमेत्सुधीः मदनं मयनफलं वमनं पाययित्वा च जानुमात्रासने स्थितं
कंठमेरंडनालेन स्पृष्ट्वा तं वामयेद्भिषक् प्रसेको हृद्ग्रहः कोठः कंडूः दुश्छर्दिते भवेत् अ
तिवांते भवेत्तृष्णा हिक्कोद्गारौ विसंज्ञता जिह्वानिःसरणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः अक्ष्णो
र्व्यावृत्तिः विगत आवृत्तिः स्थिरतेति यावत् हनुसंहतिः हन्वोर्मिलनं रक्तछर्दिष्ठीवनं
च कंठपीडा च जायते वमनस्यातियोगे तु मृदु कुर्याद्विरेचनं वमनेतः प्रविष्टायां जिह्वा

यांकवलग्रहः स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीररसैर्हितैः रसैर्मांसरसैः फलान्यम्लानि खादे
युः तस्यचाप्यग्रतोनराः निःसृतांतुतिलद्राक्षाकल्कलिप्तांप्रवेशयेत निःसृतांजिव्हांव्याहृते
ह्योर्वृतान्यस्कंधेपीडयेच्चशनैःशनैः हनुमोक्षेस्मृतःस्वेदोनस्यंचश्लेष्मवातहृत रक्तपित्त
विधानेनरक्तछर्दिमुपाचरेत धात्रीरसांजनोशीरलाजाचंदनवारिभिः मंथंकृत्वापाय
येच्चसघृतक्षौद्रसर्करं शाम्यंत्यनेनतल्हाद्याःरोगाश्छर्दिसमुद्भवाः वाखिलाहृत्कण्ठशि
रसांशुद्धिर्दीप्ताग्नित्वंचलाघवं कफपित्तविनाशश्चसम्यक्वांतस्यलक्षणं ततोपरान्हेदीप्ता
ग्निमुद्गषष्टिकशालिभिः हृद्यैश्चजांगलरसैःकृत्वायूषंचभोजयेत तथानिलस्यदौर्गंध्यंकंडू
श्चग्रहणीविषं सुवांतस्यनपीडायैनवस्यैतेकदाचन अजीर्णंशीतपानीयंव्यायामंमैथुनं
तथा स्नेहाभ्यंगंचरोषंचदिनमेकंत्यजेत्सुधीः अथविरेचनविधिः स्निग्धस्विन्नायवान्ताय
दद्यात्सम्यग्विरेचनं अवान्तस्यत्वधःस्रस्तोग्रहणींछादयेत्कफः मन्दाग्निंगौरवंकुर्याज्जन

भा·प्र· २२८ पेचप्रवाहिकां ॥ अथवा पाचनैरामं बलासं परिपाचयेत् स्निग्धस्य स्नेहनैः कुर्यात् स्वेदैः स्वि
न्नस्य रेचनं शरत्काले वसंते च देहशुद्धौ विरेचयेत् अन्यदात्ययिके कार्ये शोधनं शीलये
द्बुधः आ त्ययिके प्राणसंकटे पित्ते विरेचनं युंज्यात् आमोद्भूते गदे तथा उदरे च तथाध्मा
ने कोष्ठशुद्धे विशेषतः दोषाः कदाचित् कुप्यंति जिता लंघनपाचनैः शोधनैः शोधिता
ये तु न तेषां पुनरुद्भवः बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः श्रांतस्तृषार्त्तः स्थूल बालादितः ५
श्च गर्भिणी च नवज्वरी नवप्रसूता नारी च मंदाग्निश्च मदात्ययी शल्यार्दितश्च रूक्षश्च न वि
रेच्यो विजानता जीर्णज्वरी गरव्याप्तो वातरक्ती भगंदरी अर्शः पांडूदरग्रंथि हृद्रोगारु
चिपीडितः योनिरोगप्रमेहार्त्तो गुल्मप्लीहव्रणार्दितः विद्रधिच्छर्दिविस्फोटविषूचीकुष्ठसं
युतः कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्वितः प्लीहशोथाक्षिरोगार्त्तः कृमिक्षारानलार्दि भस्मकूरोगए२
तः शूलिनो मूत्रघाती च विरेकार्हा नरा मताः बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः

वहुवातःक्रूरकोष्ठोदुर्विरेच्यःसकथ्यते मृद्वीमात्रामृदौकोष्टेमध्यकोष्टेचमध्यमा क्रूरेती
क्ष्णामताद्रव्यैर्मृदुमध्यमतीक्ष्णकैः मृदुर्द्राक्षापयश्चंचुतैलैरपिविरिच्यते मध्यमस्त्रिवृतातिक्ता
राजवृक्षैर्विरिच्यते क्रूरःस्नुक्पयसाहेमक्षीरीदंतीफलादिभिः मात्रोत्तमाविरेकस्यत्रिंशद्वे
गैःकफांतकृत्वेगैर्विंशतिभिर्मध्याहीनोक्तादशवेगकैः द्विपलंश्रेष्ठमाख्यातंमध्यमंचप
लंभवेत् पलार्द्धंचकषायाणांकनीयस्तुविरेचनं कल्कमोदकचूर्णानांकर्षंमध्वाज्यले
हतः कर्षद्वयंपलंवापिवयोरोगाद्यपेक्षया पित्तोत्तरेत्रिवृच्चूर्णंद्राक्षाक्वाथादिभिःपिवेत्त्रि
फलाक्वाथगोमूत्रैःपिवेव्योषंकचूर्णानांकर्षंमध्वाज्यलेहतः कर्षद्वयंपलंवापिवयोरो
गाद्यपेक्षया पित्तोत्तरेत्रिवृच्चूर्णंद्राक्षाक्वाथादिभिःपिवेत् त्रिफलाक्वाथगोमूत्रैःपिवेद्व्यो
षंकफार्दितः त्रिवृत्सैंधवशुंठीनांचूर्णमम्लैःपिवेन्नरः वातार्दितोविरेकायजांगलानांरसे
नवा एरंडतैलंत्रिफलाक्वाथेनद्विगुणेनवा युक्तंपीतंपयोभिर्वानचिरेणविरिच्यते श्री

भा.प्र. २२५

ग्रमेवविरिच्यतेह्यत्यर्थः त्रिवृताकौटजंबीजंपिप्पलीविश्वभेषजं समृद्वीकारसंक्षौद्रंवर्षकाले
विरेचनं त्रिवृद्दुरालभामुस्ताशर्करोदीच्यचंदनं द्राक्षांबुनासयष्ट्याह्वंशीतलंचघनात्यये उदी
च्यंबालंघनात्ययेशारदि पिप्पलीनागरंसिंधुश्यामात्रिवृतासह पिबेत्क्षौद्रेणशिशिरेवसं
तेचविरेचनंश्यामकल्का त्रिवृताशर्करातुल्याग्रीष्मकालेविरेचनं अभयामरिचंशुंठीविडं
गामलकानिच पिप्पलीपिप्पलीमूलंत्वक्पत्रंमुस्तमेवच एतानिसमभागानिदंतीचत्रिगुणा
भवेत् त्रिवृताष्टगुणाज्ञेयाषड्गुणाचात्रशर्करा मधुनामोदकान्कृत्वाकर्षमात्रान्प्रमाणतः ए
कैकंभक्षयेत्प्रातःशीतंचानुपिबेज्जलंतावद्विरिच्यतेजंतुर्यावदुष्णंनसेवते पानाहारविहारे
षुभवेन्निर्यंत्रणःसदा विषमज्वर-मन्दाग्निपांडुकासभगंदरान् दुर्नामकुष्ठगुल्मार्शो
गलगण्डोदरभ्रमान् विदाहप्लीहमेहांश्चयक्ष्माणंनयनामयान् वातरोगांस्तथाध्मानंमू
त्रकृच्छ्राणिचाश्मरीं पृष्ठपार्श्वोरुजघनजंघोदररुजंजयेत् सततंशीलनादेषःपलितानि

प्रणान्नाययेत् अभयामोदकाद्येतेरसायनवरास्मृता अभयामोदकोरसायनं पीत्वाविरेचनंत्री
तजलैःसंसिच्यचक्षुषी सुगंधंकिंचिदाघ्रायतांबूलंशीलयेदनु निवातस्थोनवेगांश्चधारयेन्नशय
त्व शीताम्बुनस्पृशेत्क्वापिकोष्णनीरंपिबेन्मुहुः बलासौषधपित्तानिवायुर्वातियथाव्रजेत् रे
कात्तथामलंपित्तंभेषजंचकफोव्रजेत् दुर्विरिक्तस्यनाभेस्तुस्तब्धताकुक्षिशूलरुक् पुरीषवा
तसंगश्चकण्डूमंडलगौरवम् विदाहोरुचिराध्मानंभ्रमःछर्दिश्चजायते तंपुनःपाचनैःस्नेहैःप
३५ क्वासंस्निग्धंविरेचयेत् तेनास्योपद्रवायांतिदीप्ताग्निर्लघुताभवेत् विरेकस्यातियोगेनमूर्छाभ्रंशो
गुदस्यच शूलंकफातियोगस्यात्मांसधावनसन्निभं मेदोनिभंजलाभासंरक्तंचापिविरिच्य
ते तस्यशीतांबुभिःसिक्त्वाशरीरंतंडुलांबुभिः मधुमिश्रैस्तथाशीतैःकारयेद्वमनंमृदु स
हकारत्वचःकल्कोदध्नासौवीरकेनवा पिष्टानाभिप्रलेपेनहंत्यतीसारमुल्बणं सौवीरंतुयवै
रामैःपक्वैर्वानिस्तुषैःकृतं सौवीरसंधानं आजंक्षीरंरसंवापिवैष्किरंहरिणंतथा शालिभिः

अजंक्षीरंगवांवापिरसंवा
कुकुटादितः १

भा॰प्र॰

२२६

षष्टिकेस्वल्पंमसूरैर्वापितंभोजयेत् वर्त्तिकालावविष्किरकपिंजलकतित्तिराः चकोरकुक्कुराद्याश्च
विष्किराःसमुदाहृताः कपिंजलइतिख्यातोलोकेकपिसतित्तिरः कुक्कुरःकपरइतिलोकेहरि
णस्ताम्रवर्णस्स्यान्मृगः शीतैःसंग्राहिभिर्द्रव्यैःकुर्यात्संग्रहणंभिषक् लाघवेमनसस्तुष्टौवातुलो
मंगतेऽनिले सुविरिक्तंनरंज्ञात्वापाचनंपाययेन्निशि इन्द्रियाणांबलंबुद्धेःप्रसादोवह्निदीप्तिता
धातुस्थैर्यंवयस्थैर्यंभवेद्रेचनसेवनात् प्रवातसेवांशीतांबुस्नेहाभ्यंगमजीर्णतां व्यायामंमै
थुनंचैवनसेवेतविरेचितः शालिषष्टिकमुद्गाद्यैर्यवागूंभोजयेत्कृतां जंघालविष्किराणांवा
वारसैःशाल्योदनंहितं हरिणैणकुरंगर्ष्यवातायुर्मृगमातृकाः राजीवःपृषतश्चैवजंघालाःस
स्माख्याः अथस्नेहवस्तिविधिः वस्तिर्द्विधानुवासाख्योनिरूहश्चतथापरः यःस्नेहैर्दीयतेस
स्यादनुवासननामकः कषायक्षीरतैलैर्योनिरूहःसनिगद्यते वस्तिर्निर्दीयतेयस्मात्तस्माद्वस्ति
रितिस्मृतः वस्तिभिःमृगादीनांमूत्राशयाभैः तत्रानुवासनाख्योहिवस्तिर्यःसोत्रकथ्यते अनुवासन

२२५

५८

नेत्रस्य मात्रा बस्तिरुदीरिता प्रसृतद्वयं तस्य मात्रा तस्मादर्द्धमपि वा भवेत् अनुवास्यस्तु रूक्षस्यात्तीक्ष्णाग्निः
केवलानिली नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी नस्याप्यानानुवास्यास्युरजीर्णोन्मादतृड्यु
ताः शोकमूर्च्छारुचिभयश्वासकासक्षयातुराः नेत्रं कार्य्यं सुवर्णादिधातुवृक्षत्ववेणुभिः नलैर्दंतैर्विषा
णाग्रैर्मणिभिर्वा विधीयते नेत्रं नाडी तथा च विश्वप्रकाशे नेत्रं मंथगुणे वस्त्रे तरुमूले विलोचने नेत्रवं
क्षेचनाड्यां च नेत्रो नेतरि भेद्यवदिति एकवर्षात्तु षट्वर्षं यावन्मानं षडंगुलं ततो द्वादशकं यावत्मा
नं स्यादष्टसंमितं ततः परं द्वादशाद्वा निरंगुलैर्नेत्रदीर्घता मुद्गधिकं कलायाभं छिद्रं कोलास्थिरंध्रकं
यथासंख्यं भवेन्नेत्रं श्लक्ष्णां गोपुच्छसन्निभं मूले स्थूलं ततः क्रमात् कनुं मुद्गच्छिद्रादिप्रमाणं नेत्रं
क्रमेण षट्वर्षाय द्वादशवर्षाय तदूर्द्धवर्षाय ज्ञेयं आतुरांगुष्ठमाने न मूले स्थूलं विधीयते कनिष्ठि
कापरीणाहमग्ये च गुटिकामुखं परिणाहोऽत्र स्थौल्यं तन्मूले कर्णिके द्वे च कार्य्ये भागाच्चतुर्था
कात् कर्णिकाद्वयं कारागुदाधिकांतः प्रवेशरोधिनी कर्णिकेति कर्णिकाकारत्वात् कर्णिकेति

मूले १ गचाद्रि १

भा·प्र·
२२७

कथ्यते योजयेत्तत्रवस्तिश्चबन्धद्वयविधानतः मृगाजशूकरगवांमहिषस्यापिवाभवेत् वस्तिरितिशे
षः मूत्रकोशस्तुवस्तिःस्यात्तदलाभेतुचर्मजः कषायरक्तःसुमृदुर्वस्तिःस्निग्धोदृढोहितः व्रणवस्तेस्तु कलवस्तौ १
नेत्रंस्यात्श्लक्ष्णमष्टांगुलोन्मितं मुद्गच्छिद्रंगृध्रपक्षनालिकापरिणाहिच शरीरोपचयंवर्णंबलमा
रोग्यमायुषः कुरुतेपरिवृद्धिंचवस्तिःसम्यगुपासितः दिवाशीतेवसंतेचस्नेहवस्तिःप्रयोजितः ग्री
ष्मवर्षाशरत्कालेरात्रौस्यादनुवासनं नचातिस्निग्धमशनंभोजयित्वानुवासयेत् मदंमूर्छांचजन
येद्विधास्नेहःप्रयोजितः स्निग्धभोजनेवस्तौच रूक्षंभुक्तवतोऽह्यन्नंबलंवर्णंचदापयेत् युक्तस्नेहम हापयेत ५
तोऽजंतुभोजयित्वानुवासयेत् युक्तस्नेहंयथोचितभोज्यंभोजयित्वेत्यर्थः हीनमात्रावुभौवस्तीना
तिकार्यकरौस्मृतौ अतिमात्रौतथानाहक्लमातीसारकारकौ उभौवस्ती अनुवासननिरूहा
ख्यौ उत्तमास्यात्पलैःषड्भिःमध्यमास्यात्पलैस्त्रिभिः पलद्वयेनहीनास्यादुक्तामात्रानुवासने स
ताह्वासैंधवाभ्यांचदेयंस्नेहेषुचूर्णकं तन्मात्रोत्तममध्यान्त्याषट्चतुर्द्विकमाषकैः विरेचनात्सप्तरात्रे

गतेजातबलायवा भुक्तान्नायाऽनुवास्यायवस्तिर्देयोनुवासनः अथानुवास्यंस्वभ्यक्तमुष्णांबु
स्वेदितंशनैः भोजयित्वायथाशास्त्रंकृतचंक्रमणंततः उत्सृष्टानिलविण्मूत्रंयोजयेत्स्नेहवस्ति।
ना उष्णांबुस्वेदितसुखाम्बुनास्नापितं सुप्तस्यवामपार्श्वेनवामजंघाप्रसारिणः कुंचितापरजंघस्य
नेत्रंस्निग्धेगुदेन्यसेत् ऊर्ध्ववस्तिमुखंसूत्रैर्वामहस्तेनधारयेत् पीडयेद्दक्षिणेनैवमध्यवेगेनधीरधीः
जंभाकासक्षवादींश्चवस्तिकालेनकारयेत् त्रिंशन्मात्रोन्मितःकालःप्रोक्तोवस्तेस्तुपीडने ततःप्रणे
हितस्नेहाउत्तानोवाक्शतंभवेत् प्रसारितैःसर्वगात्रैर्यथावीर्यंप्रसर्प्पति यथावीर्यंस्नेहादि स्वजा
नुनःकरावर्तकुपीक्षोटिकयायुतं एषामात्राभवेदेकावस्तौचैषविनिश्चयः निमेषोन्मेषणंपुंसामंगु
ल्याछोटिकाथवा गुर्वक्षरोच्चारणंवामात्रेयंस्मृताबुधैः ताडयेत्तलयोरेनंत्रींस्त्रीन्वारान्शनैःशनै
स्फिजोश्चैवतथाश्रोणिःशय्यांचैवोत्क्षिपेत्ततः स्फिजोश्चैनंस्वपाणिभ्यांपूर्वंवत्ताडयेत्सुधीः शय्यांचपाद
तस्तस्यत्रीन्वारानुत्क्षिपेत्ततः जातेविधानेतुततःकुर्य्यान्निद्रांयथासुखम् सानिलःसपुरीषःचस्नेहम।

म्रोतियस्यतु उपद्रवंविनाशीघ्रंससम्यगनुवासितः उपद्रवस्यानेकट्येचौषधानितिसुश्रुतेपाठः जी
र्णान्नमथसायान्हेस्नेहेप्रत्यागतेपुनः लघ्वन्नंभोजयेत्कामंदीप्ताग्निस्तुनरोयदि अनुवासितायदेय।
मितरेन्हिसुखोदकं धान्यशुंठीकषायंवास्नेहव्यापत्तिनाशनं सुखोदक मुष्णोदकं व्यापत्तेर्व्याधिः
अनेनविधिनाषड्वासप्तवाष्टौनवापिवा विधेयावस्तयस्तेषामन्तेचैवनिरूहणं दत्तस्तुप्रथमोव
स्तिःस्नेहयेद्वस्तिवंक्षणौ सम्यग्दत्तोद्वितीयस्तुमूर्द्धस्थमनिलंजयेत् बलंवर्णंचजनयेत्तृतीयस्तुप्र
योजितः चतुर्थपंचमौदत्तौस्नेहयेतांरसासृजौ षष्ठोमांसंस्नेहयतिसप्तमोमेदमेवच अष्टमोन।
वमश्चापिमज्जानंचयथाक्रमं यथाक्रममितिवचनादष्टमोऽस्थिस्नेहयेत् एवंशुक्रगतान्दोषान्द्वि
गुणःसाधुसाधयेत् द्विगुणः अष्टदशदिवसावधिकोवस्तिः अष्टादशाष्टादशकान्वस्तीनांयो
ःनिषेचयेत् सकुंजरबलोऽश्वस्यजवतुल्योऽमरप्रभः रूक्षायवहुवातायस्नेहवस्तिंदिनेदिनेदद्या।
त्ययस्तथान्येषामग्न्यावाधभयात्त्र्यहात् स्नेहोल्पमात्रोरूक्षाणांदीर्घकालमनत्ययः अनत्ययःअ

वाधः तथानिरूहः स्निग्धान्नमल्पमात्रःप्रसन्नूपते अथवायस्तत्कालंस्नेहोन पैति केवलः त

स्यान्यत्रशरोदेयोनवस्तिंह्युपितिष्ठति दत्तः स्नेह इतिविशेषः अशुद्धस्यमलोन्मिश्रः स्नेहोनैतियदापुनः

तदांगसदनाध्मानेशूलंश्वासश्चजायते पक्वाशयेगुरुत्वंचतत्रदेयन्निरूहणं तीक्ष्णातीक्ष्णौषधैर्यु

क्ताफलवर्त्तिर्हितायवा यथानुलोमतोवायुर्मलंस्नेहश्चजायते तथाविरेचनंदद्यात्तीक्ष्णंनस्यं

चसन्नूपते यस्यनोपद्रवंकुर्य्यात्स्नेहवस्तिरनिःसृतः सर्वोल्पोवाहतोरौक्ष्याकुपेक्ष्यःसविजानता

अनायातंत्वहोरात्रेस्नेहंसंसोधनैर्हरेत स्नेहवस्तावनायातेनान्यःस्नेहोविधीयते गुडूच्येरंडपू

तीकभार्ङ्गीवृषकरोहिषं शतावरीसहचरंकाकनासांपलोन्मितं यवमाषातसीकोलकुलत्थान्

प्रसतोन्मितान् चतुर्द्रोणेंभसापक्त्वाद्रोणशेषेणतेनच पचेत्तैलाढकेपेष्यैः यवानीयैःपलोन्मि

तैः अनुवासनमेतद्धिसर्ववातविकारनुत् पूतीकः करंजः रोहिषौरोहिसइतिसुगंधतृणविशेषः

काकनासाकौवाडोडीपलंपलंषट्स [illegible] सतिर्व्यापदस्तुजायंतेवस्तिकर्म्मणः दूषितात्समुदापेनता

भा·प्र· चिकित्सायांसुश्रुतान समुदायेनअनुचिंतेन आदिसामग्र्या पानाहारविहाराश्चवस्तिकर्मणि प॰ख॰अ॰१
२२९ कृत्स्नसः स्नेहपानसमाः कार्य्यानात्रकार्याविचारणा अथनिरूहवस्तिविधि निरूहवस्तिर्बहु
धाभिद्यतेकारणांतरैः तैरेवतस्यनामानिकृतानिमुनिपुंगवैः कारणांतरैः समवायकारणभेदैः
निरूहस्यापरंनामप्रोक्तमास्थापनंबुधैः स्वस्थानस्थापनाद्दोषधातूनांस्थापनंमतं निरूहस्य
पा॰७८ प्रमाणंचप्रस्थंपादोत्तरंपरंम ध्यमंप्रस्थमुद्दिष्टंहीनंचकुडवास्त्रयः परंश्रेष्ठं अतिस्निग्धोत्क्लिष्टदो
षः क्षतोरस्कः कृशस्तथा अक्लिष्टदोषः अनुत्क्लिष्टदोषः अस्तोत्क्लेशान इतिपावत क्षतोर
स्कः उरस्क्षतवान आध्मानछर्दिहिक्कार्शःशोथश्वासप्रपीडितः गुदशोफातिसारार्त्तो विसूची
कुष्ठसंयुतः गर्भिणीमधुमेहीचनस्थाप्यश्चजलोदरी वातव्याधावुदावर्त्तेवातासृग्विषमज्वरे
मूर्च्छातिल्लोदरानाहमूत्रकृच्छ्राश्मरीषुच वृध्यसृग्दर मन्दाग्निप्रमेहेषुनिरूहणं शूलेऽम्लपि
त्तेहृद्रोगेयोजयेद्विधिवद्बुधः उत्क्लेशानिलविण्मूत्रंस्निग्धास्विन्नसमोजितं मध्यान्हेगृहमध्येचय

५१

थायोग्यंनिरूहयेत् स्निग्धंस्वभ्यक्तंआलिप्तंउष्णांबुस्नापितंस्नेहवस्तिविधानेनबुधःकुर्यान्नि
रूहणं जातेनिरूहेचततोनयेदुत्कटुकासनः तिष्ठेन्मुहूर्त्तमात्रंतुनिरूहागमनेच्छया अत्रमुहू
र्त्तमात्रशब्देनैतदपिबोधितं निरूहप्रत्यागमनकालोमुहूर्त्तमात्रः अनायातंमुहूर्त्तात्तुनिरूहंसो
धनैर्हरेत् निरूहैरेवमतिमान्क्षारमूत्राम्लसैन्धवैः यस्यक्रमेणगच्छंतिवातपित्तकफास्त्रयः
लाघवंचोपजायेतसुनिरूढंतमादिशेत् विविक्ततामनस्तुष्टिःस्निग्धताव्याधिनिग्रहः आ
स्थापनस्नेहवस्त्योस्सम्यग्दानेतुलक्षणमविविक्तताः स्त्रोषधनिःसरणंअनेनविधिनायुं
ज्यातनिरूहंवस्तिदानवित् द्वितीयंवातृतीयंवाचतुर्थंवायथोचितं सस्नेहएकःपवनेपित्ते
द्वौपयसासहकषायकटुमूत्राद्यौकफेत्रयस्त्रयोहिताः पित्तश्लेष्मानिलाविष्टंक्षीरंयूषर
सैःक्रमात् निरूहंभोजयित्वाचततस्तमनुवासयेत् सुकुमारस्यवृद्धस्यबालस्यचमृदुर्हितः
वस्तिस्तीक्ष्णाप्रयुक्ताचतेषांहन्याद्बलायुषी दद्यादुत्क्लेशनंपूर्वंमध्येदोषहरंततः पश्चात्सं

शताह्वामधुकंबिल्वकौटजंफलमेवच सकांजिकस्तुगोमूत्रोवस्ति
दोषहरस्मृतः॥१२

फल१

भा.प्र. शमनीयंचदद्याद्वस्तिंविचक्षणः एरंडमूलमधुकंसैंधवंपिप्पलीवचा हवुषाफलकल्कश्चवस्ति
२३० रुत्क्लेशनःस्मृतः इत्युत्क्लेशनवस्तिः इत्युत्क्लेशनवस्तिः प्रियंगुर्मधुकंमुस्तातथैवचरसांजनं
सक्षीरःशस्यतेवस्तिर्दोषाणांशमनःस्मृतः इतिसंशमनवस्तिः त्रिफलाक्वाथगोमूत्रक्षौद्रक्षार
समायुताः ऊषकादिप्रतीवापावस्तयोलेखनाःस्मृताः ऊषकादिप्रतीवापाः ऊषकादिगणावे
शेषचूर्णप्रक्षेपाः इतिलेखनवस्तयः बृंहणद्रव्यनिःक्वाथैःकल्कैर्मधुरकैर्युताः सर्पिर्मांसर
सोपेतावस्तयोबृंहणाःस्मृताः इतिबृंहणवस्तयः बदर्यैरावतीशेलुशाल्मलीपुष्पजांकुराः ऐ धन्वनागरैः५
त्रीरुः४ रावतीनारंगीशेलुःवकुआर क्षीरसिद्धाःक्षौद्रयुक्ताःनाम्नापिच्छिलसंज्ञिताः अजोरभ्रैणरुधिरैर्यु
क्ताःपिच्छिलविचक्षणैः अजःछागः उरभ्रोमेषः एणःकृष्णमृगः मात्रापिच्छिलवस्तीनांपलैर्द्वादश
भिर्मता इतिपिच्छिलवस्तयःदत्वादौसैंधवंचाक्षं मधुनःप्रसृतिद्वयं विनिर्मथ्यततोदद्यात्स्नेहस्य
प्रसृतित्रयं एकीभूतेततस्नेहेकल्कस्यप्रसृतिंक्षिपेत् संमूर्छितेःकषायंतुचतुःप्रसृतिसंमि

तं गृह्णीयाच्चतदा वायमंते द्विप्रसृतोन्मितं छित्वा विमथ्यदद्याच्च निरूहं कुशलो भिषक् एवंप्रकल्पि
तो वस्तिः क्वाद्दशप्रसृतो भवेत् वातेचतुः पलं क्षौद्रं दद्यात्स्नेहस्य षट्पलं पित्तेचतुः पलं क्षौद्रं स्नेहं दद्या
त्पलत्रयं कफेचषट्पलं क्षौद्रं दद्यात्स्नेहं चतुः पलं इतिनिरूहणमात्रा एरंडक्काथतुल्यांशं मधु
तैलं पलांशकं शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतं मधुतैलकसंज्ञोयं वस्तिर्हस्तविलोडितः
मेदोगुल्मकृमिप्लीहमलोदावर्त्तनाशनः बलवर्णकरश्चैव वृष्योदीपनबृंहणः मधुतैलक
वस्तिः क्षौद्राज्यक्षीरतैलानां प्रसृतं भवेत् हवुषासैंधवाक्तांशो वस्तिः स्याद्यापनः परः पावनः
प्रसृतं ५ सारकः पावनो वस्तिः एरंडमूलनिः क्काथो मधुतैलं ससैंधवं एषयुक्तरथो वस्तिसवचापि
प्पलीफलः युक्तरथवस्तिः पंचमूलस्यवाक्वाथः तैलं मागधिका मधु ससैंधवः सयष्ट्याह्वः
सिद्धवस्तिरितिस्मृतः सिद्धवस्तिः स्नानमुष्णोदकैः कुप्यादिवास्वप्नमजीर्णतां वर्जयेदपरं सर्व
माचरेत्क्षास्तिस्नेहवत् अथोत्तरवस्तिविधिः अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितं निरूहादु

त्रयोयस्मात्तस्मादुत्तरसंज्ञकः द्वादशांगुलकंनेत्रंमध्येचकृतकर्णिकं मालतीपुष्पवृंताग्रच्छिद्रंसर्ष
पनिर्गमं पंचविंशतिवर्षाणामधोमात्राद्विकार्षिकी तदूर्ध्वंपलमात्रःस्यात्स्नेहस्योक्तोभिषग्वरैः अ
थस्यापनस्यातुरस्यततस्यस्नातभोजनैः स्थितस्यजानुमात्रेचपीठेस्निग्धशलाकया स्निग्धयामेढ्र मात्रेणपीतेत्विथ शलाकया
मार्गेवृत्ततोनेत्रंनियोजयेत् शनैःशनैर्घृताभ्यक्तंमेढ्ररंध्रेंगुलानिषट् ततोऽवपीडयेद्वस्तिंशनैर्ने
त्रंविनिर्हरेत् ततःप्रत्यागतेःस्नेहेस्नेहवस्तिक्रमोहितं स्त्रीणांकर्णिकास्थूलनेत्रंकुर्याद्दशांगु
लं मुद्गप्रवेशरंध्रंयोज्यंचयोन्यंतश्चतुरंगुलं द्व्यंगुलंमूत्रमार्गेणसूक्ष्मनेत्रंनियोजयेत् मूत्रकृच्छ्र
विकारेषुबालानांत्वेकमंगुलं शनैःनिःकम्प्यमाधेयंसूक्ष्मनेत्रंविचक्षणैः मालतीपुष्पवृंता
ग्रंनेत्रंयुक्तिमतापुनः सूक्ष्मशलाकाभिधानेनबालानांततोऽपिनेत्रस्यसूक्ष्मतावोधनार्थं योनिमा
र्गेषुनारीणांस्नेहमात्राद्विपालकी मूत्रमार्गेपलोन्मानाबालानांचद्विकार्षिकी उत्तानायैस्त्रियै
दद्यात्सूर्द्ध्वजान्वेविचक्षणः अप्रत्यागच्छतिभिषग्वस्तावुत्तरसंज्ञकेभूयोवस्तिंविदध्यात्तुसंयुक्तंशो

धनैर्गुणैः फलवर्त्तिर्विधातव्या योनिमार्गे दृढं निषक्त सूत्रे विनिर्मितां स्निग्धां सौधनद्रव्यसंयुतां
दह्यमाने तथा वस्तौ देया वस्तिविशारदैः क्षीरवृक्षकषायेण पयसा शीतलेन वा दह्यमाने वस्तौ
यस्मिन्नस्थाने वस्तिर्दत्तस्तस्मिन्दह्यमाने वस्तिं शुक्ररुजं पुंसां स्त्रीणामार्त्तवजां रुजः हन्यादुत्तर
वस्तिस्तु नोचितो मेहिनां क्वचित् सम्यग्दत्तस्य लिंगानि व्यापदः क्रममेव च वस्तेरुत्तरसंज्ञस्य सं
मानस्नेहवस्तिना अथ फलवर्त्तिविधिः घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णाङ्गुष्ठसंनिभा मला
प्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता अथ नस्यविधानविधिः नस्यं तत्कथ्यते धीरैर्नासा
ग्राह्यं यदौषधं नावनं नस्यकर्मेति तस्य नाम द्वयं मतं नस्यकर्म नासिकायां कर्मचिकित्सा ये
न तत् नस्यकर्म तस्य भेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं तथा मतं३
कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे दिनस्यविधाविन
ऋस्य पूर्वभागादौ नस्यं तत्स्नेहनं नेतेषु दिनेष्वापतर्पितः तथा नक्तं त्रियामायां गर्भिणीश्च स्नापितः

नस्यकर्मसमाचरेत् अशीतिवर्षादूर्ध्वं च नावनं नस्य दीयते ॥ अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथैरसै
स्तथा ॥ नासिकारंध्रयोरस्मै षट्चहूरष्टविंदवः २४

शा·प्र अजीर्णीदत्तवस्तिश्चपीतस्नेहोदकासवः क्रुद्धःशोकाभितप्तश्चतृषार्त्तोवृद्धवालकौ वेगावरोधी।
२३२ स्नातश्चस्नातुकामश्चवर्जयेत् नस्यमितिविशेषः अष्टवर्षस्यवालस्यप्रत्येकंरेचनंयोज्यंमुख्यंमध्यं।
समात्रया नस्यकर्मणिदातव्यंशाणैकंतीक्ष्णमौषधं हिंगुस्याद्यवमात्रंतुमाषैकंसैंधवंमतं क्षी
रंचैवाष्टशाणंस्यात्पानीयंचत्रिकार्षिकं कार्षिकंमधुरंद्रव्यंनस्यकर्मणियोजयेत् अवपीडप्र
धमनंद्वौभेदावपरौस्मृतौ शिरोविरेचनस्यार्थेतौतुदेयौयथायथं कल्कीकृतादौषधाद्यःद्रवःनिः
पीडितोरसः सोवपीडःसमुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः षडंगुलाद्विवक्त्राचनाडीचूर्णंतयाधमेत्
तीक्ष्णंकोलमितंवक्त्रवातैःप्रधमनंहितं ऊर्ध्वजत्रुगतेरोगेकफजेस्वरसंक्षये अरोचकेप्रतिश्या
येशिरःशूलेचपीनसे शोफापस्मारकुष्ठेषुनस्यंवैरेचनंहितं भीरुस्त्रीकृशवालानांनस्यंस्नेहेन
शस्यते गलरोगेसन्निपातेनिद्रायांविषमज्वरे मनोविकारेकृमिषुयुज्यतेचावपीडनं अत्यन्तो
त्कटदोषेषुविसंज्ञेषुचदीयते चूर्णंप्रधमनंधीरैःतद्धितीक्ष्णतरंयतः नस्यंवैरेचनंयथा ना।

•२३२

५२

नस्यंपस्याकुडश्रुण्वीभ्यांपिप्पलीसैंधवेनवा जलपिष्टेनकर्णाद्विनाशाम्र्दनवग्रदाः मन्याहनुगलो
द्भूताः नस्यंपतिमुखपृष्ठजाः मधूकसारकृष्णाभ्यांवचामरिचसैंधवैः नस्यंकोलांजसापिष्टंदद्यात्तं
द्राप्रबोधनं अपस्मारेतथोन्मादेसन्निपातेपतंत्रके सैन्धवंश्वेतमरिचंसर्षपाःकुष्ठमेवच वस्त्रम् त्स३
त्रेणसंपिष्टंनस्यंतद्धानिवारणं श्वेतमरिचंसहितजनवीजं रोहितस्यवपित्तेनभावितंसैंधवंवचा
मरिचंसैंधवंत्र्युटीकंकोलंलशुनंपुनः कट्फलंचेतितच्चूर्णंदेयंप्रधमनंबुधैः अथबृंहणनस्यस्य
कल्पनाकथ्यतेबुधैः मर्शश्चप्रतिमर्शश्चद्विधोभेदोस्नेहनेमतौ मर्शस्यतर्पणीमात्रामुख्याशाणैः
स्मताष्टभिः मध्यमाचचतुःशाणैःहितास्याणमितामता एकैकस्मिंस्तुमात्रेयंदेयानासापुटेबु
धैः मर्शस्यद्वित्रिवेलंवावीक्ष्यदोषबलाबलं एकान्तरंद्व्यंतरंवानस्यंदद्याद्विचक्षणः एकंदिनमं
तरंनस्यपश्चात्स्यंपत्रतदेकांतरं त्र्यहंपंचाहमथवासप्ताहंवासुयंत्रितः अथवा त्र्यहंत्रीणपहानिया
वत्प्रतिदिनं एवंपंचाहंसप्ताहंचसुयंत्रितःसावधानः यथाशक्तिकनंनभवति मर्शोशिरोविरे

केचव्यापदोविविधाःस्मृताः दोषोत्क्लेशात्क्षयाच्चैवविज्ञेयास्तासुयथाक्रमं दोषोत्क्लेशनिमित्तासुयुं
ज्याच्छमनशोधनं वमनशोधनंवमनस्त्वपशोधनं अथक्षयनिमित्तासुयथास्वंबृंहणंहितं शिरोनासा
शिरोरोगेषुसूर्य्यावर्त्तार्द्धभेदके दंतरोगेवलेहीनेमन्यावाक्कंशजेगदे मुखशोषेकर्णनादेवातपित्तग
देतथा आकालपलितेचैवकेशश्मश्रुप्रपातने युज्यतेबृंहणंनस्यंस्नेहैर्वामधुरद्रवैः बृंहणंन
स्यंयथा सशर्करंपयःपिष्टंनष्टमाज्येनकुंकुमं नस्यप्रयोगतोहन्याद्वातरक्तभवारुजः भ्रूशं
खाक्षिशिरःकर्णसूर्य्यावर्त्तार्द्धभेदकान् नस्यमेरंडतैलेनतथानाःरायणेनवामाषादिनावास
पिर्भिस्त्वक्षेषजसाधितैः एरंडतैलंकर्कंचसुश्रुते तद्यथा तिलपरिपीडनोपकरणकाष्ठान्या
हृत्यषेरनल्पकालंतिलाःपरिपीडितास्तान्यणुनिखंडशःकल्पयित्वाजलपूर्णेसंक्षुद्यकटाहे
पानीयेनाभ्युक्ष्यक्वाथयेत् ततस्तैलंनिःसरतितत्तैलंहस्तेनजलान्निःसार्यवातघ्नौषधकल्केन
पचेत् तदेरंडतैलमिति तद्वातरोगहरं तैलंकफेस्याद्घृतेवाकेवलेपवनेच सः॑द्यान्नस्यंसदा

शुक्त्यापत्रस्यपुटकेनवाप्रोतैर्वानस्यमाहरेत्॥ प्रोतैर्वर्त्त्यैः तदुपराष्टितैः स्थूलैरपि ४

शा॰प्र॰ कृतेननस्येनपलितंनस्यपतिध्रुवं अथनस्यविधिंवक्ष्येनस्यग्रहणहेतवे देशेवातरजोमुक्तेकृ
त्रिधर्मएं२ तदंतनिघर्षकं विशुद्धंधूमपानेनस्विन्नभालगलंतथा उत्तानशायिनंकिंचित्प्रलम्बशिरसंनरं
२३४ आस्तीर्णहस्तपादंचवस्त्राच्छादितलोचनं समुन्नमितनासाग्रेवैद्योनस्येनयोजयेत् कोलेनछि
न्नधारेणहेमताराद्दिशुक्तिभिः शुक्त्यावापत्रपुटकैर्वाहित्यैद्यान समाचरेत् धौतैस्तदुपल
क्षितैस्तैस्तैलैरपिनस्येषासिच्यमानेषुशिरोनैवप्रकंपयेत् नकुप्येतनप्रभाषेतनोक्षिकेन्नहसे
त्तथा एतैर्हिविहितस्नेहोनैवान्तःसंप्रपद्यते ततःकासप्रतिश्यायशिरोक्षिगदसंभवाः शृंगा
टकमभिप्लाव्यस्यात्पयेन्नगिलेद्द्रवं पंचसप्तदशैवस्युःमात्रास्नेहस्यधारणे उपविश्याथनिष्ठीवि
न्नाशाव्यक्तगतंद्रवं वामदक्षिणपार्श्वाभ्यांनिष्ठीवेत्सम्मुखंनहि नीतेनस्येमनस्तापंरजःक्रोधश्च
संत्यजेत् शयीतनिद्रांत्यक्त्वाचप्रोक्तानोत्ताच्छ्वासंनरः नासाशिरोविरेकान्तेधूमेवाकवलोहितः
नस्येक्षीणपुपविष्टानिलक्षणानिप्रयोगतः शुद्धिहीनातियोगानिविशेषाच्छास्त्रचिंतकैः लाघवंमल

२३४

संशुद्धिःस्त्रोतसांव्याधिसंक्षयः चित्तेन्द्रियप्रसादश्चशिरसःशुद्धिलक्षणं कंडूपदेहोगुरुतास्त्रोतसां
कफसंस्रवः मूर्द्धिहीनाविशुद्धेतुलक्षणंपरिकीर्तितं हीनाविशुद्धेहीनेननस्येनाविंध्येमस्तु ३२
लुंगआगमोवातवृद्धिरिन्द्रियविभ्रमः सून्यताशिरसश्चापिमूर्द्धिगाढंविरेचने मस्तुलुंगंमस्तकाग्रः
स्नेहःइंद्रियविभ्रमः इंद्रियाणामयथाविषयग्रहः हीनातिशुद्धेशिरसिकफवातघ्नमाचरेत्
तत्रहीनेननस्येनशुद्धेवातघ्नमाचरेत् सम्यग्विशुद्धिशिरसिसर्पिर्नस्येनिषिंचयेत् कफप्रसेकः
शिरसोगुरुतेंद्रियविभ्रमः॥लक्षणं तदतिस्निग्धेतत्ररूक्षंप्रदापयेत् भोजयेच्चानतिष्यन्दिनस्येवा
तिकमादिशेत् वातिकंवातिलमुपदिशेत् इतिपंचकर्माणि अथधूमपानविधिः धूमस्तुष
ड्विधःप्रोक्तःसमनोबृंहणस्तथा रेचनःकासहाचैववामनोव्रणधूपनः शमनस्यतुपर्यायौमध्यः ५२
प्रायोगिकस्तथा बृंहणस्यचपर्यायौस्नेहनोमृदुरेवच रेचनस्यापिपर्यायौशोधनस्तीक्ष्णएवच
च अधूमार्हश्चरवल्वेतेशीतोत्तीर्णश्चकःखिन्नः दत्तबस्तिर्विरिक्तश्चरात्रौजागरितस्तथा पिपासि

मध्यप्रोक्तंगिरकृत्यका२

तृष्णादाहार्त्तस्तालुशोषी तथोदरी शिरोभितापी तिमिरी छर्द्याध्मानप्रपीडितः क्षतोरस्कः प्रमेहार्त्तः पां
डुरोगी च गर्भिणी रूक्षः क्षीणोऽभ्यवहृतक्षीरक्षौद्रघृतासवः भुक्तान्नदधिमत्स्यश्च बालो वृद्धः कृश-
स्तथा अकाले चातिपीतस्तु धूमः कुर्य्यादुपद्रवं तत्रेष्टं सर्पिषः पानं नावनांजनतर्प्पणं ससितेक्षु
रसं प्राह्लाय पयो वा द्राक्षार्करांबु वा मधुराम्लौ रसौ वापि वमनाय प्रदापयेत धूमो वाक्ष्मामाढ्यर्षाऊर्ध्वजत्री
तिकांश्च कासश्वासप्रतिश्यायान्मन्याहनुशिरोरुजः वातश्लेष्मविकारांश्च हन्याद्धूमः सुयोजितः धू
मोपयोगात्पुरुषः प्रसन्नेन्द्रियवाङ्मनः दृढकेशद्विजश्मश्रुः सुगंधिविशदाननो भवेत धूमनाडी भवेत्तस्य त्रि
खण्डा च त्रिपर्विका कनिष्ठिकापरिणाहा राजमाषागमांतरे राजमाषागमा समस्ता नाडी धूमनाडी भवे
